१२ १ २ २ १ २ १ २ २
नश्योवा। नापवया। पवाइ३स्वा। अधिश्रुतेश्रवायि
२१ २ १ २१ २ १ २
य। स्यनाइ३यिर्थायि। पर्ष्टिमहस्मानै। गू। तोवा
३ ५ १ २१ १ ४
मूइ३४नो। वृत्तानम्। ना। पाक्रन्धनाइ३। वाइ३ट्रा
२ ५ २ २ १ २ १ २
३। णाइ४५यीहहायि॥ २) महोमश्रोवा। स्यावुपना।
१ २ १२ २ २ २ १ २
मग्नइ३पायि। माश्यत्वेवापृनेवा। वधाइञ्चायि।

* कः गा० ८प्र० २अ० १०मा०।

१ २ ३ १ २ १ २,३ ५ १
अस्मापयन्निगृतः । सं । ह्मायार३४च्चा । अपा । मा
२ १ १ ४ २
यि । चाऽअपाचार३यि । तो२३आ३ । चार४४ऽयितो
५
ऽह्मायि(३) ॥ १* ॥ [३] २१

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य सप्तमस्याध्यायस्य
षष्ठः खण्डः ॥ ६ ॥

अथ सप्तम-खण्डे—

प्रथमर्चे[1], प्रथमा ।

२ ३ २ ३ १ २ ३ २ ३ २ ३ १ ६ ३ क २ र
अग्ने त्वन्नोअन्तमउतत्राताशिवोभुवोवरूथ्यः ॥ १ ॥[2]

हे "अग्ने !" "वरूथ्यः" वरणीयः सम्भजनीयः । यद्वा, वरूथैः परिधिभिर्वृतः त्वं "नः" अस्माकम् "अन्तमः" अन्तिकतमः "भुवः" भव । "उत" अपिच "त्राता" रक्षकः "शिवः" सुखकरश्च भव ॥

"भुवः"-"भव"—इति पाठौ ॥ १ ॥

---

* ऋ० गा० २३५० २अ० १मा० ।

[1] 'यज्ञायज्ञियमग्निष्टोभसाम'—इति वि० ।

[2] ऋ० आ० ५, २, २, २ (२भा० ८९८ पृ०)=ऋ० वं० ४, १, १६, १ ।

अथ द्वितीया।

१ २ ३ १ २ २ ३ १ २ ३ १ २ ३ १ २
वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमोरयिन्दाः ॥ २* ॥

"वसुः" वासकः "अग्निः" सर्वेषामग्रणीः "वसुश्रवाः" व्याप्तान्नस्वं† "अच्छ" आभिमुख्येन "नक्षि" अस्मान् व्याप्नुहि। "द्युमत्तमः" अतिशयेन दीप्तिमान् त्वं "रयिं" पश्वादिलक्षणं धनं "दाः" अस्मभ्यं देहि ‡॥

"द्युमत्तमः"-"द्युमत्तमम्"—इति पाठौ ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २ १ २ ३ १ २
तन्त्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः ॥३¶॥ २२

हे "शोचिष्ठ" अतिशयेन शोचिष्मन्! "दीदिव" स्वतेजोभिर्दीप्यमान अग्ने! "तं" "त्वा" त्वां "सुम्नाय" सुखाय [सुम्नमिति सुखनामैतत् (निघ० ३, ६, १७)] तदर्थं "सखिभ्यः" समानख्यातिभ्यः पुत्रेभ्य § सुखार्थञ्च "नूनम्" "ईमहे" याचामहे ॥ ३ ॥ २२

---

* ऋ० वे० ४, १, १६, २।

† 'वसुश्रवाः—अन्नन धनेन च सम्पन्नः'—इति वि०।

‡ 'रयिन्दाः—रयिं धनं ददातीति रयिन्दाः,—इति वि०।

¶ ऋ० वे० ४, १, १६, ४।

§ 'सखिभ्यः-ऋत्विग्भ्यः'—इति वि०।

॥ गूर्ह्म् ॥ ओग्नायि । त्वन्नो२३आ । ऊम्मा २ ३ ।
ता२३४मा: । उतत्रातास्मिवोभुवा२३४५: । स्मिवोभुवा२
३: । वरोवा । थाप्रयोर्ह्वायि ॥(१) वाह्व: । अ । ग्ना
यिर्वा२३सू । ऊम्मा२३ । आ२३४वा: । अच्छानश्विद्युम
त्तमा२३४५: । द्युमत्तमा२३: । रयोवा । आप्रयिन्दो
र्ह्वायि ॥(२) तान्वा । ग्नो । चायिष्ठा२३दी । ऊम्मा
२३यि । दी२३४वा: । सुम्नायनूनमीमहा२३४५यि । न
मीमहा२३यि । सखोवा । भाप्रयोर्ह्वायि(३) ॥१८*॥[१]

सत्रासाह्वीयम् ॥ अग्ना३४यि । त्वन्नोअन्तम: । ओ
र्ह्वा । उततरा२ना । ग्ना२यिवो । भुर२३वा: । वरो
२ह्वो । वाह्वा३४३यि । था२३४योर्ह्वायि ॥(१) वह्व३४: ।
अग्निर्वसुअवा: । ओर्ह्वा । अच्छाना२ह्वायि । द्यू२मा ।

* ऋ० गा० ३प्र० २ष० १८षा० ।

२ १ ३ २र २र २ १ ५
ता२३माः । रयौ३ह्वो । वाहा३४३यि । आ२३४यिन्दो
५ ३ २ र र ५ र
६ह्वायि॥(२) तन्वा३४ । शोचिष्टदीदिवः । ओ६वा ।
२ १र १ १ २ १ ३ २र
सुम्नाया३नू । नार्३मायि । मा२३हायि । सखौ३ह्वो ।
३र २
वाहा३४३यि६ह्वायि(३) ॥ १५ * ॥ [२] २२

अथ द्वितीय-ऋचौ†—

प्रथमा ।

३ १उ १ १ २ ३१ २ ३ १२ ३ २
इमानुकम्भुवनासीषधेमेन्द्रश्चविश्वेचदेवाः॥ १‡ ॥

"इमा" इमानि परिदृश्यमानानि भुवनानि "नु" क्षिप्रं "सीषधेम" साधयेम वशीकरवाम । "कम्"—इति पूरकः [यद्वा, इमानि सर्वाणि भूतजातानि अस्मभ्यं कं सुखं सीषधेम साधयन्तु ; पुरुषव्यत्ययः (३,१,८५)] । "इन्द्रश्च" "विश्वे" सर्वे अन्ये "देवाः च" स्तुत्या प्रीत्या "इमम्" अर्थम् साधयन्तु ॥

"सीषधेम"-"सेषधाम"—इति पाठौ ॥ १ ॥

---

* ऋ० गा० १२प्र० २दे० १५सा० ।

† 'गौतमस्य भद्रम्'—इति वि० । सामैतदृक्षगानस्य ।

‡ ऋ० आ० १, १, १, ६ (१आ० ६०३ष्ठ०)=ऋ० वे० ८, ८, १५, १ ।

अथ द्वितीया ।

१ १ २ २क १२ २१ २ २१२ १२ २१ १
यज्ञश्चनस्तन्वश्चप्रजाश्चादित्यैरिन्द्रःसहसीषधातु ॥२*॥

"नः" अस्माकं "यज्ञ" ज्योतिष्टोमादिकञ्च यागं "तन्व" शरीरञ्च "प्रजां" पुत्रादिकाञ्च "आदित्यैः" अदिति-पुत्रैः अन्यैर्देवैः सह वर्त्तमानः "इन्द्रः" "सीषधातु" साधयतु ॥

"सहसीषधातु"-"सहचीक्लृपानि"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

२ १३ १ १ १ ३१ २ २ १ २ २१ २
आदित्यैरिन्द्रःसगणोमरुद्भिरस्मभ्यंभेषजाकरत् ॥३†॥२३

"आदित्यैः" अदिति-पुत्रैः मित्रादिभिः "मरुद्भिः" च "सगणः" गण-सहितः "इन्द्रः" "अस्माकम्" अस्मभ्यम् "भेषजानि" ओषधानि "करत्" करोतु ॥

"भेषजाकरत्"-"भूत्वितातनूनाम्"—इति पाठौ ॥३॥२३

---

* ऋ० वे० ८, ८, १५, २ ।

† ऋ० वे० ८, ८, १५, ३ ।

अथैकर्गात्मकं सूक्तं प्रवोचोपेति, चतुरृचरात्मिका*
काचिदियमृग्यूपा ; यथा बह्वृचानां
"भद्रवोऽपिवातयमनः"—इत्येक
एव पाद ऋगात्मकश्च
तद्वत् †॥

१ २र
प्रवोचोप ॥ १ ॥ २४

हे ऋत्विग्यजमानाः ! "वः" यूयम् "उप" समीपे "प्रार्च" प्रकर्षेणेन्द्रं पूजयत ॥ १ ॥ २४

॥ उद्दंशपुत्रम् ॥ २१ प्रवाः । र आयिन्द्रायवृत्रहान्तमा ७

२ १ र र २ २ २ १ २
२३या । वायिप्रायगाःथङ्गा१याऽता । याऽजुजौवाऽ ।

२ १ २ १
उप् । षाऽऽतोऽऽऽऽपृहायि ॥(१) अर्चा । तामर्क्कम्मरु

---

* वस्तुतस्तु "प्रवोचोप"—इति मैषा चतुरृचरात्मिका ऋक् प्रत्युत छन्दआर्चिक-श्रुतायाः "प्रवदन्द्रायबृहवचन्मायं (५, १, १० । १भा० ८९५८०)"—इत्यस्याः प्रतीकं "प्रवः"—इति, किञ्च "अर्चन्त्यर्कमुतः स्वर्का (५,०,१,९ । १भा० ८९५८०)"—इत्यस्याः प्रतीकम् "अर्च"—इति, तथैव "उपप्रचेमधुमतिक्रियन्तः (५, ९, १, ८ । १भा० ८९३८०)"—इत्यस्याः प्रतीकम् "उप"—इति, एवमेव सम्पन्नं "प्रवोचोप"—इति, ऋग्गान-इतीयप्रपाठकान्तिममुद्दंश पुत्रनाम (१००५०) सामैवाव वर्तमान मन्यथा तस्य मूलोभूत-ऋचस्यालाभ एव सर्वथा स्यात् । अन्यथाप्यदर्शनात् ।

† 'उद्दंशपुत्रोऽच्छावाकसाम । "प्रवदन्द्राय"—"अर्चन्त्यर्कम्"—"उपप्रचे"—एषमृचश्छन्दसिका-भाष्ये उक्तार्थः'—इति वि० ।

ता:सुवा२३र्का:। आस्तोभतिश्रुतो१यू३वा। सआ३उ
वा३। उप्। आ२यिन्द्रो३५ह्वाय ॥(२) उपा। प्रा
क्षेमधुमतायिन्विया २ ३न्ता:। पूष्येमरयिन्धा१इम्मा३क्षा
यि। तआ३ उवा३। उप्। आ२यिन्द्रो३५
ह्वायि(३) ॥ १८ * ॥ [१] २४

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य सप्तमस्याध्यायस्य
सप्तमः खण्डः † ॥ ७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ ७ ॥

॥ इति चतुर्थस्यार्द्धः प्रपाठकः ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-श्रीवीर-
बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण
विरचिते माधवीये सामवेदार्थ-प्रकाशे
उत्तरार्चिके सप्तमोऽध्यायः ‡ ॥ ७ ॥

---

* ऊ० गा० ६प्र० २अ० १८सा०।

† 'सप्तमश्चः समाप्तः। इत्युत्तरार्चिकः समाप्तः'—इति वि०।

‡ 'इति चतुर्थप्रपाठकस्य प्रथमार्द्धः'—इति वि० पदकारादिसंज्ञग्रन्थसमाप्तश्च।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ ८ ॥

॥ अथाष्टमाध्यायआरभ्यते * ॥

तत्र,

प्रकाव्यमिति प्रथमे खण्डे—

द्वादशर्चे† प्रथमे सूक्ते—

प्रथमा ।

१ २र ३ १ २ ३ २
प्रकाव्यमुशनेवब्रुवानो
३ २ ३ १ ३ १ २
देवोदेवानाञ्जनिमाविवक्ति ।
१ २ १ १ २ २ २
महिव्रतःशुचिबन्धुःपावकः
३ १ २ ३ २ ३र २८ ३ १ २
पदावराह्नोअभ्येतिरेभन् ॥ १ ‡ ॥

"उशनेव" एतन्नामक ऋषिरिव "काव्यं" कवि-कर्म स्तोत्रं "ब्रुवाणः" उच्चारयन् "देवः" स्तोता "देवानाम्" इन्द्रादीनां "जनिमा" जन्मानि "प्र विवक्ति" प्रकर्षेण ब्रवीति [वच परि-

---

° 'इदानीं छन्दोमा वाच्याः । ते च त्रयः बृहच्छन्दस्कानुष्टुभः प्रतिपदो भवन्ति विष्टुभां लोकजगत्यः जगतीनां गायत्र्यः । ब्राह्मणेन ऋषय उक्ताः'—इति वि० ।

† 'प्रकाव्यमुशनेव ब्रुवाण इति द्वादशर्चोभवति । चतुर्विंशतौमिकच्छन्दसः'—इति वि० । द्वादशार्चः खण्डइति यावत् ।

‡ ऋ० सा० ६, १, ४, २ (१ भा० १०९४०)=ऋ० वे० ७, ४, १२, १ ।

भाषणे (अदा० प०) व्यत्ययेन विकरणस्य स्नुः (३, १, ३९), "बहुलञ्छन्दसि (७, ४, ७८)"—इत्यभ्यासस्येत्वम्], "महिव्रतः" प्रभूतकर्म्मा, "शुचिबन्धुः" [बध्नन्ति शत्रूनिति बन्धूनि तेजांसि बलानि वा] दीप्ततेजस्कः, "पावकः" पापानां शोधकः, "वराहः" वरञ्च तदहश्च वराहः ["राजाहः सखिभ्यष्टच् (५, ४, ९१)"—इति टच् समासान्तः ; तस्मिन्नहनि अभिषूयमाणत्वेन तदान् ; अर्ग आदित्वान्मत्वर्थीयोऽच् (५, २, १२७)] तादृगः सोमः "रेभन्" रेभनं शब्दं कुर्वन्, "पदा" पदानि पात्राणि "अभ्येति" अभिगच्छति ; यद्वा, यथा कश्चन वराहः पदा पादेन भूमिं विक्रममाणः शब्दं करोति तद्वत् ॥ १ ॥

अथ द्वितीया।

२१ २ ३ १ २ ३ २ ३ १
प्रच्यसासस्तृपला*वग्रुमच्छा†
२ ३ १ १ २
मादस्तंवृषगणाअयासुः।
३ २ ३ १ २ १ २
अङ्गोषिण‡म्यवमानस्यसखायो
१ १ १ ३ १ २ २ ३ २
दुर्मषंवाणम्प्रवदन्तिसाकम् ¶ ॥ २ § ॥

---

* "तृपलं"—इति
† "मन्युम्"—इति
‡ "आङ्गष्य"—इति
¶ "साकं प्रवदन्ति वाणम्"—इति च
§ ऋ० वे० ७, ४, ११, ३।

ऋ०-पाठाः।

"हंसासः" शत्रुभिर्हन्यमाना हंसाइव आचरन्तो वा* "वृषगणाः" एतन्नामका ऋषयः† "अमात्" शत्रूणां बलात् त्रासिताः सन्तः "तृपला" तृपलं [सुपां सुलुगिति सोराकारादेशः (७, १, ३९)। तृपल-शब्दः क्षिप्र-वाची, तदुक्तं यास्केन —"तृप्रप्रहारी क्षिप्रप्रहारी (निरु० नै० ५, १२)"—इति] क्षिप्रं प्रहारिणं‡ "वग्नुम्" अभिषव-शब्दम्¶ "अच्छ" अभिलक्ष्य§ "अस्तं" यज्ञगृहं "प्रायासुः" प्रायामिषुः प्रगच्छन्ति। ततः "सखायः" स्तुत्य-स्तोतृत्व-लक्षणेन सम्बन्धेन सखिभूताः स्तोतारः "अक्षोधिणं" सर्वैरभिगन्तव्यं‖ [यदा, अक्षोधिणं स्तोत्रार्हं], "दुर्मदं" शत्रुभिः दुर्धरं दुःसहम्; एवंविधं "पवमानं" सोमम् उद्दिश्य "वाणं"वाद्यविशेषं** "साकं" सहैव "प्र वदन्ति"प्रवादयन्ति तदुपलक्षितं गानं कुर्वन्तीत्यर्थः॥ २॥

---

* 'हंसासः—आदित्य-रश्मयः'—इति वि०।

† 'वृषगणाः—मेक्षार मङ्गनाः'—इति वि०।

‡ तृपला—लोक-त्रयस्य पालकाः'—इति वि०। "ओभो वेन्द्रो वा"—इति निरु० नै० ५, १२।

¶ 'वग्नुं—बलम्'—इति वि०।

§ 'अच्छ—आप्नुम्'—इति वि०।

‖ 'अक्षोधिणम्—उष दाने दीप्तौ च * * * दीप्तं सोमं'—इति वि०।

** 'वाणं—वाद्यि-विशेषम्, यथा वाणस्य श्रततन्त्रीकस्य जायते शब्दः तद्वत् सोमस्य जायमानस्य महान् शब्दः'—इति वि०।

अथ तृतीया।

१२ ३ १२३२३
सयोजत*उरुगायस्यजूतिं
१ १२ ३१२ १२
वृथाक्रीड़न्तमिमतेनगावः।
१ १२ ३ १२ ३
परीणसङ्कृणुतेतिग्मशृङ्गो
२३ २३१ २३१२ १२
दिवाहरिर्दृदृशेनक्तमुग्रः॥ ३†॥

"सः" सोमः "उरुगायस्य" बहुभिः स्तुत्यस्य आत्मनः‡ "जूतिं" गतिं¶ "योजते" युनक्ति अन्तरिक्षे प्रेरयति। "वृथा क्रीडन्तम्" अनायासेन विहरन्तं गच्छन्तं सोमं "गावः" अन्ये गन्तारः "न मिमते" न परिच्छिन्दन्ति मातुं न शक्नुवन्त्येवार्थः। किञ्च "तिग्मशृङ्गः" [शृणवन्ति हिंसन्ति तमांसीति शृङ्गाणि तेजांसि] तीक्ष्ण-तेजस्कः "परीणसं" [बहुनामैतत् (निघ० ३, १, ७) बहुविधं तेजः§ "कृणुते" करोतु अन्तरिक्षे वर्त्तमानो यः सोमः "दिवा" अहनि "हरिः" हरितवर्णः "दृदृशे" दृश्यते

* "सरंहत"—इति ऋ० पाठः।
† ऋ० वे० ७, ४, १२, ३।
‡ 'उरुगायस्य—बहुविधस्य गानस्य'—इति वि०।
¶ 'जूतिं—प्रतिशब्दम्'—इति वि०।
§ 'परीणसं—परि समन्ताद् गानो नीयते परीणसः, तम्'—इति वि०।

न प्रकाशत इत्यर्थः, "नक्त" रात्रौ तु "ऋज्रः" ऋजुगामी* विस्पष्टः प्रकाशयुक्तो दृश्यते† ॥ [दृशे—दृशेः कर्मणि लिटि रूपम् ॥ ३ ॥

अथ चतुर्थी।

२ १ २ ३ १ १ ३ १ १ ३ १ १ १ १

प्रस्वानासोरथाइवार्वन्तोनश्रवस्यवः।

१ १ ३ १ १

सोमासोरायेअक्रमुः ॥ ४ ‡ ॥

"स्वानासः" अभिषव-वेलाया मुपरवेषणा शब्दं कुर्वन्तः "सोमासः" सोमाः "रथा इव" यथा शब्दं कुर्वन्तो रथाः तथा, "अर्वन्तो न" यथा शब्दं कुर्वन्तो अश्वाः तथा, "श्रवस्यवः" अन्नेभ्यः सकाशादन्नमिच्छन्तो "राये" यजमानानां धनाय "प्राक्रमुः" प्रगच्छन्ति ॥ ४ ॥

अथ पञ्चमी।

१ २ १ १ २ १ १ १ १

छिन्वानासोरथाइवदध्न्विरेगभस्त्योः।

१ १ ३ १ १

भरासःकारिणामिव ॥ ५ § ॥

---

* 'ऋजः—ऋ गतौ नक्षत्रो भवति'—इति वि०।

† 'एतदुक्तं भवति—दिवाभिषिक्तः सोमो रात्रिपर्यायेषु पुनर्निषिच्यते, यीऽभिषवं करोति तस्यायं दोष समाप्यते'—इति वि०।

‡ ऋ० वे० ६, ७, ३५।

¶ यूपस्य गर्भा उपरवा उच्यन्ते। तद्विधायकसूत्रम् कात्यायन-सूत्रम्—"दक्षिणस्यानसोऽधः प्रक्रमं खनत्युपरवानधीदि करोत्यवटवदिति (८, ४, १५)"। यथा यूपस्यावटः क्रियते तथावाप्युपरवनामकान्कतुरो गर्भानधिस्वीकार मारभ्य परिस्तरण पूर्वकं कुर्यादिति च तदर्थः।

§ ऋ० वे० ६, ७, ३४।

"रथाइव" युद्धदेशं प्रति यथा रथाः तथा* "हिन्वानासः" यागदेशं प्रति गच्छन्तः† सोमाः ऋत्विजां "गभस्त्योः" बाह्वोः "दधन्विरे" धीयन्ते। तत्र दृष्टान्तः—"भरासः" भराः "कारिणामिव"‡ यथा भारवाहानां बाह्वोर्धीयन्ते तद्वत् ॥ ५ ॥

अथ षष्ठी।

१ २ ३ १८ २८ ३ १ २ ३ १ २
राजानोनप्रशस्तिभिःसोमासोगोभिरञ्जते।

३ १७ ३ १३ १ २
यज्ञोनसप्तधातृभिः ॥ ६ ¶ ॥

"सोमासः" सोमाः "प्रशस्तिभिः" प्रशस्ताभिः स्तुतिरूपाभिः वाग्भिः "राजानो न" यथा राजानः§ "सप्तधातृभिः"‖ सप्त-होत्राभिः "यज्ञो न" यथा च यज्ञः तथा "गोभिः" गोविकारैः पयोभिः "अञ्जते" अज्यते संस्क्रियत इति ॥ ६ ॥

---

* 'रथाइव—गमन-स्वभावाः'—इति वि०।

† 'हिन्वानासः—पूयमानाः'—इति वि०।

‡ 'कारिणाम् इव—कारिणः रथ-वाहकाः अथवा भराः सङ्ग्रामाः सङ्ग्राम-कारिणः—इति वि०।

¶ ऋ० वे० ६, ७, ३४।

§ 'राजानो न—न शब्द उपमार्थीयः राजान इव, राजानो यथा प्रशस्तिभिः वध्यन्ते सेव्यन्ते तद्वत् सोमासः गोभिरिच्यते; उदकैः क्षीरैर्वा'—इति वि०।

‖ 'सप्तधातृभिः—सप्त षडृत्विजो सप्त धातारः अथवा सप्त ऋच्छंसि सप्त धातारः'—इति वि०।

अथ सप्तमी ।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १
परिस्वानासइन्दवोमदायबर्हणागिरा ।

१ २ ३ १ २
मधोअर्षन्तिधारया ॥ ७ * ॥

"स्वानासः" सुवानाः अभिषूयमाणाः "इन्दवः" सोमाः "बर्हणा" महत्या "गिरा" स्तुति-रूपया वाचा युक्ताः सन्तः "मदाय" मदार्थं "मधोः" मधुर-रसस्य "धारया" "परि अर्षन्ति" परितो गच्छन्ति ॥

"परिस्वानासः"-"परिसुवानासः"—इति पाठौ, "मधोः" -"सुताः"—इति च ॥ ७ ॥

अथ अष्टमी ।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
आपानासोविवस्वतोजिन्वन्तउषसोभगम् ।

२ ३ २ ३ १ १
सूराअण्वंवितन्वते ॥ ८ † ॥

"विवस्वतः" दीप्तिमतः इन्द्रस्य "आपानासः" आपानभूताः "उषसः" "भगं" ग्रहेभां "जिन्वन्तः" प्रेरयन्तः "सूराः" सरन्तः‡

* ऋ० व० ६, ७, ३४ ।

† ऋ० वे० ६, ७, ३८ ।

‡ 'सूराः—सूर्यादव दीप्तिमन्तः'—इति वि० ।

सोमाः "अपवं वि तन्वते"* अभिषव-वेलाया सुपरवेषु शब्दं कुर्वन्ति ॥

"जिन्वन्तः"-"जनम्"—इति पाठौ ॥ ८ ॥

अथ नवमी।

१ ३ १ २ ३ २ १ १ २ ३ १ २
अपद्वारामतीनाम्प्रत्नाऋण्वन्तिकारवः।

१ ३ १ १ ३ १ २
वृष्णोहरसआयवः॥ ९ †॥

"मतीनां कारवः" स्तुतीनां कर्त्तारः "प्रत्नाः" पुराणाः "वृष्णः" सेचकस्य सोमस्य "हरसः"‡ आहर्त्तारः "आयवः" मनुष्याः ऋत्विजः "द्वारा" यज्ञस्य द्वाराणि "अप ऋण्वन्ति" विवृण्वन्ति ॥ ९ ॥

अथ दशमी।

३ १ २ १ १ २ ३ १ १
समीचीनासआशतहोतानःसप्रजानयः।

१ १ २ २ ३ १ २
पदमेकस्यपिप्रतः॥ १० ¶॥

---

* 'अपवं वितन्वते—सूत्रं वितानं कुर्वन्ति'—इति वि०।

† ऋ० वे० ९, ७, ३५।

‡ "हरसः"—इति तु ऋग्वेदीयसंहितः, सामवेदीयस्तु "हरसे"—इति, पद-ग्रन्थे तथैव दर्शनात्, व्याख्यातस्तु यमेव विवरणग्रन्थेऽपि—'हरसे दीप्तये'—इति।

¶ ऋ० वे० ९, ७, ३५।

"समीचीनासः" समीचीनाः* "जानयः" जाति-सदृशाः "एकस्य" सोमस्य "पदं" स्थानं "पिप्रतः" पूरयन्तः "सप्त होतारः"† यज्ञे "आयत" आयन्ति ॥

"आयत"-"आसत"—इति पाठो, 'जानयः"-"जामयः" —इति च ॥ १० ॥

अथैकादशी।

२ २ १ २ २ १ २ २ १ २ २ १ २ २
नाभानाभिन्नआददे चक्षुषासूर्य्यन्दृशे।

२ १ २ २ २ १ १
कवेरपत्यमादुहे ॥ ११ ‡ ॥

"नाभिं" यज्ञस्य नाभिभूतं सोमं "नः" अस्माकं "नाभा" नाभौ अहम् "आददे" सोमं पीत्वा नाभि-स्थाने करोमीत्यर्थः। किमर्थम्? "चक्षुषा" "सूर्यं" "दृशे" द्रष्टुम्। किञ्च, "कवेः" क्रान्त-कर्म्मणः सोमस्य "अपत्यम्" अंशुम् "आ दुहे" आ पूरयामि¶ ॥

"चक्षुषासूर्यन्दृशे"—"चक्षुश्चित्सूर्यंसचा"—इति पाठो ॥ ११ ॥

---

* 'समीचीनासः—समीचीन-गुणाः सोमाः'—इति वि०।

† 'होतारः—देवानामाह्वातारः। सप्त जानयः—सप्त जनाः, यज्ञकारिण—: सोता, मैत्रावरुणः, ब्राह्मणाच्छंसी, पोता, नेष्टा, अच्छावाकः, आग्नीध्र इति' —इति वि०।

‡ ऋ० वे० ६, ७, १५।

¶ 'कवेः अपत्यम् आदुहे—कविर्मेधावी ब्राह्मणः तस्यापत्यं गच्छति सोमः, तेन निष्पादितत्वात्। आदुहे दुहने दृष्यादिवत् सोमम्'—इति वि०।

अथ द्वादशी।

३ २ २१ १ २ २१२ २२ २ १२ ३ २
अभिप्रियन्दिवस्पदमध्वर्युभिर्गुहाहितम्।

१ २ ३ १ २
सूरःपश्यतिचक्षसा ॥ १२ * ॥ १

"सूरः" सुवीर्यः इन्द्रः "चक्षसा" चक्षुषा "दिवः" दीप्तस्य आत्मनः "प्रियं पदम्" अध्वर्युभिः "गुहा" गुहायां हृदये "हितं" निहितं पीतं सोमम्† "अभि पश्यति" ॥

"प्रियम्"-"प्रिया"—इति पाठोऽपि ॥ १२ ॥

१ २ २ २ १ २ १
॥ पार्थम् ॥ ओ३ह्वोऽह्वोयि। प्रकावियाम्। उग्र

२ २ ३ ४ ५ २ २ १ २ १ २ १ २ ३ ४
ने। वज्रबाणाः। देवोदेवा। नाऽऽजनि। माविव

५ २ १ २ १ २ ३ ४ ५ २ २ १
क्ती। मक्षिव्रताः। प्रुचिव। धूःपवाकाः। पदावरा।

२ १ २ २ ४ २ १
ह्वोऽअभि। आ३४३यि। तौ३रा ५ यिभा ६ ५ ६न्॥(१)

२ १२ २ १ २ २ ३ ४ ५ २ २ १
प्रहृष्सासाः। तृपला। वयुमच्छा। अमादस्ताम्।

२ १ २ ३ ४ ५ २ २ १ २ १ २
वृषग। णाऽयासूः। अङ्गोषिणाम्। पवमा। नऽ

* ऋ० वे० ६,७, २५।

† 'गुहायां द्रोणकलशे हितं सोमाख्यं पदम्'—इति वि०।

‡ "चक्षसा"—"चक्षुषा"—इति च पाठोऽयम्।

३४ ५ २१ २ १ २ २ ४
सखायाः। दुर्मर्षंवा। णाऽम्प्रव। दाऽ४३। तीऽसा
२२ १ २१२ २१४ ५
पुकाई५६म्॥(२) सयोजनायि। उरुगा। यस्यजूतीम्।
२२१२ २ १ २१४ ५ २२ १
वृथाक्रीडा। जाऽम्मिम। तेनगावाः। परीणसाम्।
२१२ २३ ४५ २ २ २ २ १
क्षणुते। तिग्मशृङ्गाः। ओऽह्होऽह्वोयि। दिवाहरा
२१२ २ १ ४
यिः। ददृशे। नाऽ४३। क्ताऽमापृर्ज्ञाई५६ः(३)॥५*॥[१]
२२ २ १ २१२
॥ वाराहम॥ हाउहाउ। ऊप। प्रकावियाम।
११२ १३४ ५ २१२२ २ १ २
उग्नने। वज्रवाणाः। देवोदेवा। नाऽच्छनि। मा
१ ४५ १ १ २ २ ३ ४ ५ १२२
विवक्ती। मच्छिवताः। शुचिवाऽ। धूःपवाकाः। पदा
२ १ २ ३ ४
वरा। हो३ अभि। आ३४३ यि। तीऽराप्रयिभाई
२१ २ २१२ २३४ १ २
४६न॥(१) प्रहंसामाः। तुपला। वग्नमच्छा। अ
१२ २१ २ ३४५ २१२
मादस्ताम्। वृषग। णाअयामूः। अङ्गोषिणाम्।
२ २ ३ ४ ५ २१ २०१ २
पवमा। नंसखायाः। दुर्मर्षंवा। णाऽम्प्रव। दा

---

* ऊ० मा० ६प्र० २अ० ५मा०।

३४३। तीव्रसाप्रकाद्ध्रुवेम् ॥(२) सयोजतायि। उरु
गा। यस्यजूतीम्। वृथाक्रीडा। ताइम्मम। तेन
गादाः। परीणसाम्। क्षणुते। तिग्मशृङ्गाः। ह्वाउ
ह्वाउ। ऊप्। दिवाहरायिः। दहशोनाइ४३। क्षा
इमाप्रर्ञाद्ध्रुवेः(३) ॥ १८ * ॥ [२]

॥ प्रवङ्गार्गवम् ॥ प्रक्षावियाम्। उशनेवा। ब्रू
वाणाः। देवोदेवा। नाञ्जनिमा। वाइयिवक्षायि।
महिव्रताः। प्रुचिवन्धुः। पाइवाकाः। पदावरा।
द्वोअभियायि। तीव्रेभाइनाउ ॥(१) प्रहृष्यासाः।
तृपलावा। ग्रइमच्छा। अमादस्याम्। वृषगणाः।
आइयामूः। अङ्गोषिणाम्। पवमानाम्। साइखा
याः। दुर्म्मर्षेवा। णंप्रवदाः। तीव्रसाकाइमाउ ॥(२)

* ऋ० गा० १६प्र० २अ० १८सा०।

१ २ १ २ १ १ २ १ २ १ २ १
सयोजतायि। उरुगाया। स्रा२जूतीम्। वृथाक्रीडा।

२ १ १ २ २ १ २ १ २
तम्मिमते। ना२गावाः। परीणसाम्। क्षुणुतेतायि।

१ २ १ २ १ १ २
गमा२शुगाः। दिवाचरायिः। दृढशेना। क्षा२मृजा

१ १ १ १
३१उ। वा२३४५:(३) ॥ २ * ॥[३]

३ ५ ३ २ ४ ५
॥ कुत्सारथीयम्॥ हो४वा। उङ्वा३। होवा।

२१२ २ १ २१२ २३४ ५ २१२१ २२ २
प्रकावियाम्। उग्मने। वब्रुवाणाः। देवोदेवा। ना

१ २ ३४५ १ २ १ २ १ २ ३
३ज्झनि। माविवक्री। मच्चित्रताः। प्रुचिव। धूःप

४ ५ २१२ २१ २ १ २ ३४ ५ १
वाकाः। पदावरा। हो३अभि। ऐतिरेभान्॥(१) प्र

१ २२ १ २१२ २३४ ५ २१२ २ १ २१
च्युसासाः। तृपला। वग्रमच्छा। अमादस्ताम्। वृष

२ ३४ ५ २१२ २१ २१२ २ ३४
ग। णायआसूः। अङ्गोषिणाम्। पवमा। नच्सखा

५ २ १ २ १ २ १ २ ३ ४ ५ २
याः। दुम्मर्षेवा। णा३प्रव। दन्तिसाकाम्॥(२) स

१ २ १ २१२ २ ३४ ५ २१२२ १ २
योजतायि। उरुगा। यस्रजूतीम्। वृथाक्रीडा। ता

---

* ऋ० गा० २३प्र० २ष० १सा०।

१ २,३४ ५ २।२।१ २।१ २,१
इम्मिम। तेनगावाः। परीणसाम्। कृणुते। तिग्म
४ ५ २।२।१ २।१ २।४।५ ३
शृङ्गाः। दिवाहरायिः। दहशे। नक्तमृज्राः। हो४
५ १ २ ४ ५ ५
वा। उक्थवाऽ। हेवाऽहाउवा(३) ॥ ६ * ॥ [४] १

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य अष्टमस्याध्यायस्य
प्रथमः खण्डः ॥ १ ॥

अथ द्वितीयखण्डे —

अस्यमिति द्वादशर्चं† प्रथमं सूक्तम् ;

तत्र, प्रथमा।

१ २ ३ १ २ ३।१ २।२ ३ १ २ ३ १ १
अस्यमिन्दवःपथाधर्मन्नृतस्यसुश्रियः।
३ १ २ ३ १ २
विदानाअस्ययोजना ॥ १ ‡ ॥

"अस्य" अनेन यजमानेन कृतान् "योजना" तद्देवता-योग्यान् सम्बन्धान् "विदानाः" जानन्तः "सुश्रियः" शोभन-श्रवणाः "अस्यम्" हविर्द्धानात् सृज्यन्ते ॥

"योजना"-"योजनम्"—इति पाठौ ॥ १ ॥

---

* ऋ० मा० १३प्र० २ऋ० ६सा०।
† 'द्वितीयो द्वादशर्चः'—इति वि० खण्डः-इति यावत्।
‡ ऋ० वे० ६, ७, २८।

अथ द्वितीया।

२ड २ १ १ ३ २ ३ १ १ १२ २२
प्रधारामधोअग्रियोमहीरपोविगाहते।
२ २ ३ २ १ १ २
हविर्हविःषुवन्द्यः॥ २ †॥

"हविःषु" हविषां मध्ये "वन्द्यः" स्तुत्यः "हविः" हविरात्मकः यः सोमः "महीः" महतीः "अपः" वसतीवरीः "विगाहते", तस्य "मधोः" सोमस्य "अग्रियः" मुख्या धाराः प्रपतन्तीत्यर्थः॥

"मधोः"--"मध्वः"—इति पाठौ॥ २॥

अथ तृतीया।

२ १ २ १ २ १ १२ २२ १ १ २
प्रयुजावाचोअग्रियोवृषोअचिक्रदद्वने।
२ ३ २ १ १ २ १ १
सद्माभिसत्योअध्वरः॥ ३ ‡॥

"अग्रियः" हविषां मध्ये मुख्यः सोमः "युजाः" युक्ताः "वाचः" प्रकरोतीत्यर्थः। एतदेव दर्शयति—"वृषः"¶ कामानां वर्षकः "सत्यः" सत्यभूतः "अध्वरः" हिंसा-वर्जितः सोमः

---

* "हविष्षु"—इति ख० ग० पु०-पाठः।

† ऋ० वे० ६, ७, २८।

‡ ऋ० वे० ६, ७, २८।

¶ "वृषोअचिक्रदत्"—इति मूलस्य "वृषः", "अचिक्रदत्"—इति छेदमवलम्ब्य व्याचष्टे सायणः, परमेष पदपाठ-विरुद्धः तत्र "वृषा", "उ", "अचिक्रदत्"—इति छेद-दर्शनात्; अतएव विवरणकार आह,—'वृषा सेक्ता, उ इति पदपूरणः'—इति।

"सह्व" यज्ञगृहं "अभि" प्रति "वने" उदके अचिक्रदत् शब्दं करोतीत्यर्थः॥

"हृषोअचिक्रदत्"—"हृषावचक्रदत्"—इति पाठौ॥ ३॥

अथ चतुर्थी।

२ ३ १२ १२ ३ २ ३ १ २ ३ १२ १२
परियत्काव्याकविर्नृम्णापुनानोअर्षति।

१२ ० १ २
स्वर्वाजीसिषासति॥ ४ ॥

"कविः" क्रान्तकर्मा सोमः "नृम्णा" नृम्णानि बलानि† "पुनानः" शोधयन् "काव्या" काव्यानि कवि-कर्माणि स्तोत्राणि "यद्" यदा "परि अर्षति" परिगच्छति, तदा "स्वः" स्वर्गे "वाजी" बलवान् अन्नवान्वेन्द्रः‡ "सिषासति" यागं प्रत्यागन्तुं स्वकीयं बलं सम्भक्तुमिच्छति॥

"पुनानः"-"वसानः"—इति पाठौ॥ ४॥

अथ पञ्चमी।

१२ ३ २३ ३ २ ३ १ २
पवमानोअभिष्टुधोविश्वोराजेवसीदति।

१ २ ३ १ २ ३ १ २
यदीमृण्वन्तिवेधसः॥ ५ ॥

• ऋ० वे० ९, ७, २८।

† 'नृम्णा धनेन'—इति वि०।

‡ 'वाजी—वेगवान्, अथवा चरुपुरोडाशादि-लक्षणेनान्नेनान्नवान् स्वर्गलोकं यजमानस्य साधयति'—इति वि०।

¶ ऋ० वे० ९, ७, २९।

"यद्" यदा "ईम्" एनं* सोमं "वेधसः" कर्मणां कर्त्तारः ऋत्विजः† "ऋण्वन्ति" प्रेरयन्ति, तदा "पवमानः" "हरिरेष सोमः "सृधः" स्पर्द्धमानान् याग-विघ्नकारिणः राक्षसादीन् "अभि सीदति" नाशयितुमभिगच्छति। तत्र दृष्टान्तः—"विशः राजा इव" यथा राजा विशः स्पर्द्धमानान् मनुष्यान् नाशयितुमभिगच्छति तद्वत् ॥ ५ ॥

अथ षष्ठी।

२ १ २ ३ १ २ ३ १ उ ३ १ २
अव्यावारेपरिप्रियोहरिर्वनेषुसीदति।

३ १ २ ३ २
रेभोवनुष्यतेमती ॥ ६ ¶ ॥

"हरिः" हरितवर्णः "प्रियः" देवानां प्रियतम एव सोमः "वनेषु" उदकेषु§ सम्पृक्तः "अव्याः" अवेः "वारे" वाले "परि सीदति" किञ्च "रेभः" अभिषव-वेलायाम् उपरवेषु शब्दं कुर्वन् "मती" मत्या स्तुत्या‖ "वनुष्यते" सेव्यते ॥ ६ ॥

° 'ईम्—इति पदपूरणः'—इति वि०।

† "वेधाः"—इति मेधावि-नामसु निघण्टौ दृश्यते (३, १५)

‡ "अव्यो"—इति ऋ०-पाठः।

¶ ऋ० वे० ६, ७, २९।

§ 'वनेषु उदकेषु सीदति, अथवा वनेषु काष्ठमयेषु द्रोणकलशेषु पवमानादिषु सीदति'—इति वि०।

‖ 'मती—बुद्ध्या ऋत्विग्यजमानानाम्'—इति वि०।

अथ सप्तमी।

२ ३ १र २र३ १ २ १ १र २र
सवायुमिन्द्रमश्विनासाकमद्देनगच्छति।

२ ३ १ २ १ १ २
रणायोअस्यधर्मणा* ॥ ७ † ॥

"यः" यजमानः "अस्य" सोमस्य "धर्मभिः"‡ कर्मभिः क्रयणाभिषवादिभिः "रण"¶ रमते, "सः" यजमानः "वायुम्," "इन्द्रम्," "अश्विना" अश्विनौ च "मदेन" "साकं" सह "गच्छति" प्राप्नोति ॥ ७ ॥

अथाष्टमी।

२ ३ १र २र३ १ ३ १ २ ३ १ २
आमित्रेवरुणेभगेमधोःपवन्तऊर्मयः§।

३ १ २ ३ १ २
विदानाअस्यशक्मभिः ॥ ८ ॥ ॥

---

* "धर्मभिः"—इति ऋ०-पाठः।

† ऋ० वे० ६, ७, २९।

‡ धर्मभिरिति ऋग्वेदीयपाठमवलम्ब्यैवेदं प्रतीक-ग्रहणं व्याख्यानञ्च; विवरण-ब्राह्मणाख्यानन्तु सामवेदीयम् तथाहि—"धर्मणा कर्मणा"—इति।

¶ "रणाः" दीर्घान्तश्रुतिः "ह्वाचीऽतस्त्रिकः (६, ३, १३५)"—इति तत्र दीर्घः।

§ "मित्रावरुणाभगंमध्वः"—इति ऋ०-पाठः।

॥ ऋ० वे० ६, ७, २९।

येषां यजमानानां "मधोः" सोमस्य "जर्भयः" तरङ्गाः "मित्रावरुणा"* मित्रावरुणौ देवौ "भगं"† भगाख्यं देवञ्च प्रति "पवन्ते" चरन्ति, ते यजमानाः "अस्य" सोमस्य इदं सोमं "विदानाः" जानन्तः "शक्मभिः" सुखैः‡ सङ्गच्छन्तइति शेषः॥ ८॥

अथ नवमी।

३ १ २ ३ २३ ३ १ १ २ १ १
अस्मभ्यꣳरोदसीरयिम्मध्वोवाजस्यसातये।

२ ३ १ १ २ ३ १ २
अवोवसूनिसञ्जितम्॥ ९॥

हे "रोदसी" द्यावापृथिव्यौ! युवां "मधः" देवानां मादयितुः "वाजस्य" सोमात्मकस्यान्नस्य "सातये" लाभाय§ "अस्मभ्यं" "रयिं" धनं "अवः" अन्नञ्च‖ "वसूनि" वासकान्यन्यान्यपि पशवादीनि "सञ्जितं" सञ्जयन्तं** प्रयच्छतमित्यर्थः॥ ९॥

---

*, † ऋग्वेदीयपाठानुसारेणेदं प्रतीकयजनम्। विवरणकृता तु सुष्ठूच्यते—'मित्रे, वरुणे, भगे-सप्तम्यर्थवचनं चतुर्थ्यर्थवचनस्य स्थाने द्रष्टव्यम्, मित्राय, वरुणाय, भगाय'—इति।

‡ 'शक्मभिः—शक्तैः कर्मभिः'—इति वि०।

¶ ऋ० वे० ६, ७, १९।

§ 'सातये—दानार्थम्'—इति वि०।

‖ अवः—अन्नं यशो बलं वा'—इति वि०।

** 'संजितं—सम्यक् यतम्'—इति वि०।

अथ दशमी।

२ ३१२ ३ १३१२३१२
आतेदक्षमयोभुवंवन्हिमद्यावृणीमहे।

२ ३१२३ १२
पान्तमापुरुस्पृहम्॥ १०*॥

हे सोम! यष्टारो वयं "ते" तव स्वभूतं "दक्षं" बलम् "अद्य"† अस्मिन् यागदिने "आ" आभिमुख्येन "वृणीमहे" सम्भजामहे। कीदृशम्? "मयोभुवं" सुखस्य भावकम् "वन्हिं" धनादीनां प्रापकम् "पान्तं" शत्रुभ्यो रक्षकम् "पुरुस्पृहं" बहुभिः स्पृहणीयं कामानाम्॥ १०॥

अथैकादशी।

२ ३ १२ २२३२३ ३१२३१२
आमन्द्रमावरेण्यमाविप्रमामनीषिणम्।

२ ३ १२३१२
पान्तमापुरुस्पृहम्॥ ११‡॥

हे सोम! "मन्द्रं" मदकरं स्तुत्यं वा त्वाम् "आ वृणीमहे" "वरेण्यं" सर्ववरणीयं सम्भजनीयञ्च; किञ्च "विप्रं" मेधाविनं त्वां तथा "मनीषिणं" मनसईषा मनीषा तद्वन्तं स्तुतिमन्तं वा त्वामावृणीमहे [प्रत्येकं विशेषणापेक्षया. आ-इत्युपसर्गः

* ऋ० भा० ६, १, २, २ (२ भा० ५६ पृ०)=ऋ० वे० ७, २, ६, ३।

† मूले तु "निपातस्य च (६, ३, १३६)"—इति दीर्घान्तः "अद्या"—इति।

‡ ऋ० वे० ७, २, ६, ४।

कृतः*; किञ्च "पान्तं" सर्वेषां रक्षकम् "पुरुस्पृहं" बहुभिः स्पृहणीयं च त्वां सम्भजामहे ॥ ११ ॥

अथ द्वादशी।

२ ३१र १२३ र ३ १ २ ३२

आरयिमासुचेतुनमासुक्रतोतनूष्वा।

२ १ १ २ ३ १ २

पान्तमापुरुस्पृहम् ॥ १२ † ॥ २

हे "सुक्रतो" शोभन-प्रज्ञ सोम! त्वदीयं "रयिं" धनम् वयम् "आ"‡ वृणीमहे। किञ्च, "सु चेतुनम्" [चिती सञ्ज्ञाने (भ्वा० प०) भावे औणादिक उन प्रत्ययः] सुज्ञानञ्च। किञ्च "तनूषु" अस्मत्पुत्रेषु च धनं सुज्ञानञ्च त्वम् "आ" विधेहि यद्वा पुत्रार्थं वयमावृणीमहे। तथा "पान्तं" सर्वस्य रक्षकं "पुरुस्पृहं" बहुभिर्यष्टृभिः काम्यमानं त्वां सम्भजामह ॥ १२ ॥ २

इति सामवेदार्थ-प्रकाशे उत्तरार्चग्रन्थस्य अष्टमस्याध्यायस्य द्वितीयः खण्डः ¶ ॥ २ ॥

---

* विवरणकारस्त्वन्यथैव व्याचष्टे—'आमन्द्रम्—आनुपूर्व्येण मन्द्रं बलम्'—इति, 'आवरेण्यम्—आभिमुख्येन वरेण्यं तत्'—इति, 'आवप्रम—अतिशयेन विपश्चितम्'—इत्यादि च।

† ऋ० वे० ७, २, ६, ५।

‡ त्वाष्ट्यन्यथा व्याख्यानं विवरणकृता—'आरयिम्—आभिमुख्येन धनवन्तम्'—इत्यादि।

¶ 'उक्तं बर्हिष्यवमानम्'—इति वि०।

अथ तृतीय-खण्डे,*प्रथम-ऋचे—

प्रथमा।

३१ २ ३ १ २३१ २ ३ १
मूर्द्धानन्दिवोअरतिम्पृथिव्या
२ ३२३२उ १ २१२
वैश्वानरमृतआजातमग्निम्।
३ १ ३ २ ३१२ ३१ २
कविꣳसम्राजमतिथिञ्जनाना
३ १३ १ २ ३२
मासन्नःपात्रञ्जनयन्तदेवाः॥ १ †॥

"मूर्द्धानं" शिरोभूतं, कस्य ? "दिवः" द्युलोकस्य, "पृथिव्याः" प्रथितायाः भूमेः "अरतिं" गन्तारम् [यद्वा, गन्तव्यं स्वामिनं], "वैश्वानरं विश्वेषां नराणां सम्बन्धिनम्, "ऋते" [ऋतमिति सत्यस्य यज्ञस्य वा नाम (निघ० ३,१०,६)। निमित्त-सप्तम्येषा (२,३,३६ वा०)] ऋतनिमित्तम् "आ" आभिमुख्येन जातं सृष्ट्वा-दावुत्पन्नं "कविं" क्रान्तदर्शिनं "सम्राजं" सम्यग्राजमानं "जनानां" यजमानानाम् "अतिथिं" हविर्वहनाय सततं गन्तारं [यद्वा, अतिथिवत् पूज्यम् "आसन्" आसनि [द्वितीयार्थे सप्तमी (३,१,८५), अग्नि-लक्षणेनास्येन हि देवा हवींषि भुञ्जते] "नः" अस्माकं "पात्रं" पातारं रक्षकं वैश्वानरमग्निं

* 'इदानीमाज्यानि'—इति वि०।

† ऋ० आ० १, २, २, ५ (१ भा० २०४ पृ०) = य० वे० ७, २४ = ऋ० वे० ४, ५, ९, १।

"देवाः" स्तोतारः ऋत्विजः देवा एव वा "आ जनयन्त" यज्ञाभिमुख्ये न अजीजनन् अरण्योः सकाशात् उदपादयन्॥

"आसन्नःपात्रम्"-"आसन्नापात्रम्"—इति पाठौ॥ १॥

अथ द्वितीया।

१र २र ३ १ ९ ३
त्वांविश्वेअमृतजायमानꣳ
९ ९ २ ३ २ ३ १र २र
शिशुंन्नदेवाअभिसन्नवन्ते।
२३१५ ९ १ १ ३
तवक्रतुभिरमृतत्वमायन्
१र २ ३ २ ३ १र २र
वैश्वानरयत्पित्र्योतदीदे॥ २ *॥

हे "अमृत" मरण-रहिताग्ने! "विश्वे देवाः" स्तोतारः "जायमानम्" अरण्योः सकाशात् उत्पद्यमानं त्वां "शिशुं न" पुत्रमिव "अभि सं नवन्ते" अभिसंस्तुवन्ति [यद्वा, दीव्यन्तीति देवा रश्मयः ते सर्वे जायमानं त्वामभिसन्नवन्ते अभिगच्छन्ति, यथा पितरः पुत्रमभि गच्छन्ति], अपि च हे वैश्वानर अग्ने! "यद्" यदा "पित्र्योः" पालयित्र्योः द्यावा-पृथिव्योर्मध्ये "अदीदेः" दीप्यसे, तदानीं "तव" त्वदीयैः "क्रतुभिः" कर्मभिः ज्योतिष्टोमादिभिर्यागैः "अमृतत्वम्" देवत्वम् "आयन्" यजमानाः प्राप्नुवन्ति॥ २॥

---

* ऋ० वे० ४, ५, ९, ४।

अथ तृतीया।

१ २ ३ २ ३ १ २ ३ २
नाभिंयज्ञानाꣳसदनꣳरयीणां
३ १ २ ३ २ ३ १ २ २
महामाहावमभिसन्नवन्त।
३ २ क १ २ ३ १ २
वैश्वानरꣳरथ्यमध्वराणां
३ १ २ ३ १ २ ३ २
यज्ञस्यकेतुञ्जनयन्तदेवाः॥ ३ *॥ ३

"नाभिं यज्ञानां"†, "सदनं रयीणां" धनानां स्थानमेकनिलयं, "महां" महान्तम् "आहावम" आह्वयन्ते अस्मिन्नाहुतय इत्याहावः तादृशं [यद्वा, वृष्ट्युदक-धाराणामाहाव-स्थानीय मेवभूतम्] अग्निम् "अभि सं नवन्त" स्तोतारः सम्यक् स्तुवन्ति। तथा "वैश्वानरं" विश्वेषां नराणां सम्बन्धिनम् अध्वराणां यज्ञानां "रथ्यं" रथिनं, यथा रथी स्व-रथं नयति तद्वन्नेतारं रंहितारं गमयितारं‡ "यज्ञस्य" "केतुं" प्रज्ञापकम्¶ एवंविधमग्निं "देवाः" स्तोतार ऋत्विजो देवा एव वा§ "जनयन्त" जनयन्ति मन्थनेनोत्पादयन्ति॥ ३॥ ३

* ऋ० वे० ४, ५, ९, २।
† 'नाभिं यज्ञानां—प्रधानभूतं सदनम्'—इति वि०।
‡ 'रथ्यं—रथभूतं रंहणीयं वा'—इति वि०।
¶ 'केतुं—ध्वजम्'—इति वि०।
§ 'देवाः—दानवन्त ऋत्विजः'—इति वि०।

अथ द्वितीय-ऋचे—

प्रथमा।

१२ ३१२ ३१२ ३२ ११
प्रवोमित्रायगायतवरुणायविपागिरा।
१२ १२३२
महित्तत्रावृतम्बृहत्॥ १ *॥

हे मदीया ऋत्विजः! "वः" यूयमित्यर्थः। "मित्राय" "वरुणाय" "विपा" व्याप्तया "गिरा" स्तुत्या "गायत" स्तुतिं कुरुत [स्तुत्या स्तुतेत्येतत् पाकं पचतीतिवत्]। हे "महित्तत्रौ" प्रभूत-बलौ युवाम् "ऋत" यज्ञं† "बृहत्" महत् अपि प्रशस्तं स्तुत्यर्थमागच्छतमिति शेषः [अथवा "महत्" प्रभूतम् "ऋत" स्तोत्रं शृणुतमिति शेषः॥ १॥

अथ द्वितीया।

३२ १२ ३१२ ३२ ३१२ २१
सम्राजायाघृतयोनीमित्रश्चोभावरुणश्च।
३२३१२ ३२
देवादेवेषुप्रशस्ता॥ २ ‡॥

"या" यौ "मित्रश्च" "वरुणश्च" [परस्परापेक्षया च-शब्दः] "उभा" उभौ "सम्राजा" सम्राजौ सर्वस्य स्वामिनौ "घृतयोनी"

---

* ऋ० वे० ४, ४, ६, १।

† 'ऋत सत्यम्'—इति वि०।

‡ ऋ० वे० ४, ४, ६, २।

उदकस्योत्पादको "देवा" द्योतमानौ "देवेषु" मध्ये "प्रशस्ता" प्रकर्षेण स्तुत्यौ तौ स्तुत्या गायतेति पूर्वत्रान्वयः ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २ ३ २ ३ २ ३ १ २
तानःशक्तम्पार्थिवस्यमहोरायोदिव्यस्य।

१ २ ३ २ ३ १ २
महिवाङ्नश्चन्देवेषु ॥ ३ * ॥ ४

"ता" तौ देवौ "नः" अस्मदर्थं "पार्थिवस्य" पृथिवी-सम्बन्धस्य "दिव्यस्य" दिविभवस्य च "महः" महतः "रायः" धनस्य "शक्तं" समर्थम्, भवतं दातुमिति शेषः। हे देवौ! "वां" युवयोः "महि" महत् पूज्यं "नश्च" बलं देवेषु प्रसिद्धं, स्तुम इति शेषः ॥ ३ ॥ ४

अथ तृतीय-तृचे—

प्रथमा ॥

१२ २२ ३ २ ३ २ ३ १ २
इन्द्रायाहिचित्रभानोसुताइमेत्वायवः।

१ २ ३ १ २ ३ १ २
अण्वीभिस्तनापूतासः ॥ १ † ॥

"चित्रभानो" हे विचित्र-दीप्ते "इन्द्र" अस्मिन् कर्म्मणि "आयाहि" आगच्छ। "सुताः" अभिषुताः "इमे" सोमाः

* अथैव पुनः ६, ३, ११, १=ऋ० वे० ४, ४, ६, २।
† य० वे० २१, ३=ऋ० वे० १, १, ५, ४।

"त्वायवः" त्वां कामयमाना वर्त्तन्ते । "अग्नेभिः"* [अङ्गुलिनामैतत् (निघ० २, ५, २)] ऋत्विजा मङ्गुलिभिः सुता इत्यन्वयः । किञ्च, ते सोमाः "तना" नित्यं "पूतासः" शुद्धाः ऊर्णा-पवित्रेण शोधितत्वात् ॥ १ ॥

अथ द्वितीया ।

१र २र ३ २ ३ १र २र ३ १ २
इन्द्रायाहिधियेषितोविप्रजूतःसुतावतः ।
२ ३ १ २ ३ १ २
उपब्रह्माणिवाघतः ॥ २ † ॥

हे "इन्द्र!" त्वम् "आयाहि" अस्मिन् कर्मणि आगच्छ । किमर्थम्? "वाघतः" [ऋत्विङ्नामैतत् (निघ० ३, १८, ३)] ऋत्विजः "ब्रह्माणि" वेद-रूपाणि स्तोत्राणि "उप" एतम् । कीदृशस्त्वम्? "धिया" अस्मदीयया प्रज्ञया "इषितः" प्राप्तः, अस्मद्भक्त्या प्रेरित इत्यर्थः । "विप्रजूतः" यथा यजमान-भक्त्या प्रेरितः तथान्यैरपि विप्रैः मेधाविभिः ऋत्विग्भिः प्रेरितः! कीदृशस्य? "वाघतः?" "सुतावतः" अभिषुत-सोम युक्तस्य ॥२॥

अथ तृतीया ।

१र २र ३ १ १ ३ २ ३ १ २
इन्द्रायाहितूतुजानउपब्रह्माणिहरिवः ।
३ १ २ ३ १ २
सुतेदधिष्वनश्चनः ॥ ३ ‡ ॥ ५

---

* 'अग्नेभिः—सूक्ष्माभिः वीथिभिः'—इति वि० ।

† ऋ० वे० १, १, ५, ५ ।

‡ ऋ० वे० १, १, ५, ६ ।

[हरि-शब्दः इन्द्र-सम्बन्धिनोरश्वयोर्नामधेयम् "हरी इन्द्रस्य, लोहितोऽग्नेः (नि०१,१५,१-२)"—इति तदीयाश्व-नामत्वेन पठितत्वात्] हे "हरिवः" अश्व-युक्तेन्द्र ! त्वं "ब्रह्माणि" आनेतुम् "आ याहि" । कीदृशस्त्वम् ? "तूतुजानः" त्वरमाणः । आगत्य च अस्मिन् "सुते" सोमाभिषव-युक्ते कर्म्मणि "नः" अस्मदीयं "वनः" [अन्न-नामैतत् (निरु० नै०६,१६)] हविर्लक्षणमन्नं "दधिष्व" धारय स्वीकुर्व्वन्नित्यर्थः ॥ २ ॥ ५

अथ चतुर्थ-ऋचे—

प्रथमा ।

१२ ३१ ३ २ ३ २ ३ १ २ ३ १२
तमीड्ष्वयोअर्चिषावनाविश्वापरिष्वजत् ।

३ १ ३ १ २ ३ १२
कृष्णाकृणोतिजिह्वया ॥ १ * ॥

हे स्तोतः ! "तम्" अग्निम् "ईड्ष्व" स्तुहि, "यः" अग्निः "अर्चिषा" ज्वाला-रूपेण तेजसा "विश्वा" सर्व्वाणि "वना" वनान्यरण्यानि "परिष्वजत्" परिष्वजति परितो वेष्टयति, यश्च तानि वनानि "जिह्वया" ज्वालया दग्ध्वा "कृष्णा" कृष्णवर्णानि "कृणोति", तमीड्ष्वेति सम्बन्धः ॥ १ ॥

---

* ऋ० वे० ४, ८, २८, ५ ।

अथ द्वितीया।

२ २ २ ३ १ २ २ १ २ ३ १ १
यद्ङ्गआविवासतिसुम्नमिन्द्रस्यमर्त्यः।

३ १ २ ३ १ २ ३ २
द्युम्नायसुतराऽपः ॥ २ * ॥

"यः" "मर्त्यः" मनुष्यः "इङ्गे" दीप्ते अग्नौ "सुम्नं" सुखकरं हविः "इन्द्रस्य" [चतुर्थ्यर्थे षष्ठी (२, ३, ६२)] इन्द्राय "आविवासति" परिचरति प्रयच्छति, तस्य मर्त्तस्य "सुम्नाय" द्योतमानायान्नाय तदर्थं "सुतराः" सुखेन तरणीयाः "अपः" उदकानि हव्यात्मकानि, इन्द्रः करोतिति शेषः ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
तानोवाजवतीरिषआशून्पिपृतमर्वतः।

१ २ ३ २ ३ १ २
एन्द्रमग्निञ्चवोढवे ॥ ३ † ॥ ६

हे इन्द्राग्नी! "ता" तौ युवां "वाजवतीः" अन्नवतीः "इषः" इष्यमाणा "इष्टीः" [यद्वा, वाजो बलं तद्वतीः इषः अन्नानि] "आशून्" शीघ्रगान् "अर्वतः" अश्वांश्च "नः" अस्मभ्यं "पिपृतम्

---

* ऋ० वे० ४, ८, २९, १।

† ऋ० वे० ४, ८, २९, २।

पूरयतम् प्रयच्छतम् । किमर्थम् ? "इन्द्रम्" "अग्निञ्च" "आ वोढवे" आ समन्तात् वोढुं हविर्भिः प्रापयन्तु ॥ ३ ॥६

इति सामवेदार्चप्रकाशे उत्तरार्चस्य अष्टमस्याध्यायस्य तृतीयः खण्डः * ॥ ३ ॥

अथ चतुर्थ-खण्डे,† प्रथम-ऋचे—

प्रथमा ।

१ १ ७ २ ३ १ २ १ १३
प्रो॒ऽयासी॒दिन्दु॒रिन्द्र॑स्य॒ निष्कृ॑तꣳ
३ २ ३ २र २र ३ १ १
सखा॑ सख्यु॒र्न प्रमि॑नाति सङ्गि॒रम् ।
१२ ३ २ १ १२ ३
मर्य॑ इव युव॒तिभिः॒ समर्षति
१ २ ३१ २ ३ १ १ ३ २
सोमः॑ कल॒शे श॒तया॑मना॒ पथा॑ ॥ १ ॥

"इन्दुः" सोमः "इन्द्रस्य" "निष्कृतं" संस्कृतं स्थानसुदरं "प्रो अयासीत्" प्रैव गच्छति ; गत्वा च "सखा" सखिभूतः "सख्युः"

---

* 'उक्तं प्रातःसवनं चतुर्विंशस्तोमिकम्'—इति वि० ।

† 'इदानीं माध्यन्दिनं सवनम् । इषाच्च इषारथेति सप्तानि-प्रभृतीनि सामानि ब्राह्मणोक्तार्थानि, पुनानः सोमधा येति कण्व-रथन्त-भृतीनि सामानि वार्हस्पत्यानि'—इति वि० ।

‡ ऋ० सा० ६, २, १, ४ (२भा० १७२पृ०) = ऋ० व० ७, ३, ११, १ ।

*इन्द्रस्य "सक्थिरं" सम्यग् गिरणाधारभूतम् उदरं "न" "प्र मिनाति" हिनस्ति, किञ्च "मर्य इव युवतिभिः" मर्त्यो यथा तरुणीभिः स्त्रीभिः सह सङ्गतो भवति तद्वदयमपि सोमो युवतिभिर्मिश्रण-ग्रीलादिभिर्वसतीवरीभिरद्भिः सह "समर्षते" सङ्गच्छते अभिषव-काल-पश्चात् सोमः "शतयामना" अनेक-यामन-साधन-वित्तोपेतेन "पथा" मार्गेण दशापवित्र-सम्बन्धिना "कलशे" द्रोणकलशे गच्छतीति शेषः यद्वैकमेव वाक्यम्—यथा मर्यो मर्त्यो युवतिभिः सह सङ्गच्छते एवं कलशे शत-यामना पथा सङ्गच्छते॥

"शतयामना"—"शतयाम्ना"—इति पाठो॥ १॥

अथ द्वितीया।

२३ १२ २१२ २१२
प्रबोधियोमन्द्रयुवोविपन्युवः
२१२२१२
मनस्युवःसंवरणेष्वक्रमुः।
२३१ १३ क१२ २२३
चरिद्क्रीडन्तमभ्यनूषतस्तुभो
२ ३१३ २३१२
भिधेनवःपयसेदशिश्रयुः॥ २ *॥

हे सोमाः "वः" युष्माकं "धियः" ध्यातारः† "मन्द्रयुवः" मदकरं शब्दं कामयमानाः "मनस्युवः" स्तुतिं कामयमानाः

* ऋ० वे० ७, ३, १४, २।

† 'धियः—वृद्धयः'—इति वि०।

"विपन्यवः" [—स्तोतृ-नामैतत्*) स्तोतारः "संवरेषु" तृण-कटा-वरणोपेतेषु याग-गृहेषु "प्राक्रमुः" प्रक्रमन्ते। तदेवाह— "स्तुभः" स्तोतारः† "हरिं" हरितवर्णं "क्रीड़न्तं" क्रीड़न-शीलं सोमम् "अभ्यनूषत" अभिष्टुवन्ति "धेनवः" अपि "पयसा" स्वीयेन क्षीरेणैव "इत्" इमं सोमम् अभिलक्ष्य "अशिश्रयुः" अधिकं श्रीणन्ति॥

"संवरणेषु"-"संवसनेषु"—इति पाठो, "हरिक्रीड़न्तं" -"सोमम्मनीषां"—इति च, "पयसेदमिश्रयुः"-"पयसेममिश्रयुः" —इति च॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ २ ३ २ ३
आनःसोमसंयतम्पिप्युषीमिष
१ ३ १ २ ३ १ २ १ १ २
मिन्दोपवस्वपवमानऊर्मिणा।
२ ३ १ २ ३ २ ३ १ १ २
यानोदोहतेचिरक्षन्नसश्चुषी
३ १ २ १ २ ३ १ २ ३ १ २
क्षुमद्वाजवन्मधुमत्सुवीर्यं म॥ ३ ॥ ७

---

* "विपन्यवः"—इति निघण्टौ मेधावि-नामसु सप्तदशं पदम् (३, १५)।

† 'स्तुभः—स्तोभवत्यः'—इतिवि०।

‡ ऋ० वे० ७, ३, १५, ३।

हे "इन्दो" दीप्त ! "सोम !" "पवमानः" त्वं "नः" अस्माकं "संयतं" सङ्गृहीतं "पिप्युषीं" प्रहृष्टम्* "इषम्" अन्नम् "ऊर्मिणा" प्रवाह-रूपेण तदौयेन रसेन "पवस्व" प्रयच्छेत्यर्थः । "या" इट् "नः" अस्माकम् "अहन्" अहनि अङ्गः "त्रिः" त्रिषु सवनेषु "असश्चुषी" अप्रतिबन्धा† "दोहते" । किम् ? "क्षुमत्" शब्दोपेतं सर्व्वत्र श्रूयमाणं "वाजवत्" बलवत् "मधुमत् माधुर्य्योपेतं "सुवीर्य्यं" शोभन-सामर्थ्यं पुत्रं दोहते । ता मिषं पवस्वेति समन्वयः ॥

"ऊर्मिणा"-"अभ्रियम्"—इति पाठो ॥ ३ ॥ ७

॥ प्रवङ्गार्गवम् ॥ प्रो॒३॒॒॑ऽया॒सा॒यि॒त्। इ॒न्दु॒रि॒न्द्रा॒। स्या ३ नि॒ष्कृ॒ता॒म्। सखा॒ सख्यूः। न॒प्रमि॒ना। ता ३ यि॒स ङ्गि॒रा॒म्। म॒र्य्य॒ इ॒वा। यु॒व॒ति॒भा॒यिः। सा ३ म॒र्ष॒ता॒यि। सोमः॒ क॒ला। शे॒श॒त॒या। मा ३ ना॒प॒था॒३॑उ ॥(१) प्रवो धि॒यो। म॒न्द्र॒यु॒वो। वा ३ यि॒प॒न्यु॒वाः। प॒न॒स्यु॒वाः। संव॒र॒णा॒यि। पू ३ व॒॒॑क्मूः। च॒रि॒ङ्क्रो॒डा। त॒म॒भ्य॒नू। षा

---

* 'पिप्युषीं'—प्रापेच्छाम्'—इति वि० ।

† 'असश्चुषी—अनुपूर्व्वेण'—इति वि० ।

१ २ १र २ १ १
२तस्तुभाः। अभिधेना। वःपयसायित्। आ२ग्निश्च
२ १ २र १र २ १ १र
यू३राउ ॥(२) आनःसोमा। संयतम्यायि। प्यू२षीमि
२ र १ २ १ १र २र र
षाम्। इन्दोपवा। स्वपवमा। नार्२ऊर्म्मिणा। यानो
१र २र १ १ २ १र
दोहा। नेत्रिरच्छान्। आ२सश्चषायि। त्तुमद्राजाः।
२ १ १र २ १ १ १ १
वन्मधुमात्। सू२वीरियाऽमाउ। वा२३४५ू३) ॥७*॥ [१]
१ र र २
॥ कावम् ॥ प्रवो। अयामीदिन्दुरिन्द्रा। स्वनि
१ १र २ १
ष्कार्त्ता२रम्। सखासख्युर्नप्रमिना। तिमङ्गायिरा२रम्।
१ २ १ १२ ४ ५
मर्यइवयुवतिभायिः। समर्षाता२३यि। सोमाः३कालाः।
२र १ १ २ ४ २१
ग्रेग्रताया२३। माना३पा५थाई५६ ॥(१) प्रवोवा। धि
र २ १ १ २
योमन्द्रयुवो। विपन्यूवा२ः। पनस्युवःसंवरणायि। षु
१ १ र २ १ १
वक्रामू२ः। हरिक्रीडन्तमभ्यनू। षतस्थभा२३ः। आ
२ ४५ २ १ १ २ ४
भी३धेना। वःपयासा२३यित्। आशा३यिश्चा५यू६

२१ २ १ २ २ १
५६॥(२) आनोवा। सोमसंयतम्यायि। पुषीमायि

१ २ २ १ १२ २
षा२म्। इन्दोपवस्वपवमा। नऊर्म्मायिणा२। यानो

२ २ २ १ १२ ४५ १
दोहतेचिरहान्। असश्पा२३यि। त्तूमाश्द्वाजा। व

१ १२ ४
न्धूमा२३त्। सूवाश्यिरापृयाथ५६म(३)॥ १० *॥ [२]

१२ २ ३२ ५२ १
॥ लौशाद्यम्॥ प्रोअयासीत्। इन्दुरिन्द्रा २ ३।

४ २ १५ ३२२ ३ ५ १ ४ २
स्याश्निष्कृतम्। सखासख्युः। नग्रामिना२३। तीश्स

३ ५ ३ २ ३ ४ १ ४ २ ३ ५
ङ्गिरम्। मर्य्यइव। युवतिभा२३यिः। साश्मर्षति।

३२ २ २ ५ १२ २ ४
सोमःकला। प्रेणतया २ ३। मनाश्पापृथाई५६॥(१)

३ १२ ३ ५ १ ४ २ ३ ५ ३ १ ३ ५
प्रबोधियः। मद्रयवो२३। वाश्यिपन्युवः। पनस्युवः।

१ ४ २ २ ५ ३ २ ७२ ५ १
सवरणा२३यि। पूश्वक्रमुः। हरिक्रीड। तमभ्यनू२३।

४ २ ३ ५ ७ २ ३२ ५ १ २
षाश्तस्तुभः। ऋभिधेना। वःपयसा२३यित्। अशा

५ ७२ २ ३२ ५ १
३यिआपृयू६५६ः॥(२) आनःसोम। संयतपा २ ३ यि।

---

* ऋ० मं० ६ अ० २ अ० १० सू० ७।

४ २र ३५ ३१र ३५ १ ४ २र ३
प्यूश्षीमिषम्। इन्दोपव। स्वपवमा २ ३। नाऽऊर्मि

५र ३र २र ३र ५ १र ४ र ३५र ३ १
णा। यानोदोच। तेत्रिरहा२३न्। आ३सश्चषी। त्नम

३र ५ १ २ ४
द्वाजा। वन्मधुमा २ ३ त्। सुवा ३ यिरा ५ या ६ ५

६ म् (३) ॥ ११ * ॥ [३]

॥ यज्ञसारथिम् ॥ ३र २ ३ ५ २ ३ प्रोआया२३४मीत्। इन्दूरा२३

४यिन्द्रा। स्यानिष्कृताऽम्। होयि। सखासा२३४

५ १ १ १ २ १ ३ २ ३
ख्यः। नप्रामी२३४ना। तायिमङ्गिराऽम्। होयि।

३ २ ३ ५ २ ३ ५ १ २ १ २
मर्य्याई२३४वा। युवाती२३४भायिः। सामर्षताऽयि।

१ ३र १ ३ ५ २र १ ५ १ २र
होयि। सोमाःका२३४ला। प्रेशाना२३४या। माना

१ २ १ ३ १ ३ ५ २ ३
पथाऽ। होऽ२३४५ई ॥(१) प्रवोधी२३४यो। मन्द्रायू२

४ ५ १ १ १ २ १ ३ २ ३ ५
३४वो। वायिपन्युवाः। होयि। पनास्यू२३४वाः।

२ ३ ५ १ २ १ २ १ ३ २ ३
संवारा२३४णायि। षूवक्रमूः। होयि। क्षरायिङ्का

* ऋ० मा० ७प्र० २अ० ११सा०।

५ २ ३ ५ १ २ १ २ १
२३४यिडा। तमाभ्या२३४नू। षातस्तुभाइः। ह्वोयि।
३ २ ३ ५ २ ३ ५ १ २ १ २
अभायिधे२३४ना। वःपाया२३४सायित्। आग्निश्रयूइः।
१ ३ २ २ ३ ५ २ ३ ५
ह्वो२३४५ई ॥(२) आनाःसो२३४मा। संयाता२३४म्यो।
१ २ १ २ १ २ ३ ५ २ ३
प्यूषोमिषाइम्। होयि। इन्दोपा२३४वा। स्वपावा२३
५ १ २ १ २ १ ३ २ ३ ५
४मा। नाऊर्म्मिणाइ। ह्वोयि। यानोदो२३४ह्वा।
२ ५ १ २ १ २ १ ३ २ ३
तेचोरा२३४ह्वान्। आमश्वषाइयि। होयि। ह्नुमाद्वा
५ २ ३ ५ ५ १ २ १ २ १
२३४जा। वन्माधू२३४मात्। सुवीरियाइम्। हो२३
४५ई। डा(३) ॥ ५ ॥ [४]

२ २ १ २ १
॥ वाराहम्† ॥ ह्वाउह्वाउ। ऊप्। प्रोश्रयासायित्।
१ १ २ ३ ४ ५ २ १ २ २ १
इन्दुरि। द्रप्सनिष्कृताम्। सखासख्यूः। नप्रमि।
२ २ ३ ४ ५ २ १ २ १ २ ३ ४ ५
नातिसङ्गिराम्। मर्य्यइवा। युवति। भिःसमर्षता
२ २ १ २ २ १ २ २ ३ २ ४
यि। सोमःकला। शेशत। या। मनाइपा५था ६ ५

---

* ऊ० गा० १०प्र० १ ख० ५ मा०।

† "जगतीवारात्रम्"—इति ख० पु०-पाठः।

२१२ २१ २२३४ ५ २१
६॥(१) प्रबोधियो। मन्द्रयु। वोविपन्युवाः। पनस्यु
२१ २२३४५ २१२ २१
वाः। संवर। णंषुवक्रमूः। हरिक्रीडा। तमभ्य।
२२३४ ५ २१२ २१ २२ ७२
नूषतस्तुभाः। अभिधेना। वःपय। सेत्। अशाइयि
४ २२१२ २१ २३४२
आपृयू६५६ः॥(२) आनःसोमा। संयतम्। पिप्युषी
५ २१२ २१ २२३४२ ५ २२
मिषाम्। इन्दोपवा। स्वपव। मानजमिणा। या
१२२ २२१ २३४५ २२ २
नोदोहा। तेत्विर। त्वन्नसश्चयाय। हाउहाउ।
१ २१२ २१ २ ३२ ४
ऊप्। क्षुमद्वाजा। वन्मधु। मत्। सुवाइराप्यार्६५
६म्(३)॥ १५ *॥ [५]

॥ अपामीवम्॥ २२१ २२२ ४ २
प्रोआ। यासोदिन्दुरिन्द्राइस्याइनि
२५ २१ २ ४ २३५ २
ष्कृतम्। सखा। सख्यर्न्नप्रमिनाइतीइसङ्गिरम्। म
१ २ ४ २३५ २२१ २
र्य्याः। इवयुवतिभाइयिःमाइमर्षति। सोमाः। कल
२ ३२ ४ २१ २२
शेशतया। मनाइपापृथार्६५६॥(१) प्रवो। धियोमन्द्र

* ऊ० गा० १३प्र० १च० १५सा०।

४ १२५ २१ २ ४ २२५
युवोश्वाश्यिपन्युवः। पना। स्तुवःसंवरणाश्यिषूश्वक्रमुः।
११ २२ ४ १२५ ११ २२
धरायिम्। क्रीडन्तमभ्यनूश्षाश्तस्तुभः। अभायि। धे
२ १ २२ ४ २२ १ २२
नवःपयसेत्। अशाश्यिश्रायूयूषुः॥(२) आनाः। सो
४ २२ १५ २१ २
मसंयतम्याश्यिष्यूश्षी मिषम् इन्दो। पवस्वपवमाश्ना
२२ १ ५२ २२१ २२ २ ४ २१५
श्ऊर्म्मिणा। यानो। दोहते। त्रिरह्नाश्नाश्सश्चुषी।
२१ २२ २२ ४
त्तुमात्। वाजवन्मधुमत्। स्तुवाश यिरा यू या ई यू
ई म्(३)॥१८*॥[६] ७

अथ नकिरिति प्रगाथरूपे द्वितीयसूक्ते†—

प्रथमा।

२१२२ २२ २२३१ २३१२
नकिष्टङ्कर्मणानशद्यश्चकारसदावृधम्।
२३२३ २ ३१२३ १ २३१२ २१२ २२
इन्द्रन्नयज्ञैर्विश्वगूर्त्तंश्मश्वसमधृष्टन्धृष्णुमोजसा॥१ ॥‡

---

* ऋ० गा० २३५० २ अ० १८ सा०।

† 'उक्ती माध्यन्दिनः पवमानः। बृहत्पृष्ठं वामदेव्यं नैवावसं साम अभि निधनं काण्वं ब्रह्मसाम वैखानसमच्छावाकसाम'—इति वि०।

‡ ऋ० मा० १, १, १, १ (१मा० ५०२५०)=ऋ० वे० ६, ५, ८, ३।

"तं" जनम् अन्यो मर्षको जनः "कर्मणा" हननादि-व्यापारेण "नकिः नशत्" नैव व्याप्नोति, "यः" "इन्द्रं चकार" इन्द्रमेवानुकूलं यत्नैः साधनैश्चकार। कीदृश-मिन्द्रम्? "सदावृधं" सर्व्वदा वर्द्धकं, "विश्वगूर्त्तं" सर्व्वैस्तुल्यम्, "ऋभ्वसं" महान्तम् "ओजसा" स्वीयेन बलेन "अधृष्टं" शत्रुभिरनभिभूतम् "धृष्णुं" शत्रूणामभिभवनशीलम्॥

"धृष्णुमोजसा"—"धृष्णवोजसम्"—इति पाठौ॥ १॥

अथ द्वितीया।

१२ ३१२ २२ ३ १२ २२१ २३१२
अषाढमूग्रम्पृतनासुसासहिंयस्मिन्महीरुरुज्रयः।

२३२३ १ २ ३२ १ १२
सम्धेनवोजायमानेअनोनवुर्द्यावश्चामीरनोनवुः॥ २ *॥८

"अषाढम्" असोढम् "उग्रम्" उद्गूर्णबलं "पृतनासु" शत्रुसेनासु "सासहिम्" अभिभवितारमिन्द्रं† स्तौमीत्यर्थः, "यस्मिन्" इन्द्रे "जायमाने" "महीः" महिष्यः "उरुज्रयः" बहुवेगाः "धेनवः" हविरादिना प्रीणयित्र्यः अजा गाव एव वा‡ "समनोनवुः" समस्तुवन्। न केवलं धेनव एव अपि तु "द्यावः" द्युलोकाः "चामीः" पृथिव्यश्च¶ समनोनवुः, तत्स्थाः सर्व्वे

---

* ऋ० वे० ६, ५, ८, ४।

† 'सासहिं—साधन-स्वभावम्'—इति वि०।

‡ 'धेनवः—गावः, आपः आदित्यरश्मयो वा'—इति वि०।

¶ 'चामीः—द्युलोकात् क्षेपणसमर्थाः आदित्य-रश्मयः'—इति वि०।

प्राणिनो नमन्त इत्यर्थः "चित्रतो लोकाः"—इति श्रुतेः बहुवचनम्॥

"त्वामीः"—"त्वामः"—इति पाठौ॥ २॥ ८

॥ वैखानसम्॥ नकिष्टा३ङ्कर्मणानशात्। यश्चाकारा। सदावृधा२३म्। सदावृधाम्। इन्द्रान्नया। ज्यै र्विश्वग्। तमा२र्भवा२३म्। तमृम्वसाम्। अधार्ष्टन्धा। ष्णुमाजमा२३। ष्णुमोजमा३४३॥(१) अधृष्टा३ न्धृष्णुमोजसा। अधार्ष्टन्धा। ष्णुमोजसा२३। ष्णुमोजसा। अपाढमू। ग्रम्पृतना। सुसा२सहा२३यिम्। सुसासह्यीम्। यस्मायिन्मह्यायिः। उरुज्रया२३ः। उरुज्रया३४३ः॥(२) यस्मिन्मा३हीरुरुज्रयाः। यस्मायिन्महायिः। उरुजया२३ः। उरुज्रयाः। सन्धायिनवो। जायमाने। अनो२नवू२३ः। अनोनवूः। द्यावाक्षामा

२ ३र १ १ २ ३र २ १
यिः। आनोनवू२३ः। अनोनवू३४३ः। ओ२ ३ ४ ५ई।

डा(३) ॥ ९ * ॥ [१] ८

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य अष्टमस्याध्यायस्य चतुर्थः खण्डः † ॥ ४ ॥

अथ पञ्चम खण्डेः‡, प्रथम ऋचे—

प्रथमा।

१ २ १ १र २र ३ २ ३ १ २
सखायआनिषीदतपुनानायप्रगायत।

२ ३ २ ३ १र २र ३ २
शिशुन्नयज्ञैःपरिभूषतश्रिये ॥ १ ¶ ॥

हे "सखायः" सखीभूताः स्तोतार ऋत्विजः! "आ निषीदत" स्तोतुमुपविशत। अथ "पुनानाय" पूयमानाय सोमाय "प्रगायत" प्रकर्षेण गायत तमभिष्टुत। ततः अभिष्टुतं सोमं "यज्ञैः" यजमानीयैः हविर्भिर्मिश्रणैश्च "श्रिये" शोभार्थं "परि भूषत" परितोऽलङ्कुरुत। तत्र दृष्टान्तः—"शिशुं न" यथा शिशुं बालं पुत्रं पितर आभरणैरलङ्कुर्वन्ति तद्वत् ॥ १ ॥

---

* उ० गा० ४प्र० १च० ८सा०।

† 'उक्तानि ऽष्टानि'—इति वि०।

‡ 'इदानीमार्भवः पवमानः'—इति वि०।

¶ ऋ० आ० ६, २, ३, १ (२मा० २०६ऋ०) = ऋ० वे० ७, ५, ७, १।

अथ द्वितीया ।

१२ ३२उ ३ १ २ ३ १ १ २ १ २
समोवत्सन्नमातृभिःसृजतागयसाधनम् ।
३ २ १ १ ३ १र ३र
देवाव्यांऽइन्द्रमभिप्रद्विग्रवसम् ॥ २ * ॥

हे ऋत्विजः ! "गय-साधनं" गृहस्य साधनभूतम्† "ईम्" एनंः सोमं "मातृभिः" मातृभूताभिः वसतीवरीभिः "संसृजत" सम्मिश्रयत, कथमिव ? "वत्सन्न" यथा वत्सं मातृभिः गोभिः संयोजयन्ति तद्वत् । कीदृशम् ? "देवाव्यं" देवानां रक्षकं "मदं" मदन-हेतुं "द्विग्रवसं" द्विगुण-वेगम् अतिशयित-बलं वा यद्वा द्वयोर्लोकयोस्तत्र स्थिता देवमनुष्या इत्यर्थः, तेषां हविर्दान-प्रदानेन प्रवर्द्धयितारं तं सोमम् "अभि" सं सृजत ॥ २ ॥

अथ तृतीया ।

३१ २ ३१ २३ २ १ २ ३ १२
पुनानादृत्नसाधनंयथाग्नर्ह्वायवीतये ।
१२ ३ २ ३१‡ ३ १ २
यथामित्रायवरुणायशन्तमम् ॥ ३ ¶ ॥ ९

---

* ऋ० वे० ७, ५, ७, २ ।

† "गयः"—इति निघण्टौ गृहनामसाद्यं पदम् (३, ४) । विवरणग्रन्था लेवं व्याख्यानम्—'गयः प्राणाः, देवानां प्राण-साधनार्थं मित्रणं स संसृज'—इति ।

‡ "ईम्"—इति ऋग्वेदीय-पाठमवलम्ब्यैवं व्याख्या सामवेदीयपाठस्तु "ईं"—इति

¶ ऋ० वे० ७, ५, ७, ९ ।

"दत्तसाधनं" बलस्य साधनं* धनानां हन्त्रे वा साधकं सोमं "पुनाता" पवित्रेण पुनीत [पूञ् पवने (उ०) क्र्यादिः ; तस्माल्लोटि "तप्तनप्तनथनाश्च (७, १, ४५)"—इति तस्य तबादेशः, पित्त्वादीत्वाभावः "गर्त्ताय" वेगार्थं† "वीतये" देवानां पानार्थं यथा भवति तथा "मित्राय" "वरुणाय" च "शन्तमम्" अतिशयेन सुखं यथा भवति तथा पुनीतेत्यर्थः ॥

"शन्तमं" "शन्तमः"—इति पाठौ ॥ ३ ॥ ९

॥ प्रवम् ‡ ॥ ह्वा३। वो३ह्वा। वो३ह्वा३। ह्वा। ओ २३४वा। ह्वायि। साखाया२३४आ। नोषीदा२३४ता। पूनाना२३४या। प्रा२३४गा। या२३४ता। शायिप्रुन्ना २३४या। द्यौःपारा२३४यिभू। षा२३४त। आ२३४यायि॥(१) सामीवा२३४त्माम्। नामातृ२३३भायिः। साज्जाता२३ ४गा। या२३४सा। धा२३४नाम्। दायिवावा२३४ याम्। मादामा२३४भौ। द्वा२३४यिप्रा॥(२) वा२३४

* 'दत्तसाधनं—शीघ्र-कर्म-कर्त्तारम्'—इति वि०।

† 'गर्त्ताय—बलाय'—इति वि०।

‡ "प्लवः"—इति ख० पु० पाठः।

५ २ १ ५ २ १ ५ २
साम्। पूनाता२३४दा। ङासाधा२३४नाम्। याथा
१ ५ १ ५ १ ५ १ १
दा२३४र्ङा। या२३४वी। ता२३४यायि। यथामा२३४
५ २ १ ५ १ ५ १ ५
यित्रा। यावारू२३४णा। या२३४ग्न। ता२३४माम्।
२ १ १ १ १ ५ १
ङाऽ। वो३हा। वो३ङा३। हा। ओ२३४वा। ङा
५२ २ २ १ १ १२ १२ १ २ ११
३४। औङोवा। ए३। अतिविश्वानिदुरितातरेमा२३
११
४५(३) ॥ १२ * ॥ [१]

१ २ २ १ १२ १
॥ सुज्ञानम् ॥ सखायआ। निषीदता। पुनाना
२ १ १ १ २ १
या२। प्रगायता। अिषुन्नाया२। अैःप। रा२यि
१ ५२ २ १ २ १ २
भू२३४औङोवा। षतअियए३ ॥(२) समीवत्साम्। न
२ १ २ १ २ १ १२ २ १
मातृभायि। सुजतागा२। यसाधनाम्। देवावाया२
१ १ ५२ २ १ २ १
म्। मदम्। आ२भा२३४औङोवा। दिग्रवसमे३ ॥(१)
१२ २ २ १ १२ १ २ १
पुनातादा। ङासाधनाम्। यथाग्रार्ङा२। यवीतया

* अ० मा० ४प्र० १ख० ११सा०।

२ २ १ १ २ ५२ २ १
यि। यथामायित्रा२। यव। रू२णा२३४औह्वोवा। य

२ १ १११११
ज्ञन्तममे३उपा२३४५(३)॥ १८ * ॥ [२]

॥ दैवोदासम्॥ २१ २१ ५२
सखा३१। यज्ञा३१२३४। निषी।

२ २ २ १ २ २ ५२ २ २
दा३ता। पुना३१। नाया३१२३४। प्रगा। या३ता।

२ १ २ १ २ २ २ २ १
शिशू३१म्। नया३१२३४। ह्वैःप। रा३यिभू। षता

३१। श्रिया३। ओ२३४वा॥(१) समी३१। वत्सा३१२

५२ २ २ १ २ ५२
४म्। नमा। तृ३३भायिः। सजा३१२३४। यसा।

२ १ २२ २ १ ५ २
सा३नाम्। देवा३१। विया३१२३४म्। मदम्। आ

१ २ २ १ १ ५
३भायि। द्विग्रा ३ १। वसा३म्। ओ२३४वा॥(१)

२२ २२ २ ५२ २ २ २ १
पुना३१। तादा३१२३४। त्वसा। धा३नाम्। यथा

२१ २२ ५२ २ १ ३ २ २ १
३१ग्रर्वा३१२३४। यवी। ता३यायि। यथा३। मित्रा

● ऋ० गा० ७५० १५७ १८सा०।

५ २ २ २ २ १
३१२३४। यव। ह्व३णा। यज्ञा३१। तमा३म्। ओ
५ २ ५
२३४वा। ऊ२३४पा(३) ॥ १८ * ॥ [३]

२१२ २ ४ ५ २ ३ ५
॥ पौष्कलम् ॥ सखाया३आनि। षीदा२ ३ ४ता।
२१ २२ १ २, ० ५ २१ ७ २
पुनानाया। प्रागाया२३४ता। शिशून्नया। ज्ञैःपा२
३ २ १ १ १ १ १ २१२ २ ४ ५
रा२३४५यिभू६५६। षतश्रिये२३४५ ॥(१) समीवा३त्मन्न।
२ ३ ५ २ १ २२ १ २ ३ ५
मातृ२३४भायिः। स्व जातागा। यासाधा २ ३ ४नाम्।
२२ १ ७ ३ २ १ ३ १
देवाबियाम्। मदा२मा२३४५भा६५६यि। द्विश्रवसा२
१ १ १ २१२ २ ३ ५ २, ३ ५ २ १
३४५म् ॥(२) पुनाता३दत्त। साधा२३४नाम्। यथा
२ १ २, ३ ५ २ १ ७ ३
शर्दा। पावीता२३४याि। यथामित्रा। यवा२स्व२३
२ १ ३ १ १ १ १
४५णा६५६। यशन्तमा२३४५म्(३) ॥ १८ * ॥ [४]

५ २ ३२ ३ ५ २ १
॥ शौक्तम् ॥ सखा। यआओ२३४वा। निषायि।

---

* ऋ० मा० ७प्र० १च० १९सा०।

† ऋ० मा० ९प्र० १च० १८सा०।

२ १ ५ २ र १र ३ १ १ १ १ १
दाताओ२३४वा । पुनानायप्रगा२यता२३४५ । शायि

२ १ ५ १ र ३१ १ १ १ १ १ २ ३
यिष्ठाओ२३४वा । नयज्ञैःपरिभू२३४५ । षाताओ२३४

५ २ ५ र ३१ १ ५ २ १
वा । श्रिये१ ॥(१) समी । वत्साओ२३४वा । नमा ।

२ १ ५ २ १र २ १र ३ १ १ १ १ १ १
तृभाओ२३४वा । हजतागयसाधना२३४५म् । दाग्रिवा

३ ५ १ ३ २ २ १ ५
ओ२३४वा । वियम्मदमभा१यि । द्वायिष्ठाओ२३४वा ।

२ ५ र ३र २ ३ ५ १ १ २
वसा१म् ॥(२) पुना । तादाओ२३४वा । त्तमा । धाना ।

३ ५ १ २र १ र २ र १ ३ १ १ १ १ १ २ ३
ओ२३४वा । यथाशर्द्धायवीतया२३४५यि । याथाओ२३

५ २ १र २ १ १ १ १ १ १ १ २ ३ ५ २
४वा । मित्रायवरुणा२३४५ । याष्ठाओ२३४वा । तमा

१म्(३) ॥ १५ ॥ [५] ९

अथ प्रवाजीति तृचात्मकं द्वैपदं द्वितीयं सूक्तं—

तत्र प्रथमा ।

२ ३क २र ३ १ २ ३ २ ३ २ ३ २उ ३ १ २
प्रवाज्यन्ताःसहस्रधारस्तिरःपवित्रंविवारमव्यम् ॥ १ † ॥

---

* ऊ० गा० १४प्र० २ अ० १५मा० ।

† ऋ० वे० ७, ५, ०१,५ ।

"वाजी" बलवान् वेगवान् वा "सहस्रधारः" बहुधारायुक्तः सोमः "अव्यम्" अविभवं "वारं" वालं पवित्रं "तिरः" व्यवधायकं कुर्वन् "प्राचाः" विविधं प्रचरति [चरतेर्लुङि रूपम्]॥

"प्रवाजी"-"प्रसुवानः"—इति पाठो॥ १॥

अथ द्वितीया।

१२क१२ ७ १ २ ३ १ १ २ १ १२ १२ ३ २
सवाज्यच्चाःसहस्ररेताअद्भिर्मृजानोगोभिःश्रीणानः॥२*॥

"सः" सोमः "अचाः" चरति। कीदृशः? "सहस्ररेतः" बहु-रेतस्कः "बह्वदकः" "अद्भिः" वसतीवरीभिः "मृजानः" मृज्यमानः "गोभिः" गोविकारैः घोरादिभिः "श्रीणानः" श्रियमाणः॥ २॥

अथ तृतीया।

१२ ३ १ २ ३ १२ २२ ३ १२ १२ ३ २
प्रसोमयाचेन्द्रस्यकुक्षानृभिर्यमाणोअद्रिभिःसुतः॥३†॥१०

हे "सोम!" "नृभिः" ऋत्विग्भिः "येमानः" नियम्यमानः‡ "अद्रिभिः" ग्रावभिः "सुतः" अभिषुतः "इन्द्रस्य" "कुक्षा" [सप्तम्या डादेशः (३, ४, ३८)] कुक्षौ उदरभूते कलशे वा "प्रयाहि" प्रकर्षेण गच्छ [संहितायां येमान इत्यत्र यत्वम्] ॥ ३॥ १०

---

* ऋ० वे० ७, ५, २१, ६।

† ऋ० वे० ७, ५, २१, ७।

‡ 'येमानः—क्षूयमानः'—इति षि०।

॥ सोढविषम् ॥ प्रवाजियत्ता:। सहस्रधारास्तायि
रा२३४:। ढायि। पवित्राम्। विवारा२३४ढायि।
आ२३४व्योढ्ढायि ॥(१) सवाजियत्ता:। सहस्ररेताअ
ङ्गा२३४यि:। ढायि। मृजानाः। गोभायिआ२३४यि
ढायि। णा२३४नोढ्ढायि ॥(२) प्रसोमयात्ता। इन्द्र
स्यकुक्षानृभा२३४यि:। ढायि। येमानाः। अद्रिभा२
३४। यिर्ढायि। सू२३४नोढ्ढायि(३) ॥ १५ * ॥[१]

॥ जराबोधीयम् ॥ प्रवाजियोवा। त्ता:। सहा२
३स्रा। धारस्तायिराः। पवाधित्रा१वा२३यिवा। रम्।
अव्यो३४५ई। डा। सवाजियोवा। त्ता:। सहा२
३स्रा। रेताअङ्गायि:। मृजाना१गो२३भायि:। ओ।
णानो३४५ई। डा। प्रसोमयोवा। ढायि। इन्द्रास्या

* ऋ० मा० ४म० १च० १५ऋा०।

२ २ १ २ ४ ५
२३कू । ष्ठानुभायिः । येमानो१आ२३द्रायि । भिः ।
१ २
सुनो३४५ई । डा(३) ॥ १ * ॥ [२] १०

अथ येमोमाइडति ऽचात्मकं ऽतीयं सूक्तम्, †

तत्र प्रथमा ।

१२ १२ ३ १ ७१ २ ३ १ २ ३ १
येमोमासःपरावतियेअर्वावतिसुन्विरे ।
१ ३ १ १ ३ १ २
येवाद:शर्य्यणावति ॥ १ ‡ ॥

एतदादिभ्यामृग्भ्यामिन्द्रार्थं सर्वत्र सोमाभिषवोऽस्तीत्याह—"ये" "सामासः" "परावति" विप्रकृष्टेऽतिदूरेण¶ देशे "ये" वा "अर्वावति" अन्तिके देशे§ "सुन्विरे" अभिषूयन्ते "ये वा" "शर्य्यणावति" ‖ [कुरुक्षेत्रस्थ जङ्गलार्द्र शर्यणावत्सञ्ज्ञाकं मधुर-रस-युक्तं सोमवत् सरोऽस्ति] "अदः" अस्मिन् सरसि सुरसा ये सोमा इन्द्रायाभिषूयन्ते । ते अस्माकमभिमत-फलं ददात्विति वक्ष्यमाणेन सम्बन्धः ॥ १ ॥

---

* ऊ० गा० २३प्र० ३अ० १सा० ।

† 'यज्ञायज्ञीयमाग्नेयमैन्द्रमेसाम'—इति ।

‡ ऋ० वे० ७, ९, ५, २ ।

¶ "परावतः"—इति निघण्टौ दूर-नामसु पञ्चमं पदम् (३, २६) ।

§ "अर्वाक्"—इति निघण्टावन्तिक-नामसु अष्टमं पदम् (३, १६) ।

‖ 'शर्यणावति—भूमौ'—इति वि० ।

अथ द्वितीया।

१ २ ३ २ ३१ २३१२ १२ क ३ २२
यआर्जीकेषुक्षत्वसुयेमध्येपस्त्यानाम्।

२३ १२ ७१२
येवाजनेषुपञ्चसु॥ २ *॥ ५

"ये" वा सोमाः "आर्जीकेषु" ऋजीकानामदूरभवाः आर्जीकादेशास्तेषु† तथा "क्षत्वसु" क्षत्वानइति देशाभिधानम्, तेषुः कर्मवत् देशेषु च; किञ्च "पस्त्यानां" सरस्वत्यादीनां नदीनां¶ "मध्ये" समीपे च ये सोमा अभिषूयन्ते ["ऋषयो वै सरस्वत्यां सत्रमासतेत्यादिषु§ नदीतीरे यज्ञकरणस्य श्रवणात्; किञ्च "जनेषु पञ्चसु" निषाद-पञ्चमाश्चत्वारो वर्णा पञ्चजनास्तेषु‖ च "ये वा" सोमा अभिषुताः। ते सोमा अस्माकमभिमत-फलं ददात्वित्युत्तरेण सम्बन्धः॥ २॥

---

* ऋ० वे० ७, २, ५, ३।

† 'आर्जीकेषु—ऋजीषु'—इति वि०।

‡ 'क्षत्वसु—क्षत्रेषु स्थानेषु'—इति वि०।

¶ 'पस्त्यानां—गृहाणाम्'—इति वि०। "पस्त्यम्—इति निघण्टौ गृह-नामसु षष्ठं पदम् (३, ४,)।

§ "ऋषयो वै सरस्वत्यां सत्रमासत। ते कवषमैलूषं सोमादनयन् दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्ये दीक्षिष्टेति। तं बहिर्धन्वेदवहन्नवै नं पिपासा हन्तु सरस्वत्या उदकं मा यादिति"—इति ऐत० ब्रा०।

‖ जनेषु पञ्चसु—'पञ्चजनाः, यजमानश्चत्वारऋत्विजः'—इति वि०।

अथ तृतीया ।

११ १२ २१२ ३१२१ १११२
तेनोवृष्टिन्दिवस्परिपवन्तामासुवीर्यम् ।

२ २१२ १११
स्वानादेवासइन्दवः ॥ ३ * ॥ ११

"स्वानाः" सुवानाः तत्र चात्र अभिषूयमाणा "देवासः" देवाः दीपन-श्रीलाः स्तुत्या वा "इन्दवः" "अहेषु" चमसेषु चरन्तः, "ते" सोमाः "नः" अस्माकं "दिवस्परि" परि-शब्दः पञ्चमी-द्योतकः, अन्तरिक्षादादित्याद्वा "वृष्टिम्" ["अग्नौ प्रास्ताहुतिः सम्यगादित्य मुपतिष्ठते । आदित्याज्जायते वृष्टिः (म० १अ०)"—इति वृष्टि-कारणत्वात्] किञ्च "सुवीर्यम्" शोभन-वीर्योपेतम् पुत्रञ्च धनादिकं वा "आ पवन्ताम्" प्राप-यन्तु । यजमानः सोमेनाभिमत-फलानि प्राप्नोति खलु ॥

"स्वानाः"-"सुवानाः"—इति पाठौ ॥ ३ ॥ ११

२२२ २ १ २ १ २ ३ १ १
॥ जरावोधीयम् ॥ येसोमासोवा । पारावतायि ।

२२१ २ १ २ ३
येआर्वा२३वा । तिसुन्वायिरायि । येवादा१:ग्रा२३र्ष्टा ।

४२ ३ १ २२ २ १ २ १ ११
णा । वतो३४५ई । डा ॥(१) यआज्जीकोवा । घूकृत्वसू ।

२२१ २ १ २ ३
र्येमाध्वा२३यिपा । स्तियानाम् । येवाजा१ना२३यिषू ।

* ऋ० वे० ७, २, ५, ४ ।

५ ३ १ २ १ २ १ ३ १
प। चसो३४५ई। तेनोवृष्टोवा। दायिवस्यराधि।

१ २ ३ १ ३ २ ४
पवान्ता२३मा। सुवीरायाम्। खानादा१यिवा२३साः।

५ ३ २
दू। दवो३४५ई। उ(३)॥ १६ * ॥ [१ ११

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य अष्टमस्याध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे—

आतेवत्सइति ऋचात्मकं प्रथमं सूक्तम्,—

तत्र प्रथमा।

१ २ ३ १ २ १ २ ३ १ २ १ २
आतेवत्सोमनोयमत्परमाच्चित्सधस्थात्।

१ २ १ १ ३ २
अग्नेत्वाकामयेगिरा॥ १ †॥

हे "अग्ने!" "वत्सः" ऋषिः "ते" तव "मनः" "परमाच्चित्" उत्कृष्टादपि "सधस्थात्" द्युलोकात् "आ यमत्" आयमन्ति आगमयन्ति। केन साधनेन? "त्वा" "कामये"

---

* ऊ० मा० ४प्र० १ष० १६सा०।

† ऋ० आ० १, १, १, ८ (१मा० १०४८०)=य० वे० १२, ११५=ऋ० वे० ५, ८, १६, १।

कामया अभिलषन्त्या "गिरा" स्तुत्या ["कामये"—इत्यत्रापि ये आदेशः पूर्ववत् । यद्वा त्वां कामये अभिलषामि] ॥

"कामये"-"कामया"—इति पाठो ॥ १ ॥

अथ द्वितीया ।

३ २उ ११उ ३ २ ३ १ ३ १ १ १२
पुरुत्वाहिसदृङ्ङसिदिशोविश्वाअनुप्रभुः ।

३ १ १
समत्सुत्वाहवामहे ॥ २ * ॥

हे अग्ने ! "पुरुत्वा हि" बहुषु हि देशेषु त्वं "सदृङ् असि" समान-द्रष्टा भवसि अतएव "विश्वाः" सर्वा दिश "अनु" लक्ष्य "प्रभुः" ईश्वरो भवसि । ईदृशं "त्वा" त्वां "समत्सु" सङ्ग्रामेषु रक्षणार्थं "हवामहे" आह्वयामहे ॥

"दिशः"-"विदिशः"—इति पाठो ॥ २ ॥

अथ तृतीया ।

१ २ ३ १उ २उ ३ १ २
समत्स्वग्निमवसेवाजयन्तोहवामहे ।

१ १ १ १ २
वाजेषुचित्रराधसम् ॥ ३ † ॥ १२

"समत्सु" समदेषु सङ्ग्रामेषु "वाजयन्तः" बलमिच्छन्तो वयम् "अवसे" रक्षणार्थम् "अग्निं हवामहे" । कीदृशम् ? "वाजेषु" सङ्ग्रामेषु "चित्रराधसम्" याचनीय-धनम् ॥ ३ ॥१२

---

* ऋ० वे० ५, ८, २६, २ ।

† ऋ० वे० ५, ८, २६, ४ ।

॥ वात्सम् ॥ आतेवत्साः। मनोयमत्। परमात्।
चित्सधार३स्थात्। अग्नायित्वाइङ्काइ। मयोवा। गां
पुयिरोई३चायि ॥(१) पुरुत्राही। सहङ्ङसि। दिशो
विश्वाः। अनुप्रार३भूः। समात्सूइत्वाइ। हवोवा।
मापुचोई३चायि ॥(२) समत्मवा। ग्निमवसे। वाजयन्तः
हवामार३चायि। वाजायिषूइचाइयि। त्ररोवा। धा
पुसोई३चायि(३) ॥ १७ ॥ [१] १२

अथ द्वितीय-ऋचे—

प्रथमा।

त्वन्नइन्द्राभरओजोनृम्णशतक्रतोविचर्षणे।
आवीरम्पृतनासहम् ॥ १ ॥

---

* ऋ० मा० ४प्र० १अ० १७सा०।

† ऋ० आ० ५, १, २, ७ (१भा० ८२४अ०) = ऋ० वे० ४, २, १०, १।

हे "शतक्रतो" बहुकर्मन्! "विचर्षणे" विद्रष्टः इन्द्र! त्वं "नः" अस्मभ्यम् "ओजः" बलं "मृध्रं" धनं च "आ भर" आहर। "वीरं" वीर्योपेतम् "पृतनासहं" सेनानामभिभवितारं त्वाम् "आ" याचामह इति शेषः॥

"आभरओजः"-आरुतामोजः"—इति पाठौ॥ १॥

अथ द्वितीया।

१२ २२ २१ २२ २३ १२ २१ १
त्वञ्हिनःपितावसोत्वम्माताशतक्रतोबभूविथ।
१ २ ३ १ २
अथातेसुम्नमीमहे॥ २ *॥

हे "वसो" वासयितः! "शतक्रतो" बहुकर्मन्निन्द्र! त्वं "नः" अस्माकं "पिता" पितृवत् पालको "बभूविथ" भव "त्वं" "माता" मातृवद्धारकश्च बभूविथ। अथ च वयं "ते" तव स्वभूतं "सुम्नं" सुखम् "ईमहे" याचामहे॥ २॥

अथ तृतीया।

१ २ २१२ ११
त्वाञ्हविष्मन्पुरुहूतवाजयन्तमुपब्रुवेसहस्कृत।
११ २१ १
संनोरास्वमुवीर्यम्॥ ३†॥ १३

---

* ऋ० व० ४, १, १०, १।

† ऋ० वे० ४, १, १०, १।

[सहसा बलेन स्तोतृभिर्युक्तः कृतः सहस्कृतः] हे "सहस्कृत" इन्द्र! [स्तुत्या हि देवताया बलं वर्द्धते, तस्य सम्बोधनम्] —"शुष्मिन्" अतएव बलवन्! "पुरुहुत" पुरुभिर्बहुभिर्यजमानैराहुतेन्द्र! "वाजयन्तं" बलमिच्छयन्तं त्वाम "उपब्रुवे" उपस्तौमि। "सः" त्वं "नः" अस्मभ्यं सुवीर्यं धनं "रास्व" देहि॥

"सहस्कृत"-"शतक्रतो"—इति पाठौ॥ ३॥ १३

॥ औपगवाद्यम्॥ तुवन्ना३इन्द्राभरा। ओजोनृ म्ण्ँशतक्रतोविचर्षणाये। आवौ२। ही२। ऊवा २३यि। रा३४पा। जनासाह्याम्॥(१) तुवꣳह३यिन्नः पितावसाउ। त्वम्माताशतक्रतोबभूविथा। अयौ२। ही२। ऊवा२३यि। ता३४यिमू। न्नमीमाह्यायि॥(२) तुवाꣳशू३यिम्पुरुहूता। वाजयन्तमुपब्रुवेसहस्कृता। स नौ२। ही२। ऊवा२३यि। रा३४स्वा। सुवीरायाम्। ऐ। वा२ए२३। हिया३४औहोवा। ए३। उपा३१२ ३४५।३)॥ १८ *॥ [१] १३

* उ० मा० ४५० १ख० १८खा०।

अथ तृतीय-तृचे—

प्रथमा ॥

१ १ ३ १ ३ ३ १ १
यदिन्द्रचित्रमद्दनास्तित्वादातमद्रिवः।

२ ३ १ १ ३ १ १
राधस्तन्नोविदद्दसउभयाहस्त्याभर ॥ १ * ॥

हे "अद्रिवः" वज्रवन्! "चित्र" चायनीयेन्द्र! "त्वादातं त्वया दातव्यं यद्दनं "मे" मम "इह" अस्मिंल्लोके "नास्ति", हे "विदद्दसो" लब्धधनेन्द्र! "नः" अस्मभ्यम् "उभया हस्ता" उभाभ्यां हस्ताभ्यां तद् "राधः" "आभर" आहर ॥

"मद्दह"-"मेहना"—इति छन्दोगानां बह्वृचानां पाठो ॥१॥

अथ द्वितीया।

१२ २२ ३ १२ ३ १ २ ३ १२ २२
यन्मन्यसेवरेण्यमिन्द्रद्युक्षन्तदाभर।

३ १ ३ १ २ ३ १२ ३२ २२ ३ १ १
विद्यामतस्यतेवयमकूपारस्यदावनः ॥ २ † ॥

हे इन्द्र! "यत्" "द्युक्षम" अन्नं "वरेण्यं" वरणीयं "मन्यसे" "तत्" द्युक्षम् "आभर" अस्मभ्यम्। "ते" तव सम्बन्धिनो "वयं"

---

* ऋ० ऋा० ४, २, १, ४ (१भा० ७०४४०) = ऋ० वे० ४, २, १०, १।

† ऋ० वे० ४, २, १०, २।

"तस्य" तादृशस्योक्तलक्षणस्य "अकूपारस्य" [अकुत्सितः पारो अन्तो यस्य तादृशस्यात्मनः "दावनः" दानस्य "विद्याम" स्याम ॥

"दावनः"-"दावने"—इति पाठो ॥

अथ तृतीया ।

१२ १२१२१ २३ १ २३२ ३१
यत्तेदित्तुप्रराध्यमनोअस्तिश्रुतम्बृहत् ।
१२११ २ ३१२ २२ ३ १ १
तेनहढाचिदद्रिवआवाजन्दर्षिसातये ॥ ३* ॥ १४

॥ इति चतुर्थः प्रपाठकः ॥

हे इन्द्र ! "ते" तव "दित्तु" "प्रराध्य" प्रकर्षेण स्तुत्यं "श्रुतं" "बृहत्" महत् यत् "मनः" "अस्ति", "तेन" मनसा हे "अद्रिवः" वज्रवन्निन्द्र ! "दृढ़ाचित्" दृढ़मपि "वाजम्" अन्नम् "आ दर्षि" आदारयसि, "सातये" अस्मत्सम्भजनाय लाभाय वा ॥

"दित्तु"-"दित्सु"—इति पाठो ॥ ३ ॥ १४

३ ४ ५ ३ २ ४ ५
॥ वोढ्वम् ॥ यदिद्रचित्तमद्र । हनाइ । आस्तो ।
१२ २ २ २ १ १
त्वादातमद्रिवः । राधस्ताइइन्नाः । धीवी२ । दृढसा
२ १ १ २
उ । उभयाइइचा । स्तायाइइ । भाइइराइ४इ ॥(१)

---

* ऋ० वे० ४, २, १०, ३ ।

३ ४ ५र र १ २ ४ ५ १ र
यन्मन्यसेवरे। णियाऽम्। आयिन्द्रा। द्युक्षन्तदाभ
र र १ १र र
र। विद्यामा२ऽता। स्यास्या२। तेवयाम्। अकूपा
२ १ १ १ ३ ४र ५
२ऽरा। स्यादा२ऽ। वा२ऽना३४ऽः ॥(२) यत्तेदित्तुप्र
र २ २ ४ ५ १ र
रा। धियाऽम्। मामाः। अस्तिश्रुतम्बृहत्। तेनदा
२ १ १ र र २
२ऽर्ढा। चायिवा२यित्। अद्रिवाः। आवाजा२ऽदा।
२ १ २ १
षायिसा २ ३। ता २ ३ या ३४ ३ यि। ओ२३४ ५ ई।
डा(३) ॥ १८* ॥ [१]

॥ वसिष्ठप्रियम् ॥ २ १ यदिन्द्रा२ऽ। चित्रमृह। ना ४ ५ ४
५ २र ऽर १ ० र १ २ १
स्ती। त्वादाऽतामद्रायिवो२। राधास्तन्नोऽ। विदा
३ ५ १ २ ३ ५ १ २ ३ ५
२दा२३४साउ। ऊभाओ२३४वा। याद्दाओ२३४वा।
५ १ १ ४र ५र ४ ५
स्तियापुभरा ॥(१) यन्मन्या२ऽ। सेवरेणिम्। आयिन्द्रा।
१ १ २ १ ५ ३
द्युक्षाऽन्तादा१भारा२। विद्यामताऽ। स्यतार्यिवाऽऽ

* ऋ० गा० ४प्र० १ष० १८मा०।

५ १ २ ३ ५ १ २ ३ ५ ४
४याम्। आकाओ२३४वा। पाराओ२३४वा। स्यदा

२१२ ४ ५२ ४ ५
५नाः ॥(२) यत्तेदी२३। चुप्रराधियम्। नाः।

२ १० २ १ २ १ २
अस्ती३श्रूतम्बृहा२त्। तेनाद्दढा३। चिदा२द्रा२३४यि

५ १ २ ३ ५ १ २ ३ ५ ४
वाः। आवाओ२३४वा। जान्दाओ२३४वा। षिसा५त

यावि। होप५ई। डा(३)॥ १८ * ॥ [२] १४

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य अष्टमस्याध्यायस्य
षष्ठः खण्डः ‡ ॥ ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ८ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-श्रीवीर-
बुक्क-भूपाल साम्राज्य-धुरन्धरेण सायणाचार्य्येण
विरचिते माधवीये सामवेदार्थ-प्रकाशे
उत्तरायण्ये अष्टमोऽध्यायः † ॥ ८ ॥

---

* ऊ० गा० १२प्र० २द्य० १८मा०।

† 'समाप्तश्चैतत्प्रममहः'—इति वि०।

‡ चतुर्थः प्रपाठकः परिसमाप्तः'—इति वि० मूलपुस्तकादिसम्मतश्चेतिशम् ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ ६ ॥

॥ अथ नवमोऽध्याय आरभ्यते * ॥

तत्र,

शिशुर्जज्ञानमिति प्रथम-खण्डे† ऽचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

१ २ ३ १ २ १ २
शिशुर्जज्ञानो‡ हर्यतमृज्जन्ति
२ २ १ १२ ३ १ २ ३ १ २
शुम्भन्तिविप्रमरुतोगणेन ।
३ २ ३ १२ २ ३ १२
कविर्गीर्भिष्काव्येन¶ कविःसंसत्
२१ ३ १ ३ १२ ३ १ २
सोमःपवित्रमत्येतिरेभन्॥ १ §॥

"शिशुम्" इदानीमुत्पन्नत्वाच्छिशुवत्तिष्ठन्तम्§ [यद्वा, पापान्वित मकुर्व्वन्तं विनाशयन्तम्] "जज्ञानम्" प्रादुर्भूतम्‖ अतएव

---

* 'इदानीमष्टममष्टचत्वारिंशमुच्यते'—इति वि० ।

† "गायत्र-प्रभृति-मान्त्रां ब्राह्मणेनार्थमुक्तम्'—इति वि० ।

‡ "गोभिः काश्येन"—इति विसर्गमध्यपाठः ख० मु० पु० ।

¶ ऋ० वे० ७, ४, ९, २ ।

§ 'शिशुं—शंसनीयम्'—इति वि० ।

‖ 'जज्ञानं—जायमानम्'—इति वि० ।

"हर्यतं" [हर्य गतिकान्त्योः (भ्वा० प०)]। भृमृदृशी-त्यादिना अतच्। सर्वं काम्यमानं सोमं "मृजन्ति" मरुतः* शोधयन्ति किञ्च "विप्रं" मेधाविनं सोमं "गणे न" आत्मीयेन† समसङ्ख्याकेन "शुम्भन्ति" अलङ्कुर्वन्तिः‡। ततः "कविः" क्रान्त-प्रज्ञः सोमः "काव्येन" कवि-कर्म्मणैव "कविः" शब्दयितव्यः सन् शब्दायमानः "गीर्भिः" स्तुतिभिः सह "पवित्रम्" "अत्येति" अतीत्य गच्छति॥

"विप्रम्"—इति छन्दोगाः, "वक्रिम्"—इति बह्वृचाः पठन्ति॥१॥

अथ द्वितीया।

१ २ ३ १२ ७ २ ६ २
ऋषिमनायऋषिकृत्स्वर्षाः

३ १ २ ३१ २ ३ २
सहस्रनीथःपदवीष्कवीनाम् ¶ ।

३ १ ३ १ २ ३१र २र ३
तृतीयन्धाममहिषास्षास

१ २ ३ २ ६ १ २ ३ २
न्त्सोमोविराजमनुराजतिष्टुप्॥ २ §॥

"ऋषिमनाः" सर्व्वदर्शनशीलमनस्कः, अतएव "ऋषिकृत्" सर्वस्य दर्शनकर्त्ता प्रकाशनस्य कर्त्ता "स्वर्षाः" सर्वस्य सूर्य्यस्य वा

---

* 'मरुतः—आदित्यरश्मयः'—इति वि०।

† 'गणेन—सम्मतेन'—इति वि०।

‡ 'शुम्भन्ति—पावयन्ति'—इति वि०।

¶ "पदवीः कवीनाम्"—इति विसर्गसंधिपाठः ख० मु० पाठः।

§ ऋ० वे० ७, ४, ६, २।

सभक्ताः "सहस्रनीथः" [नीथा स्तुतिः] बहुविध-स्तुतिकः "कवीनां" क्रान्त-प्रज्ञानां मध्ये "पदवीः" स्खलितानां पदानां साधुत्वेन संयोजयिता यः सोमो विद्यते स "महिषः" महान् पूज्यो वा सोमः "तृतीयं धाम" द्युलोकं "सिषासन्" सभक्तुमिच्छन् "स्तुप्" स्तूयमानः सन् "विराजं" विशेषेण राजन्तं दीप्यमान मिन्द्रम् "अनुराजति" प्रकाशयति ॥ २ ॥

अथ तृतीया।

३ २३ १ २३२ ३ १ २
चमूषच्छ्येनःशकुनोविभृत्वा

३२ ३१२ २२ ३ १२
गोविन्दुर्द्रप्सआयुधानिबिभ्रत्।

३२ ३ १२ २२ ३२
अपामूर्मिंसचमानःसमुद्र

३ २ ३ १ २ ३ १ २
न्तुरीयन्धाममहिषोविवक्ति ॥ ३ * ॥ १

"चमूषत्" चमन्ति भक्षयन्त्यत्रेति चम्वयमसास्तेषु सोदन्† यद्वा, चम्वो अधिषवणफलके तयोर्वर्त्तमानः "श्येनः" शंसनीयः "शकुनः" शक्तेः सामर्थ्यकारी "विभृत्वा" [हरतेरातोमनिन्विट्वादिना (३, २, ७४) क्वनिप्] पात्रेषु विहरणशीलः

* ऋ० वे० ७, ४, ९, ४।

† 'चमूषत्— * * *'। अथवा चमूसु सेनासु सीदति'—इति वि०।

"गोविन्दुः" यजमानानां गवां लम्भकः* [विन्दुरिच्छुरिति उ-प्रत्ययान्तत्वेन निपातितः] "द्रप्सः" धारयन् † "अपाम्" उदकानाम् "ऊर्मिं" प्रेरकं "समुद्रम्" [अन्तरिक्षनामैतत् (निघ० १, ३)] अन्तरिक्षं "मचमानः" सेवमानः "महिषः" महान् य एवं विधः सोमः स "तुरीयं" चतुर्थं धाम चान्द्रमसं स्थानं‡ "विवक्ति" सेवते सूर्यलोकस्योपरि चन्द्रमलोकौ विधत इति यमः पृथिव्या अधिपतिः समावत्सित्यादिभिश्चन्द्रमानक्षत्राणामधिपतिः सदामत्सवैचित्यन्तेर्मन्त्रैर्ज्ञायते ॥ ३ ॥ १

॥ पार्थम् ॥ ओ३ह्वोऽहोयि। म्रिप्रुञ्जन्ना। नाऽ३ऽ
ह्यं। तम्मृजन्तायि। प्रुभन्तिवायि। प्रांऽमरु। तो
गणेना। कविगीर्भायिः। काऽविये। नाकविस्सान्।
सोमःपवायि। चाऽमति। आ३४ऽयि। तीऽराप्युयि
भाऽ५ऽ६न्॥(१) ऋषिमनाः। याऽऋषि। क्रान्सुवर्षाः।
सचंस्तनायि। थाऽःपद्। वीःकवीनाम्। तृतीयन्धा।

* 'गोविन्दः—गावः उदकं वाक् पृथिवी आदित्यरश्मयो वा। एतानि यो विन्दति स गोवित्। विदज्ञाने विदलाभे विदसत्तायाम्'—इति वि०।

† 'द्रप्सः—उदकसम्मिश्रः'—इति वि०।

‡ 'तुरीयं धाम— * * * द्रीणकलशम्'—इति वि०।

२ १ २ ३ ४ ५ २२ १२ १ २ १
मा३महि। षःसिषासान्। सोमोविरा। जा३मनु।
२ २ ४ २ २ १ २
रा३४३। जा३तायुयिष्ट६५६॥ २) चिमूषच्छायि। ना
१ २ ३ ४ ५ २२ १ २ १२
३ःशकु। नोविभृत्वा। गोविन्दुद्रा। प्सा३आयु।
१२३ ४ ५ २ १२ १२ २ १ २ २ ३ ४ ५
धानिबिभ्रात्। अपामूर्मायिम्। सचमा। नःसमुद्रा
२ २ २ २ १ २ २
म्। ओ३हो३होयि। तुरीयन्धा। मा३महि। षो३
२ ४
४३। वा३यिवायुक्ता६५६यि(३)॥ १२ *॥ [१]

३ ४ २
॥ महावामदेव्यम्॥ प्रा५युयिम्। यज्ञा३नाम्
४ ५ १ २ २
हर्य्यताम्। मा। जन्तिप्रयुम्भन्तिविप्रम्मरुतोगणेनकवि
२ २ २ २ २ १ २ २ १
गीर्भिःकाव्येनाकविःसन्सोमः। पा। औ३होचायि।
३ २ २ १ १
विचा२३मतायि। एत्ये। हो३। ऊम्मा२। रा२३यि
५ ७ ४ २ ४ ५
भो ३ ५ हायि॥(१) आ५षिं। मनाऽयाऽऋषिकृत्।
१ २ ८ २ २ २ २ २
सू। वर्षाःमहस्रनीथःपदवीःकवीनांहतीयन्धाममहिषः

* ऋ० मा० ९प्र० १अ० १२मा०।

र र १ १ १ र २ १र २
सिषासन्सोमः। वा। औ३ह्वोहायि। राजा२३मनू।
३रर २ १ १ २ ३
राजौह्वोइ३। ऊम्मा२। ताऽ२यिष्टो३५हायि॥(२) चा
र ४ २ ४ ५ १ र र
ऽ५मू। षच्छरा३यिनाः३शकुनाः। वायि। भवागोवि
र र र र र २ १र
न्दुर्द्रप्सआयुधानिबिभ्रद्पामूर्म्मिꣳसचमानःसमुद्रन्तुरी।
२ ३ २ १र २ ३र र १
या। औ३ह्वोहायि। धामा२३महायि। पोवौहो३।
१ १ १
ऊम्मा२। वाऽ२क्तो३५हायि३)॥ ७ *॥ [२]

२
॥ ह्वाउउऊवायिवासिष्ठम्॥ ह्वायि। उऊवायि।
३ २ ३र४र ५ १ २ १ २ ३ ४ ५
शिशा३४औह्वोवा। जज्ञा। ना३ꣳह्वर्य्य। तम्मृजन्ता
३ २ ३र ४र ५ १ २ १ २
यि। शुम्भा३४औह्वोवा। तिवायि। प्रा३म्मरु। तो
३ ४ ५ ३ २ ३र ५र ५ १र २ १ र
गणेना। कवा३४औह्वोवा। गीर्भायिः। का३विय।
२ ३ ४ ५ ३र २ ३र ४र ५ १ २
नाकविःमान्। सोमा३४औह्वोवा। पवायि। त्रा३
१ २ २ ४ ३ २
मति। आ३४३यि। तौ३रा५यिभा६५६न्॥(१) ऋषा

* ऊ० गा० १०प्र० १च० ७सा०।

३ २ ४ ५ १ २ १ २ ३ ४ ५ २
३४औहोवा। मनाः। याऽऋषि। कृत्सुवर्षाः। स

२ ३ २ ४ ५ १ २ १ २ ३ ४ ५
ह्वा३४औहोवा। सनायि। थाऽःपद। वीःकवीनाम्।

३ २ ३ २ ४ ५ १ २ १ २ ३ ४ ५
तृता३४औहोवा। यन्धा। माऽमहि। षःसिषासान्।

३ २ २ ३ २ ४ ५ १ २ १ २ २
सोमा३४औहोवा। विरा। जाऽमनु। रा३४३। जा

४ ३ २ ३ २ ४ ५ १
इताऽयिष्टू ६५ ३ ५ ॥(२) चमू३४औहोवा। षक्षायि।

२ १ २ ३ ४ ५ ३ २ ३ २ ४ ५ १
नाऽःशकु। नोविभूत्वा। गोवा३४औहोवा। दुर्द्रा।

२ १ २ २ ३ १ ५ ३ २ ३ २ ४ ५ १
प्साऽआयु। धानिविभ्रात्। अपा३४औहोवा। ऊ

२ १ २ २ ३ ४ ५ २
म्मायिम्। सचमा। नःसमुद्राम्। क्षायि। उऊवा

३ २ ३ २ ४ ५ १ २ १ २
यि। तुरा३४औहोवा। यन्धा। माऽमहि। षो३४

२ ४
३। वाऽयिवाऽ५क्षा६५६यि(३) ॥ ७ * ॥ [३]

३ २ २ १ ३ २
॥ उऊवायिवासिष्ठम्॥ उऊवायि। शिशा३४औ

४ २ ५ १ २ १ २ ३ ४ ५ ३ २
हौवा। जज्ञा। नाऽ५ष्टर्य्य। तंमृजन्तायि। प्रुभा

---

* ऊ० गा० १७प्र० १अ० ७सा०।

३र ४र ५ १ २ १ २ ३ ४ ५ ३
३४ओहोवा। तिवायि। प्राऽग्मरु। नोगणेना। क
२ ३र ४र ५ १र २ १र २ ३ ४ ५
वाऽ४ओहोवा। गौर्भायिः। काऽविये। नाकविःसा
३र २ ३र ४र ५ १ २ १ २
न। सोमाऽ४ओहोवा। पवायि। चाऽमति। आ
२ ४ २ ३र ४र ५
३४ऽयि। तीऽराऽयिभाऽ५ऽन्॥(१) ऋषाऽ४ओहोवा।
१ २ १ २ ३ ४ ५ ३ २ ३र ४र ५
मनाः। याऽऋषि। क्षन्सुवर्षाः। सहाऽ४ओहोवा।
१ २ १ २ ३ ४ ५ ३ २ ३र ४र
सनायि। थाऽःपद। वीःकवीनाम्। तृताऽ४ओहो
५ १ १ २ ३ ४ ५ ३र २
वा। यन्धा। माऽमहि। षःसिषासान्। सोमा ३ ४
३र ४र ५ १ २ १ २ १ ४
ओहोवा। विरा। जाऽमनु। राऽ४३। जाऽताऽ
यिष्टू ऽ५ऽप्॥(२) २ ३र ४र ५ १ २
चमूऽ४ओहोवा। षच्छ्वायि। ना
१ २ ३ ४ ५ ३र २ ३र ४र ५ १
ःशकु। नोविभृत्वाम्। गावाऽ४ओहोवा। दुर्द्रा।
२ १र २ ३ ४ ५ ३ २ ३र ४र ५ १र
प्साऽआयु। धानिबिभ्रात्। अपाऽ४ओहोवा। ऊ
१ २ १र २ ३ ४ ५ ३ २ १ २
र्म्मायिम्। सचमा। नःसमुद्राम्। उऊवायि। तु

२ ३र४र ५ १ २ १ २ २
रा३४औहोवा। यन्भा। मा३मच्छि। षो३४३। वा

४
३यिवा५क्ता६५६यि(३) ॥ १८ ॥ [४]

॥ उद्वंश्दार्गवम् ॥ शिप्रुज्झाज्ञा२३। नऽच्छ्यांता

१ १ २ १
२३म्। मृजन्तायि। प्रुभ्मन्तायिवा२३यि। प्रम्मरुतो

२ १ २ १ २र १
२३। गणेना। कविर्गायिर्भा२३यिः। काविर्येना२३ः।

२ १ २र १ २ १ २
कविःसान्। सोमःपावा२३यि। चमतायिये२३। ति

१र २ १ २ १ ३ १
रेभा३नाउ ॥(१) ऋषिमाना२३। ओयऋषीकृ२३त्।

२१ २ १ २ १ २१र
सुवर्षाः। सहस्राना२३यि। थःपदावा२३यिः। कवी

२र १ २ १ २१र
नाम्। तृतीयान्भा२३। ममच्छायिषा२३ः। सिषासा

२र र १ २ १ २ १ १
न्। सोमोवायिरा२३। जमनूरा२३। जनिष्ठा३१उ ॥(२)

२र १ २ १ २ १ २र
चमृषाष्टपा२३यि। नःशकृनो२३। विभृत्वा। गोवि

१ २र १ २ १ २र १
न्दूर्द्रा२३। प्रमश्रायूधा२३। निबिभ्रात्। अपामूर्म्मा

---

१ ऋ० मा० १७प्र० ।अ० ८मा० ।

२३यिम्। सचमाना२३:। समुद्राम्। तुरीयान्धा२३।
ममहायिषो२३। विवक्षा३१उवा२३४५(३) ॥ ४ * ॥ [५]

॥ वैश्वज्योतिराद्यम् ॥ ह्वाउह्वोवा३हायि। ग्निमुञ्ज
ज्ञानांऽहर्य्या३तांम्हजन्ता२३४५यि। मुम्भन्तिविप्रम्मरु
३तोगणेना२३४५। कविगोभिःकाव्ये३नाकविःसा२३४५
न्। सोमःपवित्रमती३यायितिरेभा२३४५न् ॥(१) ऋषि
मनायऋषी३कृन्सुवर्षा२३४५:। सहस्रनीथःपदा३वायिः
कवीना२३४५म्। तृतीयन्धाममहो३षाःसिषामा२३४५
न्। सोमोविराजमनू३राजतिष्टू२३४५प् ॥(२) चमूषच्छ्ये
नःशकूनोविभृत्वा२३४५। गोविन्दूर्द्रप्मआयू३धानिवि
भ्रा२३४५त्। अपामूर्म्मिंऽसचमा३नाःसमुद्राम्३४५म्।

* ऋ० मा० २३प्र० २अ० ४मा०।

२ र र ३र १ ७ १११२ २र र २
तुरीयन्त्सामममृक्षोऽषोविवक्ता२३४५यि । हाउहोवाऽहायि ।

१ १ १
वा३४५(३) ॥ ७ ॥ * [६] १

एतेसोमा इति नवर्चं द्वितीयं सूक्तं,

तत्र प्रथमा ।

३१र २र ३ २ ३१र २र ३ १ २
एतेसोमाअभिप्रियमिन्द्रस्यकाममक्षरन् ।

१ २ ३ ७क २र
वर्द्धन्तोअस्यवीर्यम् ॥ १ † ॥

"एते" अभिषुता इमे सामाः "अस्य" इन्द्रस्य "वीर्य्यं" शक्तिं "वर्द्धन्तः" वर्द्धयन्तः "इन्द्रस्य" "कामं" काम्यं "प्रियं" प्रीतिकरं "समभ्यक्षरन्" अभ्यवर्षन् अभिषवन्ति ॥ १ ॥

अथ द्वितीया ।

३ १ २ ३ ३ १ २ ३ २ ३ १ २
पुनानासश्चमूषदोगच्छन्तोवायुमश्विना ।

१ २ ३ १ २
तेनोधत्तसुवीर्यम् ॥ २ ‡ ॥

हे सोमाः ! "पुनानासः" पुनाना अभिषूयमाणाः "चमूषदः" ¶ चमसेषु सीदन्तः गच्छन्तः "वायुम्" "अश्विना" अश्विनौ च

* ऊ० गा० २२प्र० २अ० ७सा० ।

† ऋ० वे० ६, ७, ३०, १ । ‡ ऋ० वे० ६, ७, ३०, २ ।

¶ 'चमूषदः—भक्षणीयेषु सीदन्ति अथवा अभिषवणफलकचर्मणः उपरि सीदन्ति चमूषदः'—इति वि० ।

"गच्छन्तः" प्राप्नुवन्तः ते यूयं "नः" अस्मभ्यं "सुवीर्यं" शोभन-वीर्यं "धत्तु" प्रयच्छत ॥

"धत्त"-"धान्तु"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

१ १ २ १ २ १ २ १ २ २
इन्द्रस्यसोमराधसेपुनानोहार्दिचोदय ।

२ २ २ १ २ २ १ २
देवानांयोनिमासदम् ॥ ३* ॥

हे सोम ! "पुनानः" पूयमानस्त्वं "राधसे इन्द्रस्य" इन्द्रस्य संराधनाय "हार्दि"—इति हृदय-सम्बन्धि स्थानं† "चोदय" प्रेरय । अहमपि "देवानाम्" इन्द्रादीनां "योनि" स्वर्गाख्यं स्थानम् "आसदं" प्राप्नवान् [यद्वा, देवानां यजन-साधनं यज्ञाख्यं स्थानं प्राप्नवानस्मि ॥

"देवानाम्"-"ऋतस्य"—इति पाठौ ॥ ३ ॥

अथ चतुर्थी ।

२ १ २ ३ २ १ २ ३ १ २ १ २ ३ १ २
मृजन्तित्वादशक्तिपोहिन्वन्तिसप्तधीतयः ।

२ २ १ २
अनुविप्राअमादिषुः ॥ ४ ‡ ॥

---

* ऋ० वे० ९, ७, ३०, ३ ।

† 'हार्दि—हृदये'—इति वि० ।

‡ ऋ० वे० ९, ७, ३०, ४ ।

हे सोम! "त्वा" त्वां "दश" दशसङ्ख्याकाः ["क्षिपः अङ्गुलिनामैतत् (२, ५, ३,)] अङ्गुलयः "सृजन्ति" शोधयन्ति। ततः "सप्त" सप्तसङ्ख्याकाः* "धीतयः" होत्रकाश्च त्वां "हिन्वन्ति" स्व-स्व-व्यापारैः प्रीणयन्ति। तथा "विप्राः" मेधाविनः स्तोतारश्च त्वाम् "अनु मदादिषुः" अनुमादयन्ति ॥४॥

अथ पञ्चमी।

३ १ १ ३ १ १ ३ १ २ ३ १ २र ३क २र
देवेभ्यस्त्वामदायकꣳसृजानमतिमेष्यः।

१र २र
सङ्गोभिर्वासयामसि ॥ ५ † ॥

हे सोम! "कं" सुखभूतं "त्वा" त्वां "देवेभ्यः" देवानां "मदाय" मदार्थं "गोभिः" गोविकारैः पयोभिः "संवासयामः" संस्थापयामः। कीदृशम्? "मेष्यः" अवैर्लोमानि दशापवित्ररूपेण "अति सृजानम्" अत्यन्तं सृजन्तं दशापवित्ररूपेण अवैर्लोमसु वर्त्तमानमित्यर्थः ॥ ५ ॥

अथ षष्ठी।

३ १ ३ २ ३ १र २र ३ १र २र
पुनानःकलशेष्वावस्त्राण्यरुषोहरिः।

२.३ १ २
परिगव्यान्यव्यत ॥ ६ ‡ ॥

---

* 'सप्तधीतयः—बुद्धियुक्ताः सप्तर्त्विजः; धीतयः स्थापनकराः'—इति वि०।

† ऋ० वे० ६, ७, ३०, ५।

‡ ऋ० वे० ६, ७, ३०, ६।

"पुनानः" पूयमानः "कलशेषु" द्रोणकलशेषु* आसिच्यमानः "अरुषः" आरोचमानः "हरिः" हरितवर्णः सोमः "गव्यानि" गो-सम्बन्धीनि पयःप्रभृतीनि "वस्त्राणि" वासांसि "परि अव्यत" पर्याच्छादयति† ॥ ६ ॥

अथ सप्तमी।

३ २ ३ १ २ ३ २३ ३ २ ३ १ २
मघोनआपवस्वनोजहिविश्वाअपद्विषः।

२ ३ १ २ ३ १ २
इन्दोमखायमाविश ॥ ७ ‡ ॥

हे "इन्दो" सोम! "मघोनः" धनवतः "नः" अस्मान् "आ" आभिमुख्येन "पवस्व" क्षर "विश्वा" विश्वान् "द्विषः" द्वेष्ट्रीन् "अप जहि" मारय च "सखायं" मित्रभूतमिन्द्रम् "आविश" प्राप्नुहि ॥ ७ ॥

अथाष्टमी।

३ १ २ २ १ २ २ ३ १ २
नूचक्षमन्त्वावयमिन्द्रपीतꣳस्वर्विदम्।

३ १ २ ३ १ २
भक्षीमहिप्रजामिषम् ॥ ८ ¶ ॥

---

* 'कलशेषु कलशसम्बन्धिषु ग्रहचमसादिषु'—इति वि०।

† 'अव्यत—गमय'—इति वि०।

‡ ऋ० वे० ९, ७, ३१, १।

¶ ऋ० वे० ९, ७, ३१, २।

हे सोम! "नृचक्षसं" नृणां द्रष्टारं "सर्विदं" सर्वज्ञम्* "इन्द्रपीतं" त्वां सेवमाना वयं "प्रजां" पुत्रादिकाम् "इषम्" अन्नञ्च "भक्षीमहि" भजेम ॥ ८ ॥

अथ नवमी।

३ २ ३१२ १२ ३ १ २ ३१२ १२
वृष्टिन्दिवःपरिस्रवद्युम्नम्पृथिव्याअधि।

१ २ ३१ २
सहोनःसोमपृत्सुधाः ॥ ९† ॥ २

हे "सोम!" त्वं "दिवः" द्युलोकाद् "वृष्टिं" वर्षं "परिस्रव" परितो वर्षं, "पृथिव्या अधि" [अधीति सप्तम्यर्थानुवादो] "द्युम्नम्" अन्नञ्च उत्पादयेति शेषः। "नः" अस्माकं‡ "सहः" बलं "पृत्सु" सङ्ग्रामेषु "धाः" धेहि ॥ ९ ॥ २

इति सामवेदार्थ प्रकाशे उत्तरार्चस्य नवमस्याध्यायस्य प्रथमः खण्डः ॥ १ ॥

---

* 'सर्विदं—सर्वस्य वेत्तारम्'—इति वि०।

† ऋ० वे० ९, ७, ३१, ३।

‡ 'नः—अस्माभ्यम्'—इति वि०।

अथ द्वितीये खण्डे—

सोमःपुनानइति नवर्चं सूक्तम्,

तत्र प्रथमा ।

१ २ ३ १ २ ७ १ २ ३ १ २
सोमःपुनानोअर्षतिसहस्रधारोअत्यविः ।
३ १र २र ७ २
वायोरिन्द्रस्यनिष्कृतम् ॥ १ * ॥

अयं "पुनानः" पावकः "सोमः" अर्षति" गच्छति । कीदृशोऽयम् ? "सहस्रधारः" अपरिमितधारः "अत्यविः" अवि-शब्देन तन्नोमान्युच्यन्ते ; अवेर्लोमभिर्निष्पादितं दशापवित्र मित्यर्थः, तदतिक्रम्य गच्छतीत्यत्यविः । किमर्थम् ? "वायोः" "इन्द्रस्य" च पानायेति शेषः । किम्भूतम् ? "निष्कृतम्" [निरित्येषः समित्येतस्मिन्नर्थे] संस्कृतं पात्रं प्रति ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १र २र
पवमानमवस्यवोविप्रमभिप्रगायत ।
३ २ ३ १ २
सुष्वाणन्देववीतये ॥ २ † ॥

हे "अवस्यवः" रक्षण-कामाः ! उद्गात्रादयो यूयं "पवमानं" शोधकं "विप्रं" विशेषेण देवानां प्रीणयितारं विप्रवद्बुद्धं वा

* ह० वे० ९, ८, १, १ ।
† ह० वे० ९, ८, १, २ ।

[अथवा विप्रइति मेधावि नामसु (निघ० ३,१५,१) मेधाविनम्] "देववीतये" देवपानाय* "सखायम्" अभिषूयमाणं सोमम् "अभि" आभिमुख्येन "प्रगायत" प्रकर्षेण स्तुत ॥ २ ॥

अथ तृतीया ।

१२३ १ २ ३१ २र ३१२
पवन्तेवाजसातयेसोमाःसहस्रपाजसः ।
३ २३ १२
गृणानादेववीतये ॥ ३ † ॥

"पवन्ते" क्षरन्ति "सोमाः" । किमर्थम् ? "वाजसातये" अन्नस्य लाभाय । कीदृशाः ? "सहस्रपाजसः" बहुबलाः नृणां बलप्रदा इत्यर्थः‡ "गृणानाः" [कर्मणि कर्तृप्रत्ययः (३,१,८५)] स्तूयमानाः । पुनः किमर्थम् ? "देववीतये" [देवानां वीतिर्गतिः प्राप्तिलक्षणं वा यस्मिन् स देववीतिः] यज्ञः, तदर्थम् [यज्ञसिद्धिः साक्षात् प्रयोजनं तद्द्वारा वाज-लाभइति ॥ ३ ॥

अथ चतुर्थी ।

३२३ १ २ ३१२ ३१र २र
उतनोवाजसातयेपवस्वबृहतीरिषः ।
२१ २ ३ १ २
द्युमदिन्दोसुवीर्यम् ॥ ४ ¶ ॥

---

* 'देववीतये—देवानां भक्षणाय'—इति वि० ।

† ऋ० वे० ९, ८, १, १ ।

‡ 'सहस्रपाजसः—सहस्र-पान-समर्थाः'—इति वि० ।

¶ ऋ० वे० ९, ८, २, १ ।

हे "इन्दो" "द्युमत्" दीप्तिमत् "सुवीर्य्यं" शोभन-वीर्य्यं सामर्थ्यञ्च "पवस्व" क्षर, शोभन-सामर्थ्योपेता धाराः पवस्वेत्यर्थः। "उत्" अथवा "नः" अस्माकं* "वाजसातये" सङ्ग्रामाय† "बृहतीः" "इषः" द्युमत् सुवीर्यं सम्पादयितुं पवस्वेति योज्यम् ॥ ४ ॥

अथ पञ्चमी।

१ २ ३ १ ८ ३ २ ३ १ २ ३ १ २
अत्याह्यियानानश्नैतभिरसृग्रं वाजसातये।

१ ८ ३ १ २ ३ १ २
विवारमव्यमाशवः ॥ ५ ॥

"वाजसातये" सङ्ग्रामाय "ह्यियानाः" प्रेर्य्यमाणाः आशवः शीघ्रं धावन्ति तद्वत् "हेतभिः" प्रेरकैः प्रेर्यमाणाः "आशवः" शीघ्रगामिनः सोमाः "वाजाय" अन्नलाभाय "अव्यं" "वारं" वालं दशापवित्रं "व्यत्यसृग्रम्" व्यतिसृजन्ते‡ ॥ ५ ॥

---

* 'नः—अस्माकम्'—इति वि०।

† 'वाजसातये अन्नदानार्थम्'—इति वि०।

‡ ऋ० वे० ६, ८, २, २।

¶ "व्यत्यसृग्रम्"—इत्यत्र ऋगादिपादाद् "अति"—इत्युपसर्गः, ऋक्ततीयपादाद् "वि"—इत्युपसर्गश्च सङ्कलितः, "व्यत्या"—इति श्रुतावापदस्यानर्थक्यमपि स्वीकृतमाचार्येण। विवरणकृता तु क्षिनाम दानवदित्यादिना व्याख्यातम्। परन्त्वुभयव्याख्यानं पदप्रत्यविच्छेदादुपेक्षणीयम्, तत्र हि—"व्यत्याः, ह्यियानाः"—इति पाठ-दर्शनात्।

[अथवा विप्रइति मेधावि नामसु (निघ० ३,१५,१) मेधाविनम्] "देववीतये" देवपानाय* "सुवानम्" अभिषूयमाणं सोमम् "अभि" आभिमुख्येन "प्रगायत" प्रकर्षेण स्तुत ॥ २ ॥

अथ तृतीया ।

१२३ १ २ ३१ २र ३१ २
पवन्तेवाजसातयेसोमाःसहस्रपाजसः ।
३ २ ३ १ २
गृणानादेववीतये ॥ ३ † ॥

"पवन्ते" क्षरन्ति "सोमाः" । किमर्थम् ? "वाजसातये" अन्नस्य लाभाय । कीदृशाः ? "सहस्रपाजसः" बहुबलाः नृणां बलप्रदा इत्यर्थः‡ "गृणानाः" [कर्मणि कर्तृप्रत्ययः (३,१,८५)] स्तूयमानाः । पुनः किमर्थम् ? "देववीतये" [देवानां वीतिर्गतिः प्राप्तिलक्षणं वा यस्मिन् स देववीतिः] यज्ञः, तदर्थम् [यज्ञसिद्धिः साक्षात् प्रयोजनं तद्द्वारा वाज-लाभइति ॥ ३ ॥

अथ चतुर्थी ।

३२३ १ २ ३१२ ३१२ २र
उतनोवाजसातयेपवस्वबृहतीरिषः ।
२१ २ ३१२
द्युमदिन्दोसुवीर्यम् ॥ ४ ¶ ॥

---

* 'देववीतये—देवानां भक्षणाय'—इति वि० ।

† ऋ० वे० ९, ८, १, १।

‡ 'सहस्रपाजसः—सहस्र-पान-समर्थाः'—इति वि० ।

¶ ऋ० वे० ९, ८, १, १ ।

हे "इन्दो" "द्युमत्" दीप्तिमत् "सुवीर्यं" शोभन-वीर्यं सामर्थ्यञ्च "पवस्व" क्षर, शोभन-सामर्थ्योपेता धाराः पवस्वेत्यर्थः। "उत्" अथवा "नः" अस्माकं"* "वाजसातये" सङ्ग्रामाय† "बृहतीः" "इषः" द्युमत् सुवीर्यं सम्पादयितुं पवस्वेति योज्यम् ॥ ४ ॥

अथ पञ्चमी।

१ २ ३ १ठ ३ २ ३ १ २ ३ १ २
अत्याह्यियानाननेहसभिरद्रुग्वाजसातये।

१ठ ३ १ २ ३ १ २
विवारमव्यमाशवः ॥ ५ ॥

"वाजसातये" सङ्ग्रामाय "ह्यियानाः" प्रेर्यमाणाः आशवः शीघ्रं धावन्ति तद्वत् "नेहसभिः" प्रेरकैः प्रेर्यमाणाः "आशवः" शीघ्रगामिनः सोमाः "वाजाय" अन्नलाभाय "अव्यं" "वारं" वालं दशापवित्रं "व्यत्यसृग्रम्" व्यतिसृजन्ति‖ ॥ ५ ॥

---

* 'नः—अस्मभ्यम्'—इति वि०।

† 'वाजसातये अन्नदानार्थम्'—इति वि०।

‡ ऋ० वे० ९, ८, २, २।

¶ "व्यत्यसृग्रम्"—इत्यत्र ऋगादिपादाद् "अति"—इत्युपसर्गः, ऋक्ततीयपादाद् "वि"—इत्युपसर्गश्च सङ्कलितः, "व्यत्या"—इति श्रुतावापदस्यानर्थक्यमपि क्षीरतरङ्गिण्याचार्येण। विवरणकृता तु विनाम दानवदित्यादिना व्याख्यातम्। परन्त्वभयत्रापि व्याख्यानं पदप्रत्यविरुद्धत्वादुपेक्षणीयम्, तत्र हि—"अत्याः, ह्यियानाः"—इति पाठ-दर्शनात्।

अथ षष्ठी।

१ २ ३ १ २ ३।१ २ ३ २ ३ १ २
तेन:सहस्रिणं रयिम्पवन्तामासुवीर्यम्।

३ २ ३ २ ३ १ २
स्वानादेवासइन्दवः॥ ६ *॥

"ते" "इन्दवः" सोमाः "नः" अस्माकं "सहस्रिणं" सहस्रसङ्ख्या-युक्तं "रयिं" धनं "सुवीर्यं" च "आ पवन्ताम्"†। कीदृशास्ते? "स्वानाः" सुवानाः स्तूयमाना "देवासः" द्योतनादि-गुणकाः॥

"स्वानाः"-"सुवानाः"—इति पाठौ॥ ६॥

अथ सप्तमी।

१ १ २ ३ १ २ ३ ३ ३।३ ३ १ २
वाश्राअर्षन्तीन्दवोभिवत्सन्नमातरः।

३ १।२ २।२
दधन्विरेगभस्त्योः॥ ७ ‡॥

"वाश्राः" शब्दयन्तः¶ "इन्दवः" सोमाः "अभ्यर्षन्ति" पात्रंप्रति वाश्राः शब्दकारिण्यो "मातरः" मातृभूता गावः

---

* ऋ० वे० ६, ८, २, ३।

† 'आ—आतृपूर्वेण'—इति वि०।

‡ ऋ० वे० ६, ८, २, ४।

¶ 'वाश्राः—वामनशीलाः'—इति वि०।

"वत्सं न" वत्सं यथा प्रत्यागच्छन्ति तद्वत् तद्वत् "गभस्त्योः" बाह्वोः "दधन्विरे" धियन्ते च ॥

"मातरः"-"धेनवः"—इति पाठो ॥ ७ ॥

अथाष्टमो ।

२ ३ १ २ ३ १ २ २ ३ १ २
जुष्टइन्द्रायमत्सरःपवमानःकनिक्रदत् ।

२ ३ २ ३ १ २
विश्वाअपद्विषोजहि ॥ ८ * ॥

"इन्द्राय" "जुष्टः" पर्याप्तः सोमो भवतीति शेषः "मत्सरः सोमः ["मन्देस्त्वसि-कर्मणः"—इति निरुक्तम्] "पवमानः" पूयमानः तादृशः सोमः "कनिक्रदत्" "विश्वाः द्विषः" सर्वान-स्माकं द्वेष्टॄन् "अप जहि" ॥

"पवमानः"-"पवमाना"—इति पाठो ॥ ८ ॥

अथ नवमो ।

३ २ ३ १ २ ३ १ २ ३ १ २
अपघ्नन्तोअराव्णःपवमानाःस्वर्दृशः ।

१ २ ३ १ २
योनावृतस्यसीदत ॥ ९ † ॥ ३

---

* ऋ० वे० ९, ८, २, १ ।

† ऋ० वे० ९, ८, २, २ ।

हे "पवमानाः!" "अराव्णः" अदातॄन् यजमानान् "अप घ्नन्तः" हिंसन्तः "खर्दृशः" सर्वस्य द्रष्टारश्च* यूयम् "ऋतस्य योनौ" यज्ञस्य† स्थाने "सीदत"। अथ सोम-पानार्थमुत्तरलक्षणा देवा ऋतस्य योनौ सीदतेति योज्यम् ॥ ८ ॥ २

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य नवमस्याध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीय-खण्डे—

सोमाअसृग्रमिति नवर्चं विद्यमानमेकं सूक्तम्,

तत्र प्रथमा।

१ २ ३१ २ १२ ३१०१२
सोमाअसृग्रमिन्दवःसुताऋतस्यधारया।

१२ ३१२
इन्द्रायमधुमत्तमाः ॥ १ ‡ ॥

"ऋतस्य" यज्ञार्थं "सुताः" अभिषुताः "मधुमत्तमाः" अतिशयेन माधुर्योपेताः "इन्दवः" सोमाः "इन्द्राय" इन्द्रार्थं "धारया" "असृग्रम्" सृज्यन्ते ॥

"धारया"-"सादने"—इति पाठो ॥ १ ॥

---

* 'खर्दृशः—स्वर्गस्य लोकस्य दर्शितारः'—इति वि०।

† 'ऋतस्य—सत्यस्य यज्ञस्यान्नस्य वा'—इति वि०।

‡ ऋ० वे० ९, ७, ३८, १।

अथ द्वितीया।

३ १२ २२ २१ २ १ २ ३ ३ १ १
अभिविप्राअनूषतगावोवत्सन्नधेनवः।
१ ३ १ १ ३ १ २
इन्द्रꣳसोमस्यपीतये ॥ २ * ॥

"विप्राः" मेधाविनः† "सोमस्य" "पीतये" पानाय "इन्द्रम्" "अभि अनूषत" अभिष्टुवन्ति। तत्र दृष्टान्तः—"धेनवः" प्रीणयित्र्यो गावः "वत्सं न" वत्सं यथा पयः-पानाय अभिशब्दयन्ति तद्वत्॥

"धेनवः"-"मातरः"—इति पाठो॥ २ ॥

अथ तृतीया।

३ ११ १ १ १ ३ १ १ ३ १ ० ० १
मदच्युत्क्षतिसादनेसिन्धोरूर्मावविपश्चित्।
१ २ १ १२ २२ १ २
सोमोगौरीअधिश्रितः॥ ३ ‡ ॥

"मदच्युत्" मदकरस्य रसस्य च्यावयिता सोमः "सदने" यज्ञस्य स्थाने "क्षेति" निवसति। एतदेव विवृणोति—"सिन्धोः" नद्याः "ऊर्मौ" ऊर्मौ तरङ्गे "विपश्चित्" विद्वान् सोमः "गौरी

---

* 'विप्राः—ऋत्विजः'—इति वि०।

† ऋ० वे० ९, ७, २८, २।

‡ ऋ० वे० ९, ७, २८, ४।

अधि"* गौर्यामधि [अधीति सप्तम्यर्थानुवादः, माध्यमिकायां वाचि गौरी गान्धर्वीति वाङ्नामैतत् (निघ० १,११,५-६)] "श्रितः" निवसति ॥ ३ ॥

अथ चतुर्थी ।

३ १ २ २ २ २ ३ २ ३ १ ३
दिवोनाभाविचक्षणोव्यावारे†मह्यीयते ।
२ ३ २ ३ १ २ ३ १
सोमोयःसुक्रतुःकविः ॥ ४ ‡ ॥

"यः" "सुक्रतुः" सुप्रज्ञः "कविः" क्रान्त-कर्मा "विचक्षणः" विद्रष्टा स "सोमः" "दिवः" अन्तरिक्षस्य¶ "नाभा" नाभौ नाभिभूते "अव्याः" अवेः "वारे" वाले "मह्यीयते" पूज्यते ॥४॥

अथ पञ्चमी ।

१२ ३२ ३ २ ३ १ ३ २ १ २ ३ १ २
यःसोमःकलशेष्वा§अन्तःपवित्रआहितः ।
१३ ३ १ २
तमिन्दुःपरिषस्वजे ॥ ५ ‖ ॥

---

* "इदूतौ च सप्तम्यर्थे (१, १, १६)"—इति प्रश्लेषभावः ।

† "व्योवारे"—इति ऋ० पाठः ।

‡ ऋ० वे० ९, ७, २८, ३ ।

¶ 'दिवः—द्युलोकस्य'—इति वि० ।

§ "कलशेष्वा"—इति ऋ० पाठः ।

‖ ऋ० वे० ९, ७, २८, ५ ।

"यः" सोमः "कलशेषु" कुम्भेषु आस्ते, यश्च "पवित्रे" पवित्रस्य "अन्तः" मध्ये "आ हितः" निहितः, "तं" त्वामंशभूतं सोमम् "इन्दुः" तदभिमानी सो देवः "परिषस्वजे" प्रविशति ॥ ५ ॥

अथ षष्ठी ।

१उ ३ १ २ ३१२ २२३१२
प्रवाचमिन्दुरिष्यतिसमुद्रस्याधिविष्टपि ।

२ ३ १ २ ३१२
जिन्वन्कोशम्मधुश्चुतम् ॥ ६ * ॥

"इन्दुः" सोमः । उन्दी क्लेदने (रु० प०)—इत्यस्य रूपम् क्लेदनवांस्त्वं "मधुश्चुतं" मधुनश्चावकं द्रोण-कलशं "जिन्वन्" प्रीणयन् पूरयन्नित्यर्थः । समुद्रस्यान्तरिक्षस्य "अधिविष्टपि" विष्टब्धे स्थाने "वाचं" "प्रेष्यति" प्रेरयति ; पवित्रे पूयमानः शब्दं करोतीत्यर्थः ॥ ६ ॥

अथ सप्तमी ।

११ ३ २ ३ १ २ ३२ ३१ २ ३१ २
नित्यस्तोत्रोवनस्पतिर्धेनामन्तःसबर्दुघाम् ।

३१२ २२ ३ २
हिन्वानोमानुषायुजा ॥ ७ † ॥

"नित्यस्तोत्रः" सन्ततस्तोत्रः "वनस्पतिः" वनानां स्वामी, सोमः "मानुषा" मानुषाणि "युजा" युग्मानि‡ अहोनैकाहा-

---

* ऋ० वं० ६, ७, २८, ६ ।

† ऋ० वं० ६, ७, २६, १ ।

‡ "युजा—योगेन"—दत्त वि० ।

मकानि* "हिन्वानः" प्रीणयन् "सवर्दुघाम्" अमृतसदृशाति-प्रियवचनानि दोग्ध्रीम्† "अन्तः" स्तोतॄणां मध्ये स्थितां "धेनां" स्तुतिरूपां वाचं‡ गृणात्विति शेषः॥

"धेनामन्तसवर्दुघाम्"-"धीनामन्तस्सवर्दुघस्सः"—इति पाठो॥ ७॥

अथाष्टमी।

१ २ ३ २ ३ १ २
आपवमानधारयरयिꣳसहस्रवर्चसम्।

१ ११ ३ १ २
अस्मेइन्दोस्वाभुवम्॥ ८॥¶

हे "पवमान" पूयमान! पुनान! वा "इन्दो" सोम! त्वं "सहस्रवर्चसं" बहुदीप्तिं "स्वाभुवम्" शोभन-भवनं "रयिं" धनम् "अस्मे" अस्मासु "धारय" प्रक्षिपेत्यर्थः॥ ८॥

अथ नवमी।

३ १ ३१ ३ १ ३ १७ ३ १ २ १ १
अभिप्रियादिवःकविर्वि प्रःसधारयासुतः।

१ २ ३ १ २
सोमोद्धिन्वेपरावति॥ ९ §॥ ४

---

* दिनैकसम्याद्यमेकाहम्, द्वादशदिनातिरिक्तसम्याद्यं सत्रम्, अर्वाचीनमन्यत् यागकर्म।

† 'सवर्दुघां—सुखदोग्ध्रीं'—इति वि०।

‡ 'धेनां—धेनूनाम्'—इति वि०। "धेना"—इति निघण्टौ वाङ्नामसु जन-चत्वारिंशत्तमं पदम् (१,११)।

¶ ऋ० व० ६, ७, ३९, १।

§ ऋ० व० ६, ७, ३९, २।

"कविः" क्रान्तकर्मा, "सुतः" अभिषुतः, सोमः "परावति" विप्रकृष्टे देशे स्थितः सन् "विप्रः" मेधावी "सधारया" स्वस्य धारया "दिवः" द्युलोकस्य "प्रियाः" प्रियाणि स्थानानि "अभि" लक्ष्य "हिन्वे" प्रेरयति ॥

"दिवःकविः"-"दिवस्पतिः"—इति पाठो, "हिन्वेपरावति"-"हिन्वेपरानोअर्षति"—इति च,"सुतः"-"कविः"—इति च ॥ ८ ॥ ४

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य नवमस्याध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ उत्तेशुष्मासइति चतुर्थे खण्डे—

विद्यमानं पञ्चर्चं सूक्तं,

तत्र प्रथमा।

२ ३ १ २ ३ १ १ ३ १ २ ३ २
उत्तेशुष्मासईरतेसिन्धोरूर्मेरिवस्वनः।

३ १ २ ३ २
वाणस्यचोदयापविम् ॥ १ * ॥

हे सोम! "ते" तव "शुष्मासः" शुष्मा वेगाः "उत् ईरते" उद्गच्छन्ति। तत्र दृष्टान्तः—"सिन्धोः" समुद्रस्य "ऊर्मेरिव"

---

* ऋ० वे० ७, १, ७, १।

यथा तरङ्गात् "स्वनः" ध्वनिः उद्गच्छति तद्वत्*। स त्वं "वाणस्य" विसृष्टस्य नालस्य ग्रततन्त्वोकस्य वीणा-विशेषस्य† "पवि" [शब्द-नामैतत् (निघ० १, ११)] शब्दं "चोदय" प्रेरय, वेगेन स्यन्दमानस्त्वं विसृष्ट-वाण-शब्द-सदृशं शब्दं कुर्व्वित्यर्थः ॥ १ ॥

अथ द्वितीया।

३ १ ३ १ १ २ १ २ १ १ १
प्रसवेतउदीरतेतिस्रोवाचोमखस्युवः।

२उ १ २ ३ १ २
यदव्यएषिसानवि ॥ २ ॥

हे सोम! "ते" तव "प्रसवे" सति "मखस्युवः" यज्ञ-मिच्छतो यजमानस्य "तिस्रोवाचः" ऋग्यजुःसामात्मकानि त्रीणि वाक्यानि "उदीरते" उद्गच्छन्ति। कदेत्यत आह—"यद्" यदा "सानवि" उच्छ्रिते "अव्ये" अविमये पवित्रे पवित्रम् "एषि" गच्छसि ॥ २ ॥

अथ तृतीया।

२ १ १ ३ १ १ २ १ २ १ २ १ २
अव्यावारैःपरिप्रियꣳहरिꣳहिन्वन्त्यद्रिभिः।

१ २ १ १ २
पवमानम्मधुश्चुतम् ॥ ३ ¶ ॥

---

* 'सिञ्चोरुर्मेरिव—अपामिव सङ्घातः, यादृक् तेषां स्वनः'—इति वि०।

† 'वाणस्य—वीणाविशेषस्य'—इति वि०।

‡ ऋ० वे० ७, १, ७, १।

¶ ऋ० वे० ७, १, ७, २।

"प्रियं" देवानां प्रीतिकरं "हरिं" हरितवर्णं "अद्रिभिः" ग्रावभिः अभिषुतं "मधुश्चुतं" मधुनो रसस्य स्रावयितारं "पवमानं" सोमम् "अव्याः" अवेः "वारैः" वालैः "परि हिन्वन्ति" ऋत्विजः परिप्रेरयन्ति ॥ ३ ॥

अथ चतुर्थी।

१ २ ३ २ २ १ ३
आपवस्वमदिन्तमपवित्रन्धारयाकवे।
३ २ ३ १ २ ३ १ २
अर्कस्ययोनिमासदम् ॥ ४ * ॥

हे "मदिन्तम" मादयितृतम! "कवे" क्रान्तकर्मन्! सोम! "अर्कस्य" अर्चनीयस्य इन्द्रस्य† "योनिम्" उदरभूतं स्थानम् "आसदं" प्राप्तुं‡ "पवित्रम्" अतीत्य "धारया" सम्पातेन "आ पवस्व" आभिमुख्येन क्षर ॥ ४ ॥

अथ पञ्चमी।

१ १ २ १ २ ३ १ ३ १ १
सपवस्वमदिन्तमगोभिरञ्जानोअक्तुभिः।
१ २ ३ १ २
इन्द्रस्यजठरंविश ॥ ५ ¶ ॥ ५

---

* ऋ० वे० ९, ८, १५, ६।

† 'अर्कोद्रोणकलशः अथवा अर्कआदित्यः अथवा आदित्यरश्मयोऽर्काः अथवा अर्का मन्त्रालेषां योनिं स्थानम्'—इति वि०।

‡ 'आसदम्—आसीदम्'—इति वि०।

¶ ऋ० वे० ७, १, ७, ५।

हे "मदिन्तम" मादयितृतम ! सोम ! "अद्भिः" अञ्जन-साधन-भूतैः "गोभिः" गोर्विकारैः पयोभिः "अञ्जानः" अभ्यमानः संस्तूयमानः स त्वं "पवस्व" क्षरत। "अनन्तरम् "इन्द्रस्य" "जठरम्" उदरम् "आविश" प्रविश॥ "एन्द्रस्यजठरं-विश"—"इन्द्रइन्द्रायपीतये"—इति पाठौ॥ ५॥५

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य नवमस्याध्यायस्य चतुर्थः खण्डः॥ ४॥

अथ पञ्चमे-खण्डे—

अयावीतीति ह्यचात्मकम् प्रथमं सूक्तम्,

तत्र प्रथमा।

३ १ ३ १र २र ३ १ १ ३ १ ३ २

अयावीतीपरिस्रवयस्तइन्दोमदेष्वा।

३ १ २ ३ १र २

अवाहन्नवतीर्नव॥ १ *॥

हे "इन्दो" सोम ! "अया" अनेन रसेन "वीती" वीत्यै इन्द्रस्य भक्षणाय "परिस्रव" परिक्षर†। कीदृशेन रसेनेत्यत आह—"ते" तव "यः" रसः "मदेषु" सङ्ग्रामेषु "नवतीर्नव" नवनवति-सङ्ख्याकाः शत्रुपुरीः "अवाहन्" जघान। इमं सोमरसं पीत्वा मत्तः सन्निन्द्रउक्तसङ्ख्याकाः शत्रुपुरीः जघानेति कृत्वा रसो जघानेत्युपचारः॥ १॥

---

* ऋ० ऋा० ६, १, १, ९ (१भा० ५२३०)=ऋ० वे० ७, १, १८, १।

† 'अया—अनया, वीत्या मार्गेण परिस्रव'—इति वि०।

अथ द्वितीया।

१ २ ३ २ ३१ २३ १ २ ३ १ २
पुरःसद्यइत्थाधियेदिवोदासायशम्बरम्।

१ ३ २ ३ २ ३ १ २
अधत्यन्तुर्वशंयदुम्॥ २ *॥

"सद्यः" एकस्मिन्नेवाहनि† "पुरः" शत्रूणां पुराणि सोमरसः अवाहन्। "इत्था धिये" सत्य-कर्मणे‡ "दिवोदासाय" राज्ञे "शम्बरं" शत्रु-पुराणां स्वामिनम् "अध" अथ अनन्तरं "त्यं" तं "तुर्वशं" तुर्वश-नामानं राजानं दिवोदास-शत्रुं "यदुम्" यदु-नामकञ्च राजानमवाहन्। [अत्रापि सोमरसं पीत्वा मत्तः सन्निन्द्रः सर्वमेतत्कार्षीदिति सोमरसे कर्तृत्वमुपचर्यते॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ १२ २२ ३ १ २
परिनोअश्वमश्वविद्गोमदिन्दोहिरण्यवत्।

१ २ ३ २ ३ १ २
क्षरासहस्रिणीरिषः॥ ३ ¶॥ ६

हे सोम! "अश्ववित्" अश्वस्य लम्भकः त्वं "नः" अस्माकम् "अश्वं" "गोमत्" गोयुक्तं "हिरण्यवत्" हिरण्योपेतं पश्वादि-

* ऋ० वे० ७, १, १८, २।

† 'सद्यः—क्षणादेव'—इति वि०।

‡ 'इत्था—इदानीम'—इति वि०।

¶ ऋ० वे० ७, १, १८, ३।

धनञ्च "परि स्रव"। अपिच "सहस्रिणीः" बह्वन्नि* "इषः" अन्नानि स्रव॥

"पविनः"-"परिणः"—इति पाठौ॥ २॥ ६

अथ तृचात्मके द्वितीय-सूक्ते—

तत्र प्रथमा।

५ १ २ ३ २उ ३ २ ३ १२
अपघ्नन्पवतेमृधोपसोमोअराव्णः।

२ ३ १ २ ३ २
गच्छन्निन्द्रस्यनिःकृतम्†॥ १॥

"सोमः" "मृधः" हिंसकान् शत्रून् "अपघ्नन्" मारयन् "अराव्णः" सक्तौ सत्यां धनानामदातुश्च "अप" घ्नन् "इन्द्रस्य" "निष्कृतं" स्थानं "गच्छन्" प्राप्नुवन् "पवते" धारया स्रवति॥ १॥

अथ द्वितीया।

३१ २ ३ १२ ३२३१२ ३ १२ २२
महोनोरायआभरपवमानजहीमृधः।

१ २ ३ २३१२
रास्वेन्दोवीरवद्यशः॥ २॥

---

* 'सहस्रिणीः—सहस्रसङ्ख्याता रसः अन्नानि'—इति वि०।

† "निष्कृतम्"—इति ख० पु० मु०पु० पाठः।

‡ छ० आ० ६, १, २, १४ (२भा० १८४०)=ऋ० वे० ७, १, २२५।

§ अपेत्युपसर्गत्रयदर्शनात् घ्नन्नित्यस्याहनिः।

§ ऋ० वे० ७, १, २३, १।

हे "पवमान!" "इन्दो" सोम! "नः" अस्माकं "महः" महान्ति "रायः" धनानि "आ भर" आहर "मृधः" हिंसकान् शत्रूंश्च "जहि"* मारय "वीरवत्" पुत्रादुपेतं "यशः" कीर्त्तिञ्च "रास्व" अस्मभ्यं देहि ॥ २ ॥

अथ तृतीया।

१ २ ३ २ १ ३ १ २ ३ १ २ ३ १ २
नत्वाग्नतश्चनङ्कुतोराधोदित्सन्तमामिनन्।

१ २ ३ १ २ ३ १ २
यत्पुनानोमखस्यसे ॥ ३ † ॥ ७

हे सोम! "राधः" धनं‡ "दित्सन्तम्" आदातुमिच्छन्तं "त्वा" त्वां "अग्नतश्चन" बहवोऽपि "ङ्कुतः" हिंसकाः अग्नवः¶ "न आमिनन्" न हिंसन्ति। कदा? इत्यत्राह—"यद्" यदा "पुनानः" पूयमानः त्वं "मखस्यसे" धनं धातुमिच्छसि§ ॥३॥७

अथ तृचात्मके तृतीय-सूक्ते—

प्रथमा।

१ १ २ ३ १ २ ३ १ २ ३ १ २
अयापवस्वधारयाययामूर्यमरोचयः।

३ १२ २२ ३२
चिन्वानोमानुषीरपः ॥ १ ‖ ॥

---

* संहितायां "जही"—इति दीर्घान्तं श्रूयते, द्वाच इति (६,१,१२५) सत्र दीर्घः।
† ऋ० वे० ७, १, १३, २।
‡ 'राधः—धनस्य'—इति वि०।
¶ 'ङ्कुतः—चरणशीलाः'—इति वि०।
§ 'मखस्यसे—यज्ञसमये यज्ञं त्वं यदा करोषि'—इति वि०।
‖ ऋ० अ० ६, १, १, ७ (१भा० ५,१४०)=ऋ० वे० ७, १, ११, १।

हे सोम! "मानुषीः" मनुष्याणां हितानि "अपः" उदकानि "क्षिन्वानः" प्रेरयन् त्वं "यया" "धारया" "सूर्य्यम्" "अरोचयः" प्रकाशयसि तया "अया" अनया धारया "पवस्व" क्षर ॥ १ ॥

अथ द्वितीया।

१ २ ३ २३१०३ १ २ ३१४ २४
अयुक्तसूरएतशम्पवमानोमनावधि।

३ १ २ ३ १ १
अन्तरिक्षेणयातवे ॥ २ * ॥

"पवमानः" पूयमानः सोमः "मनावधि" मनुर्मनुष्यस्तस्मिन् मनुष्यइत्यर्थः। "अन्तरिक्षेण" "यातवे" गन्तुं "सूरः" प्रेरकस्यादित्यस्य "एतशम्" [अश्वनामैतत् (निघ० १, १४, १०)] अश्वं "अयुक्त" युङ्क्ते ॥ २ ॥

अथ तृतीया।

३१उ ३ २ ३ १३१ २ ३ १ २
उतत्याहरितोरथेसूरोअयुक्तयातवे।

२३ २ ३ १ १ ३ १
इन्दुरिन्द्रइतिब्रुवन् † ॥ ३ ‡ ॥ ८

"उत" अपिच "इन्दुः" सोमः "इन्द्र इति ब्रुवन्" "त्याः"

---

* ऋ० वे० ७, १, ३१, ३।

† "ब्रुवन्"—इति ख० पु० पाठः।

‡ ऋ० वे० ७, १, ९, १, ४।

तान् "हरितः" हरितवर्णान् अश्वान् "सूरः" सूर्यस्य "रथे" "यातवे" गन्तुम् "अयुक्त" युनक्ति*॥

"रथे"-"दश"—इति पाठौ॥ ३॥ ८

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य नवमस्याध्यायस्य पञ्चमः खण्डः† ॥ ५॥

अथ षष्ठे खण्डे‡ः—

अग्निंवइति ह्यचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

३ १ २ ३ २३ १ २ ३ २ ३
अग्निंवोदेवमग्निभिःसजोषा
१ २ ३१२३१२
यजिष्ठन्दूतमध्वरेकृणुध्वम्।
१२ २३१२ ३ २ ३
योमर्त्येषुनिध्रविर्हितावा
१ २ ३१ २ ३ २
तपूर्मूर्द्धाघृतान्नःपावकः॥ १॥¶

---

* 'एतदुक्तम्भवति—यदा सोमस्य इन्द्रस्य चाङ्गानं क्रियते तदा सूर्यो रथे नियुक्तः स्यात् यातवे गमनाय'—इति वि०।

† 'उक्तं वक्ष्यमाणम्'—इति वि०।

‡ 'इदानीमाज्यानि'—इति वि०।

¶ य०वे० १५, ६९=ऋ० वे० ५, २, ३, १।

हे देवाः ! "वः" यूयं "देवं" द्योतमानम् "अग्निम्" "अध्वरे" कौटिल्य-रहिते यज्ञे "दूतं" "कृणुध्वं" कुरुत । कीदृशम् ? "अग्निभिः" अन्यैः "सजोषा" सजोषसम् [द्वितीयार्थे प्रथमा (३, १, ८५)] "यजिष्ठं" यष्टृतमं* "यः" अग्निः देवोऽपि सन् "मर्त्तेषु" "निधृविः" नितरां ध्रुवस्तिष्ठति । कीदृशः ? "ऋतावा" यज्ञवान् सत्यवान् वा "तपुर्मूर्द्धा" तापकं तेजः† "घृताग्नः पावकः" शोधकं तमग्निं दूतं कृणुध्वमिति योजना॥१

अथ द्वितीया ।

२ ३ २ ३ १२ २२ ३ २
प्रोथदश्वोनयवमेविष्यन्
३ १ ३ २ ७ १ २ ३ १ २
यदामहःसंवरणादयस्थात् ।
१ २ ३ २ ३ १ २ ३ १२
आदस्यवातोअनुवातिशोचि
१२ ७ १ २ ३ १ २
रधस्मतेव्रजनङ्कृष्णमस्ति ॥ २ ‡ ॥

"यवसे" घासे "अविष्यन्" भक्षयन्‌ण "प्रोथत्" शब्दं कुर्वन् सञ्चरन् वा "अश्वो न" अश्व इव "महः" महतः "संवर-

---

* 'यजिष्ठं—यज्ञनीयम्'—इति वि० ।

† 'तपुः—तापनशीलः, मूर्द्धा—प्रधानभूतः'—इति वि० ।

‡ ऋ० वे० ४, २, ३, २ ।

¶ 'यवसे—सन्निधानभूते । अथवा द्वितीयार्थे सप्तमी । यवसमविष्यम् भक्षयन्'—इति वि० ।

णात्" निरोधात् दावरूपोऽग्निः "यदा" "अस्थात्" संवृतेषु द्रुतेषु वितिष्ठते, "आत्" तदा "अस्य" अग्नेः "रोचिः" "अर्चिः" "अनु वातः वाति"। अथ प्रत्यक्षस्तुतिः—"अध" अथानन्तरं हे अग्ने ! "ते" तव "व्रजनं" वर्त्म "कृष्णमस्ति"। "स्म"—इति पूरणम् ॥ २ ॥

अथ तृतीया ।

१ २ २ १ २ ३ २ उद्यस्थतेनवजातस्यवृष्णो
१ १ २ ३ १ २ १ २
ग्नेचरन्त्यजराइधानाः ।
२ २ १ २ ३ २ ३ १ २ ३
अच्छाद्यामरुषोधूमएषि
२ ३ १ २ ३ १ २ ३ २ ३ १
सन्दूतोअग्नईयसेहिदेवान् ॥ ३ * ॥ ९

हे "अग्ने ! " "नवजातस्य" नूतन-प्रादुर्भूतस्य "वृष्णः" वर्षितुः "यस्य" "ते" तव "अजरा" जरा-रहिता ज्वाला "इधानाः" दृश्यमाना या "उच्चरन्ति" उद्गच्छन्ति। हे "अग्ने !" "अरुषः" आरोचमानः "धूमः" धूमयुक्तः "दूतः" त्वं "द्यामच्छ" † द्युलोकं प्रति "सनेषि" सम्यग् गच्छसि, पश्चात् तत्रत्यान् "देवान्" इन्द्रादीन् "ईयसे हि" प्राप्नोषि खलु, [यद्वा, हे

* ऋ० वे० ५, २, ३, ३।

† 'अच्छ—आप्नुम्'—इति वि०। संहितायाम् "अच्छा"—इति दीर्घान्तं अव्ययं, तत्र निपातस्य चेति दीर्घः।

अग्ने ! त्वदीयो यो धूमः द्युलोकं प्रति एषि गच्छति, पुरुष-व्यत्ययः ; त्वमपि देवान् प्राप्नोषि ॥

"एषि"-"एति"—इति पाठो ॥ ३ ॥ ९

अथ तमिन्द्रमिति ऋचात्मकं हितीयं सूक्तम्,*

तत्र प्रथमा ।

१र २र २ २ १ २ ३ १ १
तमिन्द्रंवाजयामसिमहेवृत्रायहन्तवे ।
१ २र ३ १ २
सवृषावृषभोभुवत् ॥ १ † ॥

यजमाना आहुः—"तं" पूर्वोक्तम् "इन्द्रं" "वाजयामसि" वाजयामः सोमेन स्तुतिभिः "वाजवन्तं" बलवन्तं कुर्मः । किमर्थम् ? "महे" महान्तं "वृत्राय" अपामावरकं वृत्रासुरं "हन्तवे" हन्तुं सोम-पानेन मत्तः स्तुतिभिर्वा स्तुतः सन् वृत्रहन्तवे [वाजयामसि—वाजवन्तं करोतीत्यर्थे "तत्करोतीति (३, १, २५ वा०) णिच्, "णाविष्ठवत् (३, १, २५वा०)"—इति णेरिष्ठवद्भावात् "टेः (६, ४, १५५)"—इति टि-लोपः, "विन्मतोर्लुक् (५, ३, ६५)"—इति मतुपो लुक्] । "वृषा" धनानां सेक्ता दाता "सः" इन्द्रः "वृषभः" अस्माकं स्तोतॄणां सोमस्य दातॄणां धनादि-सेचको दाता "भुवत्" भवतु ॥ १ ॥

---

* 'मैत्रावरुणमाज्यम्'—इति वि० ।

† ऋ० मा० २, १, ३, ५ (१मा० २९९४०)=सा० वे० १, ६, २१, १ ।

अथ द्वितीया।

२ १ १र २र ३ १र २र ३ १र २र १ २
इन्द्रःमदामनेकृतओजिष्ठःसबलेहितः।
३ २ ३ २उ ३ २
द्युम्नीश्लोकीससोम्यः॥ २ *॥

"सः" इन्द्रः "दामने" स्तोतृभ्यः धनादि-दानायैव "कृतः" प्रजापतिना सृष्टः। किञ्च "ओजिष्ठः" ओजस्वितमः "सः" एवेन्द्रः "बले" बलवति सोमे प्रजापतिना सृष्टिकाले निहितः सोम-पानार्थञ्च निहित इत्यर्थः। "द्युम्नी" ["द्युम्नं द्योततेर्यशो वान्नं वेति (निरु० ने० ५, ५) यास्केनोक्तत्वात्] यशस्वी अन्नवान् वा अतएव "श्लोकी" श्लोकः स्तुतिः तद्वान्† "सः" इन्द्रः "सोम्यः" सोमार्हो भवतिः॥

"बले"-"मदे"—इति पाठौ॥ २॥

अथ तृतीया।

१ २उ १ १र २र ३ १ २ ३ १ २
गिरावज्रोनसम्भृतःसबलोअनपच्युतः।
३ २ १ १र २र
ववक्षउग्रोअस्तृतः॥ ३ ¶॥ १०

* ऋ० वे० ६, ६, २२, ३।

† 'श्लोकी—श्लोकैर्मन्त्रैर्योऽतिशयो गीयते सः श्लोकी'—इति वि०।

‡ 'सोमैर्थः सम्बध्यते स सोम्यः'—इति वि०। "सोममर्हति यः"—इति पा० ४, ४, १३७।

¶ ऋ० वे० ६, ६, २२, ४।

"गिरा" स्तुति-लक्षणया वाचा स्तोतृभिः "सम्भृतः" उत्पादितः तीक्ष्णीकृतः। तत्र दृष्टान्तः—"वज्रेण" वज्रं आयुधं तत्कर्तृभिः शितधारो यथा भवति तीक्ष्णीक्रियते तद्वत् स्तोतृभिः स्तुत्या सम्भृतः, अतएव "सबलः" बल-सहितः तस्माद् "अनपच्युतः" परैरप्रच्युतः अनभिगतदृत्यर्थः, तादृशः "उग्रः" महान् "अस्तृतः" युद्धे शत्रुभिरहिंसितइन्द्रः "ववक्षे" स्तोतृभ्यो धनादिकं वोढुमिच्छति॥

"उग्रः"—"ऋष्वः"—इति पाठो॥ ३॥ १०

इति सामवेदार्थप्रकाशे उत्तरार्चस्य नवमस्याध्यायस्य षष्ठः खण्डः* ॥ ६॥

अथ सप्तम-खण्डे†—

अध्वर्योअद्रिभिरिति ऋचात्मकं प्रथमं सूक्तम्,‡

तत्र प्रथमा¶॥ ॥

१ २ ३ १ ७ ३ १ २ २ २ ३ २ ३ १ २

अध्वर्योअद्रिभिःसुतःसोमम्पवित्रआनय।

३ १ २ ३ १ २

पुनाहीन्द्रायपातवे॥ १॥

---

* 'इन्द्रेऽग्नान्मोहईदित्येन्द्राग्नम्'—इति वि०। अतोऽनन्तरं विनियोज्यमस्तीति तदभिप्रायः। श्रुतञ्च तदिहैव द्वितीये (२,१, ८,१ = ३भा० ३११ष्ट०)प्रपाठके।

† 'उक्तान्याज्यानि, इदानीं माध्यन्दिनः पवमानः'—इति वि०।

‡ 'गायत्रप्रभृतीनि सामानि ब्राह्मणेनोक्तान्यार्षाणि—इति वि०।

¶ ऋ० मा० ९, १, २, ३ (१भा० ५०ष्ट०)=ऋ० वे० ७, १, ८, १।

हे "अध्वर्यो !" "अद्रिभिः" ग्रावभिः "सुतम्" अभिषुतं "सोमं" "पवित्रे" "आनय" प्रापय। एवदेव दर्शयति— "इन्द्राय" इन्द्रस्य "पातवे" पानाय "पुनाहि" पुनीहि पावय ॥

"आनय"-"आसृज"—इति पाठो, "पुनाहि"-"पुनीहि"—इति च ॥ १ ॥

अथ द्वितीया।

१११२ ३ १ २ १२उ कर २२
तवत्यइन्दोअन्धसोदेवामधोर्व्याशत।
१२ ३ १ २
पवमानस्यमरुतः ॥ २ * ॥

हे "इन्दो" सोम ! "तव" सम्बन्धिनं "मधोः" मदकरस्य "पवमानस्य" पूयमानम् "अन्धसः" अन्नं [तत्र कर्मणि षष्ठी (३, १, २५)] "त्ये" ते इमे "देवाः" इन्द्रादयो "मरुतश्च"† एवम्भूतमन्नं "व्याशत" व्याप्नुवन्त्वित्यर्थः ॥

"व्याशत"-"व्यश्नुत"—इति पाठो ॥ २ ॥

अथ तृतीया।

३ १ ३ १ २ ३१उ ३ १ २ ३ १ १
दिवःपीयूषमुत्तमꣳसोममिन्द्रायवज्रिणे।
१ २ ३ १ २
सुनोतामधुमत्तमम् ॥ ३ ‡ ॥ ११

* ऋ० वे० ७, १, ८, २।

† 'मरुतः—मरुतो देवाः अथवा मरुतः रश्मयः'—इति वि०।

‡ ऋ० वे० ७, १, ८, २।

हे अध्वर्यवः ! यूयं "मधुमत्तमम्" अतिशयेन माधुर्योपेतं "दिवः" द्युलोकस्य "पीयूषम्" अमृतभूतम् "उत्तमं" श्रेष्ठं "सोमं" "वज्रिणे" वज्रवते "इन्द्राय" "सुनोत"* अभिषुणुत ॥ ३ ॥ ११

॥ वैरूपम् † ॥ अध्वर्यो२३४आ । द्रिभायिःमू३ताइम । सोमांपा२३४वो । त्राआ१नाया२ । पुना२३ । हीन्द्रा३४ औहोवा । यपात्तवे२३४५ ॥(१) तवत्या२३४ई । दो आन्धाइसाइः । देवा२मा२३४धोः । वाया१ग्नाता२ । पवा२३ । माना३४औहोवा । स्यमरुता२ ३ ४ ५ः ॥(२) दिवःपी२३४यू । षमुत्ताइमाइम् । सोमा२मा२३४ईन्द्रा । यावज्रायिणा२यि । सुनो२३ । तामा३४औहोवा । धुमत्तमा२३४५म्(३) ॥ २० ॥ [१]

---

* संहितायां "सुनोता" इत्याकारान्तं श्रूयते, तच्च द्व्यचोतस्तिङइति (६. ३, १३५) योगविभागादोषः ।

† "गायत्रं वैरूपम्"—इति स्व० पु० पाठः ।

‡ ऋ० सं० ८० १अ० २०मा० ।

॥ आग्नुभार्गवम् ॥ अध्वर्यो अद्रिभिः सूत्ताम्। सोममभ्यवाशयि। त्वा२ना२३४या। पुनाहा१यिन्द्रा २। यपा३। ता२३४वोऽहाय ॥(१) तवत्यइन्दो। अ न्धा३सः। दायिवामधोः। वाया२भा२३४ता। पवा मा१ना२। सुमा३। रू२३४तोऽहाय ॥(२) दिवःपी यूषम्। उत्ता३माम्। सोममिन्द्रा३। यावा२ज्ञा२३ ४यिणायि। सुनोता१मा२। धुमा३। ता२३४मोऽ हाय(३) ॥ १ * ॥ [२]

॥ मार्गीयवम् † ॥ अध्वौहोवा। र्यो आ२। द्रिभा यिः सू२३४ताम्। सोममभ्यवि। त्वाना१या२। पुना। हा। औ३होयि। हो२३४न्द्रा। या२या२३४औहोवा। ए३। तवे२३४५ ॥(१) तवौहोवा। त्वा२यि। दो

* ऋ० गा० ४प्र० २ऋ० १सा०।

† "मार्गीयवाद्यम्"—इति ख० पु० पाठः।

अन्धा२३४सः। देवामधोः। वियाशा१ता२। पवा।
हा। औ३होयि। मा२३४ना। स्या२मा२३४औहो
वा। ए३। हुता२३४५:॥(२) दिवौहोवा। पीयू२।
षमुत्ता२३४माम्। सोममिन्द्रा। यवाज्रा१यिणा२यि।
सुनो। हा। औ३होयि। ता२३४मा। धू२मा२३४
औहोवा। ए३तमा२३४५म्(३)॥ २ *॥ [३]

॥ सौमित्रम्॥ अध्वर्योअद्रिभिःसुता३मे। सोम
म्पवित्रे। आ२१२३। नया३४३। पू२३ना। होन्द्रा
२ओ२३। यपोवा। ता५ ६हायि॥(१) तवत्यइन्दो
अन्धसा३ए। देवामधोर्वि। आ२१२३। प्रता ३ ४ ३।
पा२३वा। माना२ओ२३। स्यसोवा। हु५ तो ६ हा
यि॥(२) दिवःपीयूषमुत्तमा३मे। सोममिन्द्राय। वा

* ऋ० मा० ४प्र० २अ० २सा०।

२ १ २ ४ १
२१२३। जिणा३४३यि। सू२३नो। तामा२ओ२३।
४ ५ ४ ५
धुमोवा। ता५मोई३हायि(३) ॥ ३ * ॥ [४]

१ २ १ २ ४
॥ ऐटतम् ॥ अध्व। एआध्वा। र्योअद्रि। भा३
१ ३ ५ २ ४ ७ ५ २ २
यिः। द्रारयिभा२३४औहोवा। मू२३४ताम्। सोमा
३ ५ ३ २ १ ८ ५ २ ३
म्मा२३४वी। त्रआ३। वा२आ२३४औहोवा। ना२३
५ २ ३ ५ ३ २ १ ६ ५ २
४या। पुनाहा२३४यिन्द्रा। यपा३। या२पा२३४औ
२ ३ ५ १ २ १ २ २
हेवा। ता२३४वे ॥(१) तव। एतावा। त्यइन्दो। आ३।
१ ३ ५ २ २ ३ ५ २ ६ ५
दो२आ२३४औहोवा। धा२३४माः। देवामा२३४धोः।
३ २ १ ३ ५ २ २ ३ ५ २ ३
विया३। वा२या२३४औहोवा। शा२३४ता। पवामा
५ ३ २ १ ३ ५ २ २ ६
२३४ना। स्यमा३। स्या२मा२३४औहोवा। रू२३४
५ १ २ १ २ २ २ १
ताः ॥(२) दिवः। एदायिवाः। पीयूषम्। ऊ३। षा
२ ५ २ २ ३ १ २ २ ६ ५
२मू२३४औहोवा। ता२३४माम्। सोमामा२३४यिन्द्रा।

* ऊ० गा० ४प्र० २च० २सा०।

३ २ १ ३ ५ ४ ३ ५ २ ३
यवाइ। या२वा२३४औहोवा। औ२३४णे। सुनोता
५ ४ ३ १ ३ ५ ४ ३
२३४मा। धुमा३। धू२मा२३४औहोवा। ता२३४
५
माम्(३)॥ ४ *॥ [५]

॥ धुरासाकमश्वम्॥ अध्वर्य्योआ३। हो३हो३१। द्रि
२ ३ २ १
भिःसुताइम्। हौ३हो३१यि। सोमम्यवाइयि। हौ३
२ १ ४ ३ २ १
हो३१। चमानयाइ। हौ३हो३१यि। पुनाहीन्द्रा३।
३ २ ४ ३ २ १
हौ३हो३१। यपातवाइयि। हौ३हो३१२३४५ई। डा॥(१)
१ २ ३ २ ४ ३
तवत्यआइ। हौ३हो३१। दोअन्धसाइः। हौ३हो३१
२ ४ ३ १ ३
यि। देवामधोइः। हो३हो३१यि। वियाशताइ। हौ
२ ४ ३ १
३हो३१यि। पवमानाइ। हौ३हो३१। स्वमरुताःइ।
३ २ ४ ३ १
हौ३हो३१२३४५ई। डा॥(२) दिवःपीयूइ। हौ३हो३
१ २ ४ ३ १
१। पमुत्तमाइम्। हौ३हो३१यि। सोममिन्द्राइ।

* क० मा० ४प्र० ७अ० ४मा०।

ह्वौ३हो३१। यवज्रिणा३यि। ह्वौ३हो३यि। सुनोतामा
३। ह्वौ३हो३१। धुमत्तमा३म्। ह्वौ३हो३१२३४५ई।
डा(३) ॥ ५ * ॥ [६]

॥ विलम्बसौपर्णम् ॥ अध्वर्यो अद्रिभिःसुतम्। ईय
ईयाहायि। सोमम्यवित्रआ। हाइहाइयि। ना२३४
या। पूनाउवाउ। हार्यिन्द्रा२३४औहोवा। यपा
तवे२३४५ ॥(१) तवत्यइन्दोअन्धसः। ईयईयाहायि।
देवामधोर्विया। हाइहाइयि। आ२३४ता। पावाउ
उवाउ। मार्ना२३४औहोवा। स्यमरुता२३४५ः ॥(२)
दिवःपीयूषमुत्तमम्। ईयईयाहायि। सोममिन्द्रायवा।
हाइहाउ। आर२३४यिणायि। मूनाउवाउ। ताम
२३४औहोवा। धुमत्तमा२३४५म्(३) ॥ ६ † ॥ [७]

* ऊ० गा० ४प्र० २ब० ५सा०।

† ऊ० गा० ४प्र० २ब० ६सा०।

॥ सौपर्णम् * ॥ अध्वर्य्यओवा। द्रायिभायिःसू२३४
ताम्। सोमाम्यवायि। त्रआ२ना२३४या। पू२ना।
ह्वा२३यिन्द्रा। यापातवा। औ३ह्वोवा ॥(१) तवत्य
ओवा। दो अन्धा२३४साः। देवामधाः। विया२शा
२३४ता। पा२वा। मा२३ना। स्यामरुता। औ३
ह्वोवा ॥(२) दिवःपीयोवा। षामुत्ता२३४माम्। सो
मामिन्द्रा। यवा२ज्रा२३४यिणायि। सू२नो। ता२३
मा। धूमत्तमाम्। औ२३ह्वोवा। हो५ई। डा(३)
॥ १३ † ॥ [८]

॥ रोहितकुलीयोत्तरम् ॥ अध्वर्य्याअद्रिभायिः। सु
ता२म्। सोमम्यवित्रआना२३या। पूना२ह्वायिन्द्रा२१।
यपो२३४वा। ताप्रवोऽह्वायि ॥(१) तवत्यइन्दोआ।

* "ऐडसौपर्णम्"—इति ख० पु० पाठः।

† ऋ० गा० १६प्र० २ऋ० १३सा०।

१ १२२ २ २१२ २ १ १
धसा२२ः। देवामधोर्विंयाशा२३ता। पावा२२माना२३।
२१ ५ ४ ५ २१ २२१२२१ २
स्वमो२३४वा। रू५तोई३हायि॥(२) दिवःपीयूषम्। त
१२ २ २१ २ १ १
मा२म्। सोममिन्द्रायवज्रा२३यिणायि। सूनो२तामा
२१ ५ ४ ५
२३। धुमो२३४वा। ता५मोई३हायि(३)॥ १४ *॥ [८] ११

धर्त्तादिवइति ऽचात्मकं द्वितीयं सूक्तम्,†

तत्र प्रथमा।

३ २ ३ २ ३ २ ३
धर्त्तादिवःपवतेकृत्व्योरसो
१ २ ३ १ २ ३ २ ३ १ २
दक्षोदेवानामनुमाद्योनृभिः।
१ २ १ २३ ३ १२ २२ ३
हरिःसृजानोअत्योनसत्वभि
२ ३ १ २ ३ २
र्वृथापाजाँसिक्रणुषेनदीष्वा॥ १ ‡॥

---

* ऋ० गा० १६प्र० १अ० १४मा०।

† 'अभिसोमासआयवइति बृहत्य, धर्त्तादिवो जगत्यः त्रिष्टुभो रूपेण'—इति वि०। यथा पूर्वमभिसोमासइति (२, २, ८, १=३मा० ४०१ऋ०) सप्तैवात धर्त्ता दिवइति भावः।

‡ ऋ० मा० ६, २, २, ५ (२मा० १८१ऋ०)=ऋ० वे० ७, ३, १, ९।

"धर्त्ता" सर्वस्य धारकः सोमः "दिवः" अन्तरिक्षात् अन्तरिक्षस्थितात् द्यावापृथिवीभ्यां "पवते" पूयते । कीदृशः सोमः ? "कृत्व्यः" कर्त्तव्यः शोध्यइत्यर्थः । "रसः" रसात्मकः । "देवानां" "दक्षः" बलप्रदः [यद्वा, दक्षः प्रवर्धनीयो देवानामर्थाय] । तथा "नृभिः" नेतृभिः ऋत्विग्भिः "अनुमाद्यः" अनुमादनीयः स्तुत्यो वा । शेषः प्रत्यक्षकृतः । "हरिः" हरितवर्णः । "सत्वभिः" प्राणिभिः अस्मदादिभिः "सृजानः" सृज्यमानः "अत्यो न" अश्वइव [स यथा शिक्षितोऽनायासेन गच्छति तद्वत्] "वृथा" अप्रयत्नेन "पाजांसि" बलानि स्वीयान् "कृणुषे" कुरुते "नदीषु" वसतीवरीषु ताभिरित्यर्थः ॥

"कृणुषे"-"कृणुते"—इति पाठौ ॥ १ ॥

अथ द्वितीया ।

२ ३ १२३ १ २ ३ १२ ३
गूरे॑ानधत्तआयुधागभस्त्योः
२ १ १ ३१८ २८
स्वाऽ३ःसिषासन्थिरेागविष्टिषु ।
१२ ३ १ २ ३१२ ३२ ३
इन्द्रस्यसूष्ममीरयन्नप॑स्युभि
१ ३ ३ १ २ ३ १ २
रिन्दुर्हिन्वानोअज्यतेमनीषिभिः ॥ २ * ॥

अयं सोमः "गभस्त्योः" हस्तयोः "आयुधा" आयुधानि

---

* ऋ० वे० ७, ३. १, २ ।

"शूरो न" शूर इव "धत्ते" धारयति,* "स्वः" स्वर्गं सुख-साधनं यज्ञं वा "सिषासन्" सम्भक्तुमिच्छन् "रथिनः" रथवान् [रथादिन-प्रत्ययः] "गविष्टिषु" यजमानस्य गवामेषणेषु सत्सु यजमानोऽहं गो-सम्भजनाय रथवानित्यर्थः। "इन्द्रस्य" "शुष्मं" बलम् "ईरयन्" प्रेरयन् "इन्दुः" सोमः देवः "अपस्युभिः" कर्मेच्छुभिः† "मनीषिभिः" मेधाविभिः ऋत्विग्भिः "हिन्वानः" प्रेर्यमाणः "अज्यते"‡ गोभिः ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २ ३ १ ०
इन्द्रस्यसोमपवमानऊर्मिणा

३ १ २ ३ २ ३ १ २
तविष्यमाणोजठरेष्वाविश।

१ २ ३ २ ० २ ३ १ २
प्रनःपिन्वविद्युदभ्रेवरोदसी

३ २ ३ २ १ १ २ ३ १ २
धियानोवाजाऽउपमाऽइशश्वतः ॥ ३ ¶ ॥ १२

हे "सोम!" "पवमान" पूयमान! त्वं "तविष्यमाणो" वर्द्धिष्यमाणः§ सन् "इन्द्रस्य" "जठरेषु" "ऊर्मिणा" प्रभूतया

---

"एषः" सोमः "हितः" निहितः हविर्द्धानि "वि नीयते" तस्मात् स्थानात् आहवनीयं प्रति "अन्तः" तयोर्मध्यदेशे "शुन्ध्यावता" शुद्धिमता "पथा" मार्गेण "यदि" यदा "तुञ्जन्ति" प्रयच्छन्ति देवेभ्यः "भूर्णयः" भरणशीलाः¶ अध्वर्य्वादयः; तदा विनीयत इति समन्वयः॥

"शुन्ध्यावता"-"शुभ्रावता"—इति पाठो॥ ४॥

---

* ऋ० वे० ९, ८, ५, ७।

† 'इषः—धानाः, करम्भाः, पुराडाशाः'—इति वि०।

‡ ऋ० वे० ९, ८, ५, ३।

¶ 'भूर्णयः—भ्रमणशीलाः'—इति वि०।

अथ पञ्चमी।

२२३ १ २ ३ २ ३ १ ३ २ १ २
एषरुक्मिभिरीयतेवाजीशुभ्रेभिरंशुभिः।

२३ १ २ ३ १२
पतिःसिन्धूनाम्भवन्॥ ५ *॥

"एषः" सोमः "रुक्मिभिः" अध्वर्य्वादिभिः† सह "ईयते" गच्छति। कीदृश एषः? "वाजी" वेगवान् "शुभ्रेभिः दीप्तैः अंशुभिर्विशिष्टः [अथवा रुक्मिभिरित्येतदप्यंशु-विशेषणम्] "सिन्धूनां" स्यन्दमानानां रसानां "पतिः" "भवत्" नीयतइति॥ ५॥

अथ षष्ठी।

३१२ २२ ३१ २३ १ १ ३ २ १ २
एषशृङ्गाणिदोधुवच्छिशीतियूथ्योऽवृषा।

३ १२ २२ ३१ १
नृम्णादधानओजसा॥ ६ ‡॥

"एषः" सोमः "शृङ्गाणि"¶ शृङ्गवदुन्नतानंशून् अभिषवकाले "दोधुवत्" धुनोति "यूथ्यः" यूथार्हो यूथपतिः "वृषा" वृषभः यथा "शिशीते" तीक्ष्णे शृङ्गे धुनोति तद्वत्। कीदृशः? "ओजसा" बलेन "नृम्णा" नृम्णानि धनानि "दधानः" अस्मदर्थं धारयन्॥ ६॥

---

* ऋ० वे० ६, ८, ५, ५।

† 'रुक्मिभिः—सुवर्णहस्तैर्ऋत्विग्भिः'—इति वि०। यज्ञतो रुक्मौ यजमानः, तदाह कात्यायनः—"रुक्म मधः पदं कुरुते स्त्योरिति (१५, ५, २६)"—इत्याद्यनुसन्धेयम्। ‡ ऋ० वे० ६, ८, ५, ४।

¶ 'षष्ठवचनं द्विवचनस्य स्थाने द्रष्टव्यम् शृङ्गे'—इति वि०।

अथ सप्तमी।

३१२ २२ ३१२ २२ ३१२ २२
एषवसूनिपिब्दनःपरुषायायिवाँअति।
१ ३ १ २
अवग्रादेषुगच्छति ॥ ७ * ॥

"वसूनि" आच्छादकानि रक्षांसि "पिब्दनः" पीड़यन्† "एषः" सोमः "परुषा" पर्वणा "अति" अतिक्रम्य "ययिवान्" गच्छन् "ग्रादेषु" ग्रातनीयेषु रक्षःसु "अव गच्छति"‡ ॥

"पिब्दनः"—"पिब्दना"—इति पाठो ॥ ७ ॥

अथाष्टमी।

१२३२उ १२३१२ ३१२
एषमुत्यन्दग्रत्निपोहरिँहिन्वन्तिपातवे।
३ ७ ३१२
स्वायुधम्मदिन्तमम् ॥ ८ ¶ ॥ ३

"हरिं" हरितवर्णं "त्यं" तम् "एतम्" एतमेव§ सोमं "दग्रत्निपः" दग्र-सङ्ख्याका अङ्गुलयः‖ "पातवे" गमनाय**

---

* ऋ० वे० ९, ८, ५, ६।

† 'पिब्दनः—पिबमानः, सोमलक्षणानि'—इति वि०।

‡ 'बलात्कारेण'—इति वि०।

¶ ऋ० वे० ९, ८, ५, ८।

§ 'उ—इति पदपूरणे'—इति वि०।

‖ 'दग्रत्निपः—सर्वसमर्था अङ्गुलयः'—इति वि०।

** 'पातवे—प्रापणार्थम्'—इति वि०।

"हिन्वन्ति" प्रेरयन्ति। कीदृशमेनम्? "स्वायुधं" शोभनायुधं* "मदिन्तमं" मादयितृतमं रक्षोहनन-प्रदर्शनाय स्वायुध-शब्द-श्रवणम्॥

"हरिं हिन्वन्त्यातवे"-"मृजन्तिमग्रुवीतयः"—इति पाठौ॥ ८॥ ३

इति सामवेदार्थप्रकाशे उत्तरार्चस्य दशमस्याध्यायस्य द्वितीयः खण्डः॥ २॥

अथ तृतीय-खण्डे--

एषउस्येति षड्र्चं सूक्तम्,

तत्र प्रथमा।

३ २ १ २ ३ १ २ ३ २ ३ ३ १ २
एषउस्यवृषारथोव्यावारेभिरव्यत।
२ ३ १ २ ३ १ २
गच्छन्वाजꣳसहस्रिणम्॥ १†॥

"स्यः" सः प्रसिद्धः "एषः" अभिषुतः सोमः "वृषा" वर्षिता "रथः" रंहण-स्वभावः "अव्यावारेभिः" अवेर्वालेः दशापवित्रेण "अव्यत" द्रोणकलशं प्रति गच्छति "वाजम्" अन्नम् "सहस्रिणं"

---

* 'स्वायुधं—शोभनैर्ज्ञायुधैर्युक्तम् अथवा परशु-पाश-प्रभृतिभिः'—इति वि०।

† ऋ० वे० ९, ८, २८, १।

सहस्र-सङ्ख्याकं यजमानाय प्रदातुं "गच्छन्" द्रोणकलशं प्रविशन्नित्यर्थः* ॥

"अव्यावारेभिरव्यत"-"अव्योवारेभिरर्षति"—इति पाठौ॥ १ ॥

अथ द्वितीया।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
एतन्त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः।

२ ३ १ २ ३ १ २
इन्दुमिन्द्राय पीतये ॥ २ † ॥

"एतम्" "इन्दुं" "हरिं" हरितवर्णं सोमं "त्रितस्य" एतन्नामकस्य ऋषेः "योषणः" अङ्गुलयः‡ "अद्रिभिः" अभिषव-पाषाणैः "हिन्वन्ति" प्रेरयन्ति। किमर्थम्? "इन्द्राय" इन्द्रस्य "पीतये" पानाय ॥ २ ॥

अथ तृतीया।

३ १ २ २ ३ २ ३ १ ३ २ ३ १ २
एष स्यमानुषीष्वा श्येनो न विक्षु सीदति।

१ २ ३ २ ३ ३ १ २
गच्छन्नारोनयोषितम् ॥ ३ ¶ ॥

"स्यः" सः "एषः" सोमः "मानुषीषु" "विक्षु" प्रजासु "श्येनो न" श्येनइव शीघ्रमागम्य यजमानरूपासु अनुग्रहेण "आ"

* अत्र ऋचि 'उ—इति पदपूरणः'—इति वि०।

† ऋ० वे० ९, ८, २२, ३—६, ८, २८, २।

‡ 'योषणः—ऋत्विजः'—इति वि०।

¶ ऋ० वे० ९, ८, २८, ४।

आगत्य "सीदति"। पुनः कदृव ? "योषितं" "गच्छन्" अभिगच्छन् "जारो न" जार इव [स यथा सङ्के ततः तस्याः काम-पूरणीय-गूढ़-गतिः तद्वदित्यर्थः]॥ ३ ॥

अथ चतुर्थी।

२ २उ ३ १ २र ३ १र २र
एषस्यमद्योरसोवचष्टे दिवःशिशुः।

२उ ३ २ ३ १ २
यइन्दुर्वारमाविशत्॥ ४ *॥

"स्यः" सः "एषः" "मद्यः" मद-निमित्तः "रसः" "अवचष्टे" सर्वमेव पश्यति "दिवः शिशुः" द्युलोकस्य पुत्रः [तत्रोत्पन्नत्वात् पुत्रत्वमस्य†]। "यः" "इन्दुः" दीप्तः सोमः "वारं" दशापवित्रम् "आविशत्" आविशति स एष इति ॥ ४ ॥

अथ पञ्चमी।

२ २उ ३ १ २ ३ १र २र २ २
एषस्यपीतयेसुतोहरिरर्षतिधर्णसिः।

२ ३ १ २ ३ २ ३ २
क्रन्दन्योनिमभिप्रियम्॥ ५ ‡॥

"एषः" "स्यः" सः सोमः "पीतये" पानाय "सुतः" अभिषुतः "हरिः" हरितवर्णः "प्रियं"‡ स्व-प्रियभूतं "योनिं" स्थानं द्रोणकलशं "क्रन्दन्" शब्दयन् "अभ्यर्षति" अभिगच्छति ॥ ५ ॥

---

* 'अवचष्टे—अवचरति, दिवः—द्युलोकात्, शिशुः—शंसनीयः'—इति वि०।

† ऋ० वे० ९, ८, २८, ५।

‡ 'अभिप्रियम्—अभिरूपम्'—इति वि०।

अथ षष्ठी।

२२७ ३१३ १२ ३१२ ३१२
एतन्त्यꣳहरितोदꣳमर्मृज्यन्ते अपस्युवः।
२ ३१२ ३१२
याभिर्मदायशुम्भते ॥ ६ * ॥ ४

"एतं" "त्यं" तं सोमम् अध्वर्यवः "दꣳ" "हरितः" हरणस्वभावाः अङ्गुलयः "अपस्युवः" कर्मेच्छवः सत्यः "मर्मृज्यन्ते" शोधयन्ति। "याभिः" अङ्गुलिभिरिन्द्रस्य "मदाय" "शुभ्यते" दीप्यते शोध्यतइत्यर्थः; तमेतमिति सम्बन्धः ॥ ७ ॥ ४

इति सामवेदार्थप्रकाशे उत्तरायत्यस्य दꣳमस्याध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थ-खण्डे—

एषवाजीइति षड्चं सूक्तम्,

तत्र प्रथमा।

११३ १ ३ १२ २२ ३१२ २२३१ २
एषवाजीक्षितोनृभिर्विश्वविन्मनसस्पतिः।
२ २ ३ ३१ २
अभ्यंवारंविधावति ॥ १ † ॥

---

* ऋ० वे० ९, ८, २८, ६।

† ऋ० वे० ९, ८, १८, १।

"एषः" सोमः, "वाजी" वेजन-शीलः, "हितः" अध्वर्युणा पात्रे निहितः धृतः, "विश्ववित्" सर्वज्ञः, "मनसः" स्तोतुस्य "पतिः" स्वामी [अथवा सोमस्य मनोऽभिमानित्वात् मनसः स्वामित्वम्, "चन्द्रमा मनो भूत्वा हृदयं वा विशत्"—इति श्रुतेः ; तादृशोऽसौ] "अव्यं वारं" अवि-सम्बन्धिनं वालं दशापवित्रं "वि धावति" विविधं गच्छति ॥

"अव्यम्"-"अव्ये"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

३ २ ३ १ २ ३ १ २ ३ १ ३ १ २
एषपवित्रेअक्षरत्सोमोदेवेभ्यःसुतः।
२ ३ १ २ ३ २
विश्वाधामान्याविशन् ॥ २ * ॥

"एषः" सोमः "देवेभ्यः" देवार्थं "सुतः" अभिषुतः सन् पवित्रे "अक्षरन्" स्रवन् "विश्वा" सर्वाणि "धामानि" देव-शरीराणि "आ विशन्" प्रविशन् प्रवेष्टुमित्यर्थः ॥ २ ॥

अथ तृतीया।

३ २ ३ १ २ ३ २ १ २ ३ १ २
एषदेवःशुभायतेधियोनावमर्त्यः।
३ १ २ ३ १ २
वृत्रहादेववीतमः ॥ ३ † ॥

---

* ऋ० वे० ९, ८, १८, २।
† ऋ० वे० ९, ८, १८ २।

"एषः" सोमः "देवः" "शुभायते"*। कुत्र ? "अधियोनौ" स्वीये स्थाने†। कीदृशएषः ? "अमर्त्यः" अमरणधर्मा "वृत्रहा" शत्रुहन्ता "देववीतमः" अतिशयेन देवानां कामयिता‡ ॥ ३ ॥

अथ चतुर्थी।

३ २३ ३ १ २ ३ १ २ ३ १ ९ ३ २
एषवृषाकनिक्रदद्दृगभिर्जामिभिर्यतः।

३ १ २र
अभिद्रोणानिधावति ॥ ४ ¶ ॥

"वृषा" कामानां वर्षिता "एषः" सोमः "कनिक्रदत्" शब्दं कुर्वन् "दृगभिः" "जामिभिः" अङ्गुलिभिः "यतः" धृतः§ "द्रोणानि" द्रुममयानि पात्राणि "अभि धावति" अभिगच्छति ॥ ४ ॥

अथ पञ्चमी।

३ १ २र ३ १ २ ३ २ ३ १ २
एषसूर्यमरोचयत्पवमानोअधिद्यवि।

३ १ ९ ३ १र २र
पवित्रेमत्सरोमदः ॥ ५ ‖ ॥

---

* 'शुभायते—शुभं करोति'—इति वि०।

† 'अधियोनौ—योनिद्रौणकलशः'—इति वि०।

‡ 'देववीतमः—देवानां भक्ततमः, अथवा'—इत्यादि वि०।

¶ ऋ० वे० ९, ८, १८, ४।

§ 'जामिभिः—जामयो भगित्यः अङ्गुल्यः ताभिर्यतः संयतः, बद्ध इत्यर्थः—इति वि०।

‖ ऋ० वे० ९, ८, १८, ५।

"पवमानः" पूयमानः "एषः" सोमः "अधि द्यवि" द्युलोके स्थितं "सूर्यं" "रोचयत्" रोचयति । कीदृशः ? "पवित्रे" स्वयं दशापवित्रे स्थितः, "मत्सरः" मद-हेतुः प्रातः, "मदः" हृष्टः ॥

"अधिद्यवि । पवित्रेमत्सरोमदः"—"विचर्षणि । विश्वा धामानिविश्वचित्"—इति पाठौ ॥ ५ ॥

अथ षष्ठी ।

१ १ १२ २ १ २ ३ १ २
एषसूर्य्यंणहासतेसंवसानोविवस्वता ।
१ २ ३ १२ १२
पतिर्वाचोअदाभ्यः ॥ ६ * ॥ ५

"एषः" सोमः "संवसानः" सर्वमध्याच्छादयन् "विवस्वता" दीप्तिमता† "सूर्येण" "हासते" परित्यज्यते पवित्रइति शेषः । कीदृशः ? "वाचः" स्तुति-लक्षणायाः "पतिः" पालकः स्वामी वा‡ "अदाभ्यः" केनाप्यहिंस्यः ॥ ६ ॥ ५

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य दशमस्याध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

* ऋ० वे० ६, ८, १७, ५ ।

† 'विवस्वता—स्वकीयेन तेजसा'—इति वि० ।

‡ 'पतिर्वाचः—लौकिकाः वैदिकाश्च, तासां स्वामी'—इति वि० ।

अथ पञ्चम-खण्डे—

एषकविरिति षड्ऋचं सूक्तम्,—

तत्र प्रथमा ।

३ २ ३ २ ३ १ २ ३ २ ३ १ २
एषकविरभिष्टुतःपवित्रेअधितोशते ।

३ २उ ३ १ २
पुनानोघ्नन्नपद्विषः ॥ १ * ॥

"एषः" सोमः "कविः" मेधावी "अभिष्टुतः" अभितःस्तुतः† "पवित्रे अधि" दशापवित्रे अधि दशापवित्रमतीत्य "तोशते" [यद्यपि तोशतिर्बधकर्मा तथाह्यहनने गति-सङ्घावात् अत्र गतिमात्रे वर्त्तते] गच्छतीत्यर्थः‡ [अथवा "पवित्रे अधि" क्षणाजिने "तोशते" हन्यते पीड्यत इत्यर्थः] किङ्कुर्वन्? "पुनानः" पूयमानः "द्विषः" शत्रून् "अपघ्नन्" अपगमयन ॥

"द्विषः"-"स्विधः"—इति पाठो ॥ १ ॥

अथ द्वितीया ।

३ १ २र ३ १ २ ३ १र २र
एषइन्द्रायवायवेस्वर्ज्जित्यरिषिच्यते ।

३ १ २ ३ १ २
पवित्रेदक्षसाधनः ॥ २ ¶ ॥

---

* ऋ० वे० ९, ८, १७, १ ।

† 'स्तोत्रशस्त्रैः'—इति वि० ।

‡ 'तोशते—तुशी दीप्तौ दीप्यते'—इति वि० ।

¶ ऋ० वे० ९, ८, १७, २ ।

"एषः" सोमः "सर्जित्" स्वर्गस्य सर्वस्य वा जेता "इन्द्राय" "वायवे" च "पवित्रे" "परिषिच्यते" परिस्राव्यते। कीदृगेषः? "दक्षसाधनः" बलकारी ॥ २ ॥

अथ तृतीया।

३२उ ३ १ १ ३ २ ३१र २र ३ २
एषनृभिर्विनीयतेदिवोमूर्धावृषासुतः।
२ ३ १ २ ३ २
सोमोवनेषुविश्ववित् ॥ ३ * ॥

"एषः" सोमः "नृभिः" कर्मनेतृभिः ऋत्विग्भिः "विनीयते" विविधं नीयते। कीदृगः? "दिवः" द्युलोकस्य "मूर्धा" शिरोवत् प्रधानभूतः "वृषा" अभिमत-वर्षकः "सुतः" अभिषुतः। कुत्र नीयते? "वनेषु" वननीयेषु पात्रेषु वन-सम्भूत-द्रुम-विकारेषु वा पात्रेषु† "विश्ववित्" सर्वज्ञ एष इति समन्वयः ॥ ३ ॥

अथ चतुर्थी।

३२३ १ २ ३ १ २ ३ २
एषगव्युरचिक्रदत्पवमानोहिरण्ययुः।
१ २ ३ १र २र
इन्दुःसत्राजिदास्तृतः ॥ ४ ‡ ॥

"एषः" सोमः "पवमानः" पूयमानः "अचिक्रदत्" शब्दं करोति। कथम्भूतः सन्? "गव्युः" अस्माकं गा इच्छन्

* ऋ० वे० ९, ८, १७, ३।
† 'वनेषु—उद्भवेषु' —इति वि०।
‡ ऋ० वे० ९, ८, १७, ४।

"हिरण्ययुः" हिरण्यानीच्छन् "इन्दुः" दीप्तः सन्, "सत्राजित्" महतः शत्रोरसुरादेर्जेता, * "अस्तृतः" स्वयमन्यैरहिंस्यश्च सन् ॥ ४ ॥

अथ पञ्चमी।

३ २ ३क २र ३ १ २ ३ २ १ २
एषशुष्मअसिष्यदद्न्तरिक्षेवृषाहरिः।

३ १उ ३ २ ३ २
पुनानइन्दुरिन्द्रमा ॥ ५ † ॥

"शुष्मी" बलवान् सोमः "अन्तरिक्षे" दशापवित्रे "असिष्यदत्" स्यन्दतेः‡। कीदृशएषः? "वृषा" वर्षकः, "हरिः" हरितवर्णः, "पुनानः" पूयमानः, "इन्दुः" दीप्तः, सएव "इन्द्रम्" इन्द्रञ्चापि; गच्छतीति शेषः। "आ"—इति चार्थे¶ ॥ ५ ॥

अथ षष्ठी।

३ २ ३ १ २ ३ १ २ ३ १ २
एषशुष्मअदाभ्यःसोमःपुनानोअर्षति।

३ १ २ ३ २
देवावीरघशंसहा ॥ ६ § ॥ ६

"एषः" सोमः "शुष्मी" बलवान् "अदाभ्यः" अदभनीयः अहिंसनीयः "पुनानः" पूयमानः "अर्षति" गच्छति "देवावीः"

---

* 'सत्राजित्—सहसा जेता अथवा सत्राजित्—सदाजित्'—इति वि०।

† ऋ० वे० ९, ८, १७, ६।

‡ 'असिष्यदत्—सीदति'—इति वि०।

¶ 'आ—आनुपूर्व्येण'—इति वि०।

§ ऋ० वे० ९, ८, १८, ६।

देवानामविता* "अघशंसहा" अघान् शंसन्तीत्यघशंसाः तेषां वा हन्ता† ॥ ६ ॥ ९

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य दशमस्याध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे—

ससुतःपोतयदृति षड्ऋचं सूक्तम्,

तत्र प्रथमा।

२ ३ २ ३ १ ३ २ ३ २ १ २ ३ १ २
ससुतःपोतयेवृषासोमःपवित्रेअर्षति।

३ १२ २२ ३ १
विघ्नन्रक्षाꣳसिदेवयुः ॥ १ ‡ ॥

"सः" सोमः "पोतये" इन्द्रादिपानाय "सुतः" अभिषुतः "वृषा" वर्षणः सन् "पवित्रे" "अर्षति" गच्छति। किङ्कुर्वन्? "रक्षांसि" "निघ्नन्"। "देवयुः" देवकामः। स इत्यन्वयः ॥ १ ॥

---

* 'देवावीः—देवानां भक्षभूतः'—इति वि०।

† 'अघं पापं यः शंसति स अघशंसः, तस्य हन्ता'—इति वि०।

‡ ऋ० वे० ९, ८, २७, १।

अथ द्वितीया।

२३१२ ३१२ २२ ३ २
सर्पविचेविचक्षणोहरिरर्षतिधर्णसिः।

३२३ ३ १ २
अभियोनिङ्कनिक्रदत्॥ २ *॥

"सः" सोमः "विचक्षणः" [पश्यति-कर्मतत् (निघ० ३, ११,३)] सर्वस्य द्रष्टा "हरिः" हरितवर्णः सोमः "धर्णसिः" सर्वस्य धारकः "पविचे" "अर्षति" गच्छति, पश्चात् "कनिक्रदत्" शब्दं कुर्वन् "योनिं" स्थानं द्रोणकलशम् "अभि" गच्छति †॥ २॥

अथ तृतीया।

२३ १ २ ३२ ३१२ २२ ३ १२
सवाजीरोचनन्दिवःपवमानोविधावति।

३ १२ २२३ १ २
रक्षोहावारमव्ययम्॥ ३ ‡॥

"सः" "वाजी" वेजनवान् ¶ अश्व-स्थानीयः "दिवः" "रोचनं" रोचकः "पवमानः" पूयमानः "विधावति"। कीदृशः? "रक्षोहाः" रक्षसां हन्ता, "अव्ययं वारं" दशापवित्रम् अतीत्य विधावति विविधं गच्छति॥

"रोचनं"-"रोचना"—इति पाठौ॥ ३॥

---

* ऋ० वे० ९, ८, २७, २।

† अभीत्युपसर्गदृष्ट्या क्रियापदाद्यत्तिः।

‡ ऋ० वे० ९, ८, २७, ३।

¶ 'वाजी—अन्नवान्'—इति वि०।

अथ चतुर्थी।

२ ३ २उ २ १ २ ३ १ २
सञ्चितस्याधिसानविपवमानोअरोचयत्।
३ १ ३ १ १ ३ २
जामिभिःसूर्यꣳसह ॥ ४ * ॥

"सः" सोमः "चितस्य" महर्षेः "अधिसानवि" समुच्छिते यज्ञे† [अधीति सप्तम्यर्थानुवादी] "पवमानः" पूयमानः "जामिभिः" प्रहर्षैः बन्धुभूतैर्वा सुतेजोभिः ‡ "सह" सहितः सन् "सूर्यम्" "अरोचयत्" प्रकाशितवान् ॥ ४ ॥

अथ पञ्चमी।

१ २ १ १ २ २ ३ १ २ ३ १ २
सवृत्रहावृषासुतोवरिवोवित्दाभ्यः।
२ ३ १ २
सोमोवाजमिवासरत्॥ ५ ¶ ॥

"सः" सोमः "वृत्रहा" शत्रूणां हन्ता "वृषा" वर्षकः "सुतः" अभिषुतः "वरिवोवित्" § यष्टुर्धनस्य लम्भकः "अदाभ्यः"

---

* ऋ० वे० ९, ८, २७, ४।

† 'चितस्याधिसानवि—चितस्यार्थे, अधिसानवि भ्रुवे स्थाने'—इति वि०।

‡ 'जामिभिः—भगिनीभिः'—इति वि०।

¶ ऋ० वे० ९, ८, २७, ५।

§ 'वरिवोभत्' -इति वि०।

अन्यैरहिंसनीयः ; एवङ्गुणः सन् "वाजमिव" सङ्ग्रामाश्वइव * 'असरद्' गच्छति कलशम् ॥ ५ ॥

अथ षष्ठी।

२ ३ २ ३ १ २ ३ २ १२ १२
सदेवःकविनेषितोऽभिद्रोणानिधावति।

२ ३ १ २ ३ १ २
इन्दरिन्द्रायमंहयन् ॥ ६ † ॥ ७

"सः" सोमः "देवः" "इन्दुः" क्लिद्यमानः "कविना" आक्रान्तप्रज्ञेनाध्वर्युणा ‡ "उषितः" प्रेरितः ¶ सन् "द्रोणानि" द्रोणकलशान् § "अभि धावति" अभिगच्छति। किङ्कुर्वन्? "इन्द्राय" इन्द्रं "मंहयन्" स्वकीय-रसेन पूजयन्॥

"मंहयन्"-"मंहना"—इति पाठौ॥ ६ ॥ ७

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य दशमस्याध्यायस्य षष्ठः खण्डः॥ ६॥

---

* 'वाजम्—अन्नम्, इव अश्वात्'—इति वि०।

† ऋ० वे० ९, ८, २७, ६।

‡ 'कविना—ब्रह्मणा'—इति वि०।

¶ 'उषितः—क्षिप्तः'—इति वि०।

§ 'द्रोणानि—द्रोण कलश-सम्बन्धानि पात्राणि'—इति वि०।

अथ सप्तम-खण्डे—

यःपावमानीरिति षडृचं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ १ १२ २२ ३ १ २ १ २ १ २
यःपावमानीरध्येत्यृषिभिःसम्भृतꣳरसम्।

२३ २ ३ १ २ ३ १ २ ३ १ २
सर्वꣳसपूतमश्नातिस्वदितम्मातरिश्वना ॥ १ * ॥

"यः" जनः "पावमानीः पवमान-देवताकाः †" सर्वाऋचः तद्रूपं "ऋषिभिः" सूक्तद्रष्टृभिः मधुच्छन्दःप्रभृतिभिः "सम्भृतं" सम्पादितं "रसं" वेदसारभूतं ‡ पावमानं सूक्तमङ्गं यः "अध्येति,"¶ "सः" जनः "सर्वं" भोज्यजातं "पूतं" परिशुद्धमेव "अश्नाति" भक्षयति § कथमस्य पूतत्वम्? तत्राह—स्वस्याग्नात् प्रागेव "मातरिश्वना" [मातरि अन्तरिक्षे श्वसितीति मातरिश्वा वायुः, स च पवित्रमेव] पवित्रेण वायुना "स्वदितं" स्वादूकृतं परिपूतमेवान्नं पश्चात् स नरोऽश्नाति ॥ १ ॥

---

* ऋ० वे० ७, २, १८, ६।

† 'पावमान्यश्च या सोमदेवत्याः ऋचः विश्वपि पवमानेषु, ताभिर्हिताः साम्नतं व्याख्यायते—यः पावमानीरध्येतीति'—इति वि०।

‡ 'रसं—वीर्यम्'—इति वि०।

¶ 'यः अध्येति तस्य किं फलं भवति? सर्वं स पूतम् अश्नाति, यत् किञ्चित् भक्षयति तत् पूतं भवति'—इति वि०।

§ 'अध्ययनस्यात्र आर्षेयच्छन्दोदैवतब्राह्मणैः सहितं परिज्ञानं प्रशस्यते'—इतिवि०।

अथ द्वितीया।

३ २उ ३१र २र ३ १ २ ३ १२
पावमानीर्योऽअध्येत्यृषिभिःसम्भृतꣳरसम्।
२ ३१ २ ७ २ ३१र २र७२
तस्मैसरस्वतीदुहेक्षीरꣳसर्पिर्मधूदकम्॥२*॥

"यः" ब्राह्मणः "पावमानीः" पवमान-देवताका ऋचः "ऋषिभिः" मधुच्छन्दःप्रभृतिभिर्मन्त्रद्रष्टृभिः "सम्भृतं रसं" वेद-सारं सूक्तसङ्घम् "अध्येति" अधीते, "तस्मै" पवमानाध्ययनं कुर्वते जनाय "सरस्वती" सर्वत्र सरणवती वाग्देवता † "क्षीरं" यज्ञ-साधनं पयः, "सर्पिः" तादृगं घृतं "मधु" मदकरम् "उदकं" सोमं "दुहे" स्वयमेव दुग्धे यागादि-पर-वेदशास्त्रं विदं करो-तीत्यर्थः ‡ [दुह प्रपूरणे (अदा० प०) कर्मकर्त्तरि "न दुह-स्नु-नमाम् (३, १, ८९)"—इत्यादिना यकः प्रतिषेधः, "लोपस्त आत्मनेपदेषु (७, १, ४१)"—इति तलोपः॥ २॥

अथ तृतीया।

३ ७ ३ १ २ ३ २ ७ १ २ ३ १ २
पावमानीःस्वस्त्ययनीःसुदुघाहिघृतश्चुतः।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
ऋषिभिस्सम्भृतोरसोब्राह्मणेष्वमृतꣳहितम्॥३¶॥

---

* ऋ० वे० ७, ९, १८, ७।

† 'सरस्वती—वाग्रूपा'—इति वि०।

‡ 'क्षीरं, सर्पिः, मधु, उदकम्—एतानि रसवन्ति द्रव्याणि तस्य सम्पादयन्ती'—इति वि०।

¶ ऋ० वे० ७, ९, ५, १।

याः पावमान्य ऋचः ताः "स्वस्ययनीः" क्षेम-प्रापिकाः "सुदुघाः" सुष्ठु फलं दुहानाः "घृतश्चुतः" * [घृतं श्योतन्ति क्षारयन्तीति घृतश्चुतः ईदृग्भूताः] अस्माननुगृह्णन्तिति शेषः। "ऋषिभिः" मन्त्र दर्शिभिर्मुनिभिः "रसः" फलसारः "सम्भृतः" अस्मासु सम्पादितः "ब्राह्मणेषु" ब्रह्माणो मन्त्राः तत्पाठकाः ब्राह्मणाः, तेष्वस्मासु † "अमृतम्" अविनाग-बलं "हितं" सम्पादितम् ॥ ३ ॥

अथ चतुर्थी।

३ १ २ ३ २ ३ १ २ ३ २ ३ २
पावमानीर्दधन्तु नइमंलोकमथोअमुम्।

२ ३ १ २ ३ २ ३ २ ३ १ २
कामान्त्समर्द्धयन्तु नोदेवीर्देवैःसमाहृताः॥ ४ ‡ ॥

"देवैः" इन्द्रादिभिः "समाहृताः" सम्पादिताः "पावमानीः देवीः" पवमान-मन्त्राभिमानिनो देव्यः "नः" अस्माकम् "इमम्" ईदृग्भूतं "लोकं" भूलोकम् "अथो" अपि च "अमुं" स्वर्गलोकं "दधन्तु" प्रयच्छन्तु। तत्रत्यान् "कामान्" च "नः" अस्मदर्थं "समर्द्धयन्तु" समृद्धान् कुर्वन्तु ॥ ४ ॥

---

* 'घृतश्चुतः—घृतस्राविणः, अथवा घृतमुदकं तत् श्रवन्ति, कामवर्षी पर्जन्यो भवति'—इति वि०।

† 'ब्राह्मणेषु—अधिकरणभूतेषु'—इति वि०।

‡ ऋ० वे० ७, २, ५, २।

अथ पञ्चमी।

१२३२ ३१२ ३ १ २३२१२
येनदेवाःपवित्रेणात्मानम्पुनतेसदा।
१२३१२ ३ १ २
तेनसहस्रधारेणपावमानीःपुनन्तुनः॥ ५ *॥

"देवाः" इन्द्राद्याः "येन" पवित्रेण शुद्धि-साधनेन "सदा" "आत्मानं" स्व-देहं पुनते शोधयन्ति, "सहस्रधारेण" सहस्रावान्तर-भेद-युक्तेन "तेन" साधनेन "पावमानीः" पावमान्य ऋचः "नः" अस्मान् "पुनन्तु" ॥ ५॥

अथ षष्ठी।

३ २ ३ १२३१ २ ३२
पावमानीःस्वस्त्ययनीस्ताभिर्गच्छतिनान्दनम्।
१२ ३१२ ३१२
पुण्याꣳश्चभक्षान्भक्षयत्यमृतत्वञ्चगच्छति॥ ६† ॥ ८

"पावमानीः" पवमानः पावकः पूयमानो वा सोमः, तत्सम्बन्ध्यस्तद्देवताका ऋचः पावमान्यस्ताः "स्वस्त्ययनीः" स्वस्तीत्यविनाश-नाम, तथाविध-फलस्य प्रापयित्र्यः, "ताभिः" उक्त-लक्षणाभिः पावमानीभिः, तत्पाठेन स्तोता "नान्दनं" ‡ नन्द-

---

* ऋ० वे० ७, २, ५, ३।

† ऋ० वे० ७, २, ५, १९।

‡ 'नान्दनं—पुत्र-वसु-धन-धान्यादिभिः'—इति वि०।

यति सुकृतिन इति नन्दनः स्वर्गः स एव नान्दनः [स्वार्थिकस्तद्धित-प्रत्ययः] तम् "गच्छति" प्राप्नोति। किञ्चेह लोके "पुण्यान्"* सुकृत-सम्पादितान् "भक्षान्" भक्षणीयान् भोगान् अन्न-पानादि-लक्षणान् "च" भक्षयति। किञ्च "अमृतत्वं च गच्छति" अमृतत्वं नाम सोमस्तञ्च प्राप्नोति ॥ ६ ॥ ८

इति सामवेदार्थप्रकाशे उत्तरार्चस्य दशमस्याध्यायस्य सप्तमः खण्डः† ॥ ७ ॥

अथाष्टमे खण्डे‡:—

अगन्मेति-लक्षात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१२ ३१२ १२३१२ २
अगन्ममक्षानमसायविष्ट

२ ३ २३१ २३ १२३ २
योदीदायसमिद्धःस्वेदुरोणे।

---

* 'पुण्यान्—मन्त्रपूतान् अथवा धानाः करम्भः पुरोडाशः प्रतीवापः पयस्येति अथवा * * *)—इति वि०।

† 'उक्ताः पावमान्यः, उक्तञ्च बर्हिष्यवमानं, नवमस्याङ्कः'—इति वि०।

‡ 'इदानीमाज्यानि भवन्ति'—इति वि०।

२ १ २ १ १ २ ३ १ ३ १
चित्रभानुरुरोदसीअन्तरुर्वी

२ ३ १ २ १ १ २
स्वाहुतंविश्वतःप्रत्यञ्चम् ॥ १ * ॥

"यः" अग्निः "स्वे दुरोणे" आहवनीयाख्ये स्वे स्थाने "समिद्धः" काष्ठैः सम्यग्दीप्तः सन् "दीदाय" दीप्यते, तमिमं "यविष्ठं" युवतमम् "उर्वी" विस्तीर्णयोः "रोदसी" रोदस्योः द्यावा-पृथिव्योः "अन्तः" मध्ये अन्तरिक्षे "चित्रभानुं" चित्रकालं "स्वाहुतं" सुष्ठु आहुतिभिर्हुतं सन्तं "विश्वतः" सर्वतः "प्रत्यञ्चं" प्रतिगच्छन्तमग्निं "महा" महता "नमसा" नमस्कारेण "अगन्म" वयमुपगच्छामः ॥ १ ॥

अथ द्वितीया ।

२ ३ १ २ २ १ २ ३ . २
समङ्क्ताविश्वादुरितानिसाक्षा

२ १ २ ३ २ ३ १ ३ १ २
नग्निष्टवेदमआजातवेदाः ।

१ २ ३ १ २ ३ २
सनोरक्षिषद्दुरितादवद्या

३ १ २ ३ २ १ २ ३ १ २
दस्मान्गृणतउतनोमघोनः ॥ २ † ॥

---

* ऋ० वे० ५, २, १५, १ ।

† ऋ० वे० ५, २, १५, २ ।

यः "अग्निः" "मङ्हा" महत्वेन "विश्वा" विश्वानि "दुरिता" दुरितानि "साह्वान्" अभिभवन् "जातवेदाः" जात-धनः जात-प्रज्ञो वा "दमे" यज्ञगृहे "स्तवे" अस्माभिः स्तूयते, "सः" अग्निः "गृणतः" स्तुवतः "नः" अस्मान् "दुरितात्" पापात् "अवद्यात्" निन्दिताच्च कर्मणः "रक्षिषत्" रक्षतु। "उत" अपिच "मघोनः" हविष्मतः "नः" अस्मान् रक्षतु ॥ २ ॥

अथ तृतीया।

१ २र ३ २ ३ १ २ ३ १
त्वंवरुणउतमित्रोअग्नेत्वां
१ ३ २ ३ १ २
वर्द्धन्तिमतिभिर्वसिष्ठाः ।
१र २र ३ १ २ ३१
त्वेवसु*सुषणनानिसन्तुयूय
२ ३ २ ३ १ २
म्पातस्वस्तिभिःसदानः ॥ ३† ॥ ९

हे "अग्ने!" "त्वं" "वरुणः" असि पापानां निवारको भवसि "उत" अपिच "मित्रः" असि, पुण्य-प्रापणे सखा भवसि। "वसिष्ठाः" एतन्नामका ऋषयः हे अग्ने! "त्वां" "मतिभिः" स्तुतिभिः "वर्द्धन्ति" वर्द्धयन्ति "त्वे" त्वयि विद्यमानानि "वसु" वसूनि "सुषणनानि" सुसम्भजनानि "सन्तु"। हे अग्ने! "यूयं"

---

* "वसु"—इति क०-सु०-पुस्तकयोः पाठः।

† ऋ० मं० ५, २, १५, ३।

त्वदाद्याः सर्वे देवाः "स्वस्तिभिः" क्षेमैः "नः" अस्मान् "सदा" सर्वदा "पात" रक्षतं ॥ ३ ॥ ९

अथ हृचात्मके द्वितीय-सूक्ते—

तत्र प्रथमा।

३२उ ३ १र २र ३१२ ३१२
महाꣳइन्द्रोयओजसापर्ज्जन्योवृष्टिमाꣳइव।
१२३१२
स्तोमैर्वत्सस्यवावृधे ॥ १ * ॥

"यः" "इन्द्रः" "ओजसा" बलेन "महान्" सर्वेभ्योऽधिकः। कइव ? "वृष्टिमानिव" यथा वृष्ट्या युक्तः "पर्जन्यः" रसानां प्राजयिता देवः महान्, स इन्द्रः "वत्सस्य" पुत्र-स्थानीयस्य स्तोतुः वत्स-नाम्न एव वा ऋषेः "स्तोमैः" स्तोत्रैः "वावृधे" प्रवर्द्धते ॥ १ ॥

अथ द्वितीया।

२३ २३ १र २र३१ २३२३१ २
कण्वाइन्द्रंयदक्रतस्तोमैर्यज्ञस्यसाधनम्।
३ १२ ३१२
जामिब्रुवतआयुधा ॥ २ † ॥

"कण्वाः" [स्तोत्र-नामैतत् (निघ० ३,१५,७)] स्तोतारः कण्वगोत्रा वा "इन्द्रं" "स्तोमैः" स्तोत्रैः "यज्ञस्य" यागस्य "साधनं"

---

* ऋ० वे० ५, ८, ९. १ = य० वे० ७, ५०।

† ऋ० वे० ५, ८, ९, २।

साधयितारं निष्पादकं "यद्" यदा "अक्रत" अकृषत [करोतेर्लुङि "मन्त्रे घसेति (२, ४, ८०) च्लेर्लुक्, तदानीं "आयुधा" शत्रूणां हिंसकानि बाणादीनि "जामि" * [अतिरेकनामैतत्] अतिरिक्तम् अधिकं प्रयोजन-रहितं "ब्रुवते" कथयन्ति। "आयुधा" आयुधस्य सर्वस्य कार्यस्येन्द्रेण कृतत्वात् आयुधानि निःप्रयोजनानीत्यर्थः [यद्वा, 'आयुधा' आयुधमायोधनशीलमिन्द्रं 'जामि' जामिं भ्रातरं 'ब्रुवते' वदन्ति॥

"आयुधा"-"आयुधम्"—इति पाठो॥ २॥

अथ तृतीया।

३२ ३२३ १२३१२ ९२ ३१ १
प्रजामृतस्यपिप्रतःप्रयङ्क्षरन्त्सक्षयः।

१२३२३१२
विप्राऋतस्यवाचसा॥ ३†॥ १०

"ऋतस्य" यज्ञस्य सत्यस्य वा "प्रजा" प्रकर्षेण जातमिन्द्रं "पिप्रतः" नभसः प्रदेशान् पूरयन्तः "वक्षयः" वाहका अश्वा "यद्" यदा "प्र भरन्त" प्रकर्षेण भरन्ति वहन्ति तदा "विप्राः" मेधाविनः

'जामि—जानामि'—इति वि०।

† ऋ० मं० ५, ८, ६, २।

स्तोतारः "ऋतस्य"यज्ञस्य "वाहसा" प्रापकेण स्तोत्रेण तम् इन्द्रं स्तुवन्तीति शेषः ॥ ३ ॥ १०

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य दशमस्याध्यायस्य अष्टमः खण्डः * ॥ ८ ॥

अथ नवमे खण्डे †—

पवमानस्येति त्रयात्मकं प्रथमं सूक्तम् ‡

तत्र प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १ २
पवमानस्यजिघ्नतोहरेअर्ष्टाअदृक्षत।
३ १ २ ३ १ २
जीराअजिरशोचिषः ॥ १ § ॥

"जिघ्नतः" पुनः पुनः तमांसि विनाशयतः ‖ "हरेः" हरितवर्णस्य "अजिरशोचिषः" सर्वत्र-गमन-शील-तेजसः "पव-

---

* 'उक्तान्याख्यानि'—इति वि०।

† 'इदानीं माध्यन्दिनः पवमानः'—इति वि०।

‡ 'उत्तरादारात्तपञ्चतीनि सामानि ब्राह्मणोक्तार्थानि'—इति वि०।

¶ "अजीर"—इति ख० पु० पाठः।

§ ऋ० वे० ७, २, ११, ५।

‖ 'जिघ्नतः—हन्यमानस्य'—इति वि०।

मानस्य" "चन्द्राः" [चदि आह्लादे (भ्वा० प०)] देवानामाह्लादयित्र्यः "जीराः" क्षिप्रं चरण-शीलाः * धाराः "असृक्षत" सृजन्ति पवित्रान्निर्गच्छन्तीत्यर्थः ॥

"जिघ्नतः"-"जङ्घतः"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

११ ३१२ ३१२३११
पवमानोरथीतमःशुभ्रेभिःशुभ्रशस्तमः।
१२ ३१२
हरिश्चन्द्रोमरुद्गणः ॥ २ † ॥

"पवमानः" देवः "रथीतमः" अतिशयेन रथवान् ["इद्रथिनः (८,२,१७ वा०)"—इतीकारः। तथा "शुभ्रेभिः" शोभायुक्तेभ्यस्तेजोभ्योऽपि "शुभ्रशस्तमः" अत्यन्तं दीप्यमानश्च [यद्वा, निर्मलतम-यशोयुक्तः] "हरिश्चन्द्रः" ["ऋत्याचन्द्रोत्तरपदे मन्त्रे (६,१,१५१)"—इति सांहितिकः सुट्] हरित-वर्ण-दीप्तिः हरित-धारा-युक्तो वा "मरुद्गणः" मरुतो यस्य गणाः सहाय-भूताः स तथोक्तः तादृशः सोमः सर्वान् स्व-रश्मिभिः व्याप्नोत्युत्तरेण सम्बन्धः ॥ २ ॥

---

* 'जीराः—जीरणात्मकाः'—इति वि०।

† ऋ० वे० ७, १, १२, १।

अथ तृतीया ।

१२ २२ ३१२ ३१२
पवमानव्यश्नुहिरश्मिभिर्वाजसातमः ।

१२३ २३१२
दधत्स्तोत्रेसुवीर्य्यम् ॥ ३ * ॥ ११

हे "पवमान" सोम! त्वं "रश्मिभिः" स्व दीप्तिभिः "व्यश्नुहि" सर्वं जगद् व्याप्नुहि । कीदृगम्भूतम् ? "वाजसातमः" अतिशयेनान्नस्य दाता बलस्य सम्भक्ता वा तथा "स्तोत्रे" पवमानं स्तोत्रं कुर्वते जनाय "सुवीर्य्यं" शोभन वीर्योपेतं पुत्रं धनं वा "दधत्" विदधत् पयच्छत् व्याप्नुहि ॥

"पवमानव्यश्नुहि"—"पवमानोव्यश्नवत्"—इति पाठौ ॥ ३ ॥ ११

अथ ऋचात्मके द्वितीय-सूक्ते—

प्रथमा ।

२३ १२ ३१३ ३१२३२ ३२
परीतोषिञ्चतासुतꣳसोमोयउत्तमꣳहविः ।

३ १२ २२ ३२ २३ ३२३२३१२
दधन्वाꣳयोनर्य्याꣳअप्स्वाऽऽऽन्तरासुषावसोममद्रिभिः ॥१॥

हे ऋत्विजः! "सुतम्" अभिषुतं सोमम् "इतः" अस्मात् कर्मण ऊर्द्धम् अथवा अस्मात् प्रदेशात् ऊर्द्धं "परिषिञ्चत" वसतीवरीभिः । इतोषिञ्चतेत्यत्र संहितायां छान्दसं रो रुत्वम्, आदेश-

---

* ऋ० वे० ७, २, १२, २ ।

† ऋ० ऐ० ६, १, २ (२भा० ७७ पृ०) = ऋ० वे० ७, ५, १२, १ ।

प्रत्ययोरिति षत्वम्] "यः" "सोमः" देवानाम् "उत्तमं" प्रशंस्यं "हविः" भवति "आ" अपिच "नर्यः" मनुष्य-हितः यश्च सोमः "अप्सु" वसतीवरीषु अन्तरिक्षे वा "अन्तर्" "दधन्वान्" गच्छन् भवन् भवति तं "सोमम्" "अद्रिभिः" ग्रावभिः अध्वर्युः "सुषाव" अभिषुतं चकार ; तं परिषिञ्चतेति समन्वयः ॥ १ ॥

अथ द्वितीया।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
नूनम्पुनानोविभिःपरिस्रवादब्धःसुरभितरः।

३ १ २ ३ १ १ ३ १ २ ३ २ ३ २ ३ १ २
सुतेचित्त्वाप्सुमदामोअन्धसाश्रीणन्तोगोभिरुत्तरम् ॥२*॥

हे सोम! "अदब्धः" कैश्चिदप्यहिंसितः "सुरभितरः" अत्यन्तं सुगन्धिः त्वं "नूनम्" इदानीं "पुनानः" पूयमानः "अविभिः" अवि-वाल-कृतैः पवित्रैः "परिस्रव" परिक्षर "सुते चित्"† अभिषुते सति "अन्धसा" भक्ष्य-लक्षणेनान्नेन "गोभिः" गोर्विकारैः क्षीरादिभिः "श्रीणन्तः" मिश्रयन्तः वयम् "उत्तरम्" उद्भूततरम् ‡ "अप्सु" वसतीवरीषु स्थितं "त्वा" त्वां "मदामः मदामहे ॥ २ ॥

---

* ऋ० वे० ७, ५, १२, २।

† 'चित्—इति पदपूरणः'—इति वि०।

‡ 'उत्तरम्—उत्तरेषु सवनेषु'—इति वि०।

अथ अध्यास्वरूपा तृतीया।

१२ ३१र २र २१ २३ २१ १ २ २ २
परिस्वान*श्चक्षसेदेवमादनःक्रतुरिन्दुर्विचक्षणः ॥३†॥ १२

"स्वानः" सुतः अभिषूयमाणः सोमः "चक्षसे" ‡ सर्वेषां दर्शनाय "परि" स्रवति। कीदृशः? "देवमादनः" देवानां तर्पयिता, "क्रतुः" कर्त्ता, ¶ "इन्दुः" पात्रेषु क्षरण-शीलः दीप्तो वा, "विचक्षणः" "सर्वस्य" विद्रष्टा ॥ ३ ॥ १२

५ ४ २र ३ ४ र ५ १र र
॥ पृष्ठम् ॥ पराऽयितोपिश्चतासुताम्। सोमोयउक्थ
१ २ १र र र
मश्चवाऽयिर्हीदया। दधन्वाऽयोनर्योअप्सुवन्तराऽ३
१ २१र २ १ २
न्द्रोदया। सुषावाऽ३सो। ममद्राऽ३यिभाऽ४३यिः ॥(१)
५ ४ २ ३र ४ ५ १ र र १
सुषाऽ३वसोममद्रिभायिः। सुषावसोममद्रिभाऽ३यिर्ही
२र १ र र १ २ १
द्रया। नम्युनानोअविभिःपरिस्रवाऽ३न्द्रोदया। अदब्धा
५ १ २ ५ ४ २ ३ ४ ५
ऽ३ःह। रभिन्ताऽ३रा३४३ः ॥(२) अदाऽ३ब्धःसुरभिन्तराः।

---

* "सुवान"—इति ऋ० पाठः।

† ऋ० वे० ७, ५, १२, ३।

‡ 'चक्षसे—चक्षाय'—इति वि०।

¶ 'क्रतुः—यज्ञः'—इति वि०।

१ १ २१२ २ २
अदब्ध सुरभिन्तरा२३ह्वोइया। सुतेचित्त्वाप्सुमदामोअ

१ १२१ २ १ २
न्धसा२३ह्वोइया। ओणन्तो२३गो। भिरुना२ ३रा ३ ४

१
३म्। ओ२३४५ई। उा ॥ १ * ॥ [१]

५ ५ २ ४ ५२ ५२ १२
॥ कौल्मलबर्हिषम् ॥ परा३यितोऽपिच्चतासुताम्। सो

२ २ २ १ २
मोयउत्तमा२ह्वोवा२ ३ ४ यिः। दधन्वा३योनर्म्याआ।

२१ १ २ २ २ १ ५
एह्वोयि। ए२अन्तरा। सुषावसोममोवा३ओ२३४वा।

४ ५ ५ ५ २ ४२ ५ १
द्रा५यिभोऽह्वायि ॥(१) सुषा३वा३सोममद्रिभायिः। सु

२ २ १ २२ २ १ २
षावसोममा२द्रायिभा२ ३ ४यिः। नूनम्पुनानोअवायिभा

२ १ १ २ १
यिः। ऐह्वोयि। पा२रिस्रवा। अदब्धःसुरभोवा३ओ

५ ४ ५ ५ ४ २ ४ ५
२३४वा। तापुरोऽह्वायि ॥(२) अदा३ब्धा३ःसुरभिन्तराः।

१ १ २२ २ १ २
अदब्धःसुरभा२यिन्तारा२ ३ ४ः। सुतेचित्त्वाप्सुमादा।

---

[1] ऋ० गा० ५५८ २अ० १मा०।

१ २ १ २ २ १ २ १
ऐहोयि। मो२अन्धसा। श्रीणन्तोगोभिरोवा३ओ२३४

५ ४ ५
वा। ता५रो६ह्वायि(३) ॥ २ * ॥ [२]

॥ अर्कपुष्पाद्यम् ॥ १२ १२ २ २ १ १
परोतोषिञ्चतासुतम्। ऊवे२३।

१२ २२ १ २ १ २ १ २ १ २ १ २ १ २ १
सोमोयउत्तमꣳहविः। ऊवे२३। दधन्वाꣳयोनर्योअप्म्

२ १२ २ १२ १ १२ २ १ २ १
वन्नरा। ऊवे२३। सुषावसोममद्रिभिः। ऊवे२३ ॥(१)

२ १२ २ १ २ १ २ १ २ १ २ १ २ १ २
सुषावसोममद्रिभिः। ऊवे२३। सुषावसोममद्रिभिः।

२ ९२ १ २ २ १ २ २ १ २ १ २ १ २
ऊवे२३। नूनम्नानोनिभिःपरिस्रव। ऊवे२३। अदब्धः

१ २ १ २ १ २ १
सुरभिन्तरः। ऊवे२३ ॥(२) अदब्धःसुरभिन्तरः। सुर

१ १ २ १ २ १
भिन्तरः। ऊवे२३। अदब्धःसुरभिन्तरः। ऊवे२३।

२ १२ २२ १ २२ २ १ २२ १ २२ १ २२ १२
सुतेचित्त्वाप्सुमदामोअन्धसा। ऊवे२३। श्रीणन्तोगो

२ १ २ १ १ २ १ २
भिरुत्तरम्। ऊवे२३। ऊवे२३। होवा३हा३ * हो

* ऋ० मा० ५५० २ अ० २ मा० ।

५र र २१रर र १र ६ १ १ १
३४ । औहोवा । अकीर्देवाना२म्यरसेवियो२मा २ ३ ४
१
५न्(३) ॥ २ * ॥ [३]

२ र १र र र र र २
॥ दैर्घश्रवसम् ॥ परीतोषिञ्चतासुतमोहाओहाइ३ए ।
१र १र १ २ १ २ १ ऽ १ ऽ २ २ ३ २
सोमोयउत्तमऽर्हविः । ओ३हा । ओ३हाइ३ए३४ । दधा
३र २ १ २ १ २ ऽ २
३४न्वाऽयाः । नारियः । अप्सूअन्तरा । ओ ३ हा ।
ऽ २ २ ६ २ ३ २ २ १ ५ ४
ओ३हाइ३ए३४ । सुषा३४वसो३ । ममो२३४वा । द्रा५
५ २ र र र र र २
यिभो६हायि ॥(१) सुषावसोममद्रिभिरोहाओहाइ३ए ।
२ १र १ १र २ १ २ ऽ २ ऽ २ २ ३र २
सुषावसोममद्रिभिः । ओ३हा । ओ३हाइ३ए३४ । नूना
३ २ १ २ १ २ ऽ १ ऽ
३४म्ना । नोअवि । भिःपारिस्रवा । ओ३हा । ओ३
२ २ ६ २ ३ २ र १ ५ ४
हाइ३ए३४ । अदा३४ब्भःसू३ । रभो२३४वा । ता५रो६
५ २ र र र २ १ २
हायि ॥(२) अदब्भःसुरभिन्तरओहाओहाइ३ए । अदब्भः
१ २ ऽ २ ऽ २ २ ३ २
सुरभिन्तरः । ओ३हा । ओ३हाइ३ए३४ । सुता३४यि

* ऊ० गा० ५.५० २ष्ठ० ३सा० ।

३ २ १ २ र १ २ ऽ २ ऽ
चित्त्वा। आप्सुम॰। दामोअन्धसा। ओ३ह्वा। ओ३
२ २ ३र २ ३र २ २ १ १ ४
ह्वा३ए३४। श्रोणा३४न्तोगो३। भिरो२३४वा। ताप्ररो
५
६हायि(३) ॥ ४ * ॥ [४]

॥ द्वयक्षरोवैयश्वम् ॥ २र र र १ २ र परीतोषिञ्चतासूताम। सो
१ २ र
मो। यउत्तमशुहविः। दधान्वाशुया२ः। नय्यो अप्सु
र २ १ २
वन्तरा। सुषावा१सो२। ममद्रा२३यिभा३४३यिः ॥(१)
२ र र १ २ र
सुषावसोममद्रायिभायिः। सुषा। वमोममद्रिभिः।
१ २ २ १ २
नूनाम्पू१ना२। नोअविभिःपरिस्रव। अदाभ्या१ःसू२।
१ २ २ १ २
रभिन्ता२३रा३४३ः ॥(२) अदब्धःसूरभिन्तारा:। अदा।
१ २ र र
ब्धःसूरभिन्तरः। सुतायिचा१यित्वा२। अप्समदामो
र र १ २ १ २
अन्धसा। श्रोणान्तो१गो२। भिरुन्ता२३रा ३ ४ ३म्।
१
ओ२३४५ई। डा(३) ॥ ५ † ॥ [५]

* ऊ० मां० ५प्र० २ख० ४सा०। † उ० गा० ५प्र० २ख० ५सा०।

॥ आभोशवाद्यम् ॥ परीतोषिञ्चतासुतम्। ए। सो
मोयऊ३त्तामꣳहावि:। दा२३४धा। हायि। न्वाꣳ
योनर्य्योअप्मूअन्तारा। सू२३४षा। हायि। वासोम
मो२३४वा। द्रा५यिभोꣳहायि ॥(१) सुषावसोममद्रिभि
रे। सुषावसो३मामद्रिभायि:। नू२३४नाम्। हायि।
पुनानोअविभि:परिस्रवा। आ२३४दा। हायि। ब्या:
सूरभो२३४वा। ता५रोꣳहायि ॥(२) अदब्धःसुरभिन्त
रए। अदब्धःसू३राभिन्तार:। स्व२३४ते। हायि। चि
त्वाप्समदामोअन्धासा। आ२३४यिणा। हा। तोगो
भिरो२३४वा। ता५रोꣳहायि(३) ॥ ६ * ॥ [६]

॥ माधुच्छन्दसम् ॥ परीतोषा। हायि:। चतामुना
ईमे। सोमोयऊ। तामꣳहा२३४वी:। दधन्वाꣳयोन

* ऋ० मा० ५प्र० १च० ८सा०।

र २ १ २ ३र २ ३र २ १ २
र्ण्यास्य। सुवान्तारा। औह्वो३४वाह्वायि। सुषावासो।

३र २ ३र २ १ २ १
औह्वो३४वाह्वा। ममद्रा२३यिभा३४३यिः। ओ२३४५

ई। डा(३)॥ ३ *॥[७]

॥ ऐडमायास्यम्॥ १ २१ २१र
आयिपरायि। तोषायि। चता

र र २ २१ र
सुताम्। सोमोयऊ३१। तमुह्वायिः। दाधन्वाु

२ २१र २१ र २ २१
या३१ः। नर्य्यास्या। सुवन्तरा। सूषावसो३१। ममद्रा२३

२ १ २१ २१
यिभा३४३यिः॥(१) आयिसुषा। वासो। ममद्रिभा

र २ २१ २
यिः। सूषावसो३१। ममद्रिभायिः। नूनम्पुना ३ १।

र २१ २ २१
नोअविभायिः। परिस्रवा। आदब्भःसू३१। रभिन्ता

२ १ २१ २१
२३रा३४३ः॥(२) आअदा। ब्भाःमू। रभिन्तराः। आ

२ २१ र २
दब्भःमू३१। रभिन्तराः। सूतेचित्त्वा३१। सुमदा।

* ऋ० गा० ७प्र० १अ० ३सा०।

२र १ र र २ १ २
मोअन्धसा । आयिषन्नीगो३१ । भिक्षा२३रा३४३म् ।
१
ओ२३४५ई । डा(३) ॥ ४ * ॥ [८]

२१ ४ र ५ १र २र
॥ पृश्नि ॥ परायितो२३षिच्चतासुतऽहाउ । सोमो
१ २ ८ २ १ २ १ १ २
यउत्तमऽहविः । दधन्वाऽया २ ३: । हावाउहायि ।
२ २र १ २ १ २ २ १
मारियोअ । प्रुवान्ता१रा२३ । हावाउहायि । सुषा
२ १ २ २ १ २ १ २
वा१सो२३ । हावाउहा । मामद्रिभिः । इडा२३भा३४
१
३ । ओ२३४५ई । डा(१) ॥ ३ † ॥ [९]

२ र र र
॥ अभीशवोत्तरम् ॥ परीतोषिच्चतामुतमण । ए ।
र र १ ७ २ ३ ५ २ २
सोमोयऊऽत्तामऽहविः । दा२३४धा । हाउहायि ।
१र र र ७ ८ ३ ५ २ २ १र
न्याऽयोनर्ष्याअप्रूअन्तारा । सू२३४षा । हाउहायि । वा
२ १र ५ ४ ५ २ र र
सोममो२३४वा । द्रापृयिभो६ऽहायि ॥(१) सुषावसोम

---

* ऊ० मा० ७प्र० १ष्व० ४सा० ।

† उ० मा० ७प्र० २ष्व० ३सा० ।

र र ऽ १ ० २ ३
मद्रिभिरे। ए। सुषावसोऽमामद्रि। भायिः। नू२३४
५ २ २ १ र र ० २ १
नाम्। ह्वाऽहायि। पुनानोऽविभिःपारिस्रवा। आ
५ २ २ १ २१ ५ ४
२३४दा। ह्वाऽहायि। व्याःहरभो२ ३ ४वा। ताःपूरो६
५ २ १ ०
ह्यायि॥(२) अदब्धःसुरभिन्तरए। ए। अदब्धःसूऽराभि
२ ३ ५ २ २ १ र र ७
न्तारः। सू२३४ते। ह्वाऽहायि। चित्त्वाप्सुमदामोऽअ
२ ३ ५ २ ३ १ र २ १
न्धासा। आ२३४यिणा। ह्वाऽहा। तोगोभिरो२ ३ ४
५ ४ ५
वा। ताःपूरो६ह्यायि(३)॥ ४ * ॥ [१०]

१२र१र२ १र२१ र र ५
॥ सम्मतम्॥ परीतोषिञ्चतासुताम्। सोमोयउत्त
१ २ १ २र १
मऽह्वायिः। दधन्वाऽ२३याः। नारियोऽअ। सुवा
२ ३र २ ३र २ १ २ १
न्तारा। औहोऽ३४वाहायि। सु। षावा२३सोऽ३। हो
२ २ १ २ २१र२ १र २१
वाऽह्वा। ममद्रा २ ३ यिभा३४३यिः॥(१) सुषावसोममम
२ १ र २१ र २
द्रिभायिः। सुषावसोऽममद्रिभायिः। नूनमपू २ ३नो।

* ऋ० गा० ७अ० २ष० ४सा०।

१ २ १ २, ३र१ ३र२ १
नोअविभिः। परायिस्तावा। औहोइ४वाहायि। अ।

२ १२ २ १ २
दाभ्याइ३:सूइ। हेवाइहा। रभिन्ताइराइ४३: ॥(२)

१ २ १२१ २१ र
अदब्धःसूरभिन्तराः। अदब्धःसूरभिन्तराः। सुतेचाइ३

२ १ २र र१ २, ३र२ ३र२
यित्वा। आसुमदा। मोआन्धासा। औहोइ४वाहा

१र २ १२ २ १
यि। ओ। णान्तोइ३गोइ। हेवाइहायि। भिरुत्ता

९ १
इ३राइ४३म्। ओइ३४५ई। डा(३) ॥ ३ * ॥ [११]

५र२ ४५४र ५ २र१२
॥ कालेयम् † ॥ परीतोइषिच्चतासुताम्। सोमोय

१ २३ ९१ २३र २ १
ज। तमुहवाइयिः। दधन्वाुयाइः। नाइ३४।

३४र ५ २ २ १ ३२ २ ५
रियोअसुव। ताइरा। सुषावसो। वाइ४३ओइ४वा।

४ ४
ममापुद्रिभायिः। हेपुई। डा(३) ॥ ४ ‡ ॥ [१२]

२र र १ ५ १
॥ रौरवम् ॥ परीतोषिच्चाइतासूइ३४ताम्। सोऽ

---

* ८७ गा० ८प्र० १ष्ठ० ३सा०।

† "महाकालेयम्"—इति ख०-पाठः।

‡ ऊ० गा० ८प्र० २ष्ठ० ४सा०

३ र र र ३ २ १
मोयउत्तमꣳहविर्ध्दधन्वाꣳयोनर्य्योअप्सुवा२न्तरा। ओ
२ २ १२ र २ १ २ २
ह्वा३उवा। सुषावसोममा २ ३ ह्वायि। ओह्वा३उवा।
१ ४ ५ २ र र १
द्रिभायिः। औ३ह्वोवा॥(१) सुषावसोमा३मद्रा२ ३ ४
५ १ र र र र र
यिभायिः। सूऽषावसोममद्रिभिर्न्नृनम्पुनानोअविभिःपरा२
३ २ १ २ २ १ २ १
यिस्रवा। ओह्वा३उवा। अदब्धःसुरभा२३यिह्वायि। ओ
२ २ १ २ ३ ५ २ १
ह्वा३उवा। तरा। औ३ह्वोवा॥(२) अदब्धःसुरा३भि
५ १ र र र
न्ता२३४राः। आ। दब्धःसुरभिन्तरःसुनेचित्त्वाऽसुमदा
र २ २ १ २ २ १र र र २
मोआरन्धसा। ओह्वा३उवा। औणन्तोगोभिरु२३ह्वा
१ २ २ १ ४ ५ ४
यि। ओह्वा३उवा। तराम्। औ२३ह्वोवा। ह्वोयुई।
डा(३)॥ ११ *॥ [१३]

॥ आष्टादꣳष्ट्रोत्तरम्॥ १ २र १र २ र १र २र १र
परीतोषिञ्चतासुतमैयादौ।
२ २ १र २र १ २ १ १र
ह्वो३वा। सोमोयउत्तमम्। ह्वोवा२३यिः। ऐया२३त्।

* ऋ० गृ० ८म० ३अ० ११सा०।

१ र २ १र र र १ १
औ२३होवा। दधन्वाञ्योनर्याअप्सुव। तारा २ ३।
१र १ र २ १र२ १र २ १
ऐया२३त्। औ२३होवा। सुषावसोमम। द्रायिभा
१र १ र २, २१र २ १र
२३यिः। ऐया२३त्। औ२३होवा३४३ ॥(१) सुषावसो
२१ २ १र२र १र २ २ १र२ १र२ १
ममद्रिभिरैयादौ। होश्वा। सुषावसोमम। द्रायिभा
१र १ र २ र १ २र १र २
२३यिः। ऐया२३त्। औ२३होवा। नूनम्पुनानोविभिः
१ १र २ र र १ २
परि। स्रावा२३। ऐया२३त्। औ२३होवा। अदब्धः
१ १र २ र २,
सुरभि। ता२३त्। ऐया२३त्। औ२३होवा३४३ ॥(२)
१ २ १ २१र२र१र २ २ १ २
अदब्धःसुरभिन्तरऐयादौ। होश्वा। अदब्धःसुरभि।
१ १र १ र२ १र २र १
तारा२३ः। ऐया२३त्। औ२३होवा। सुतेचित्त्वाप्सु
२र र १ १र र १र२र
मदामोअ। धासा२३। ऐया२३होवा। श्रीणन्तोगो
२ १ १र र २,
भिरु। तारा२३म्। ऐया२३त्। औ२३होवा३४३।
१
औ२३४५। ई। डा(३) ॥ १८ * ॥ [१४]

* ऋ० मा० १२प्र० १ष० १८सा०।

॥ उत्सेधम् ॥ ·परीतोषिञ्चतासुतम्। सोमः। य
ज३४औहोवा। तमुञ्चवाऽयिः। हा३१उवा २३।
ज ३ ४ पा। दधाञ्न्वाꣳया। औहोवाहायि। नारि
योआ। ꣳसुवन्तारा। हा३१उवा२३। अ३४पा।
सुषाऽवसो। अहौवाहायि। ममाऽद्राꣳयिभा ६ ५ ६
यिः ॥(१) सुषावसोममद्रिभिः। सुषा। वसो३४औहो
वा। ममद्रिभाऽयिः। हा३१उवा२३। ज ३ ४ पा।
नूनाऽपुना। औहोवाहायि। नोअविभायिः। परि
स्राव। हा३१उवा२३। ज३४पा। अदाऽध्वःसु। औ
होवाहायि। रभाऽयित्नाꣳरा६५६ः ॥(२) अदध्वःसुर
भिन्तरः। अद। ध्वःमू३४औहोवा। रभिन्तराऽरः।
हा३१उवा२३। ज३४पा। सुताऽयिचित्त्वा। ·औहो
वाहायि। आप्सुमदा। मोअन्धासा। हा३१उवा२

३। ऊ३४पा। श्रीणा३न्तोगो। औहोवाद्दायि। भि
रु३त्ताप्रा६प्र६म्३) ॥ २० * ॥ [१५]

॥ पृश्नि ॥ परायितो२३षिच्चतामुतद्दाउ। सोमो
यउत्तमद्दविः। दधान्वाद्या२३:। द्दोवाद्दायि।
नारियोत्र। प्सवान्ता१रा२३। होवाद्दायि। सुषा
वा१मो२३। द्दोवाद्दा। मामद्रिभिः। द्रुडा२३ ॥(१)
सुषावा२३मोममद्रिभिर्हाउ। सुषावसोममद्रिभिः। नू
नाम्पू१ना२३। द्दोवाद्दायि। नोत्रविभिः। परायि
स्वा१वा२३। द्दोवाद्दायि। अदाभ्या१:सू२३। होवाद्द
द्दा। राभिन्तरः। द्रुडा२३ ॥(२) अदाभ्या२३:सुरभि
न्तरोहाउ ॥(२) अदभ्यःसुरभिन्तरः। सुतायिचा१यि
त्वा२३। द्दोवाद्दायि। अप्सुमदा। मोत्रान्या१सा

* ऋ० गा० १२प्र० २अ० २०सा०।

१ २ २ १२ २ १ २ २
२३। ह्वावाऽहायि। श्रीणान्नोऽगोरऽ। ह्वावाऽहायि।
१ २ १
भायिरुत्तरम्। इडाऽरऽ(३)॥ ६ *॥ [१५]

३ ४२१२ ४ ५ २ २ २ १
॥ वाम्रम्॥ परीनोषिञ्चता। ह्वाऽहाऽयि। सूऽरऽ
५ १२ १ १
४। तꣳसुतोवा। सोमोह्वोऽयि। यऊहोऽ। ता
७ १ २२ १ २ ३
मꣳह्वावाऽयिः। दाधन्वाꣳय। नरायियोऽआ। प्सु
२ २ ५ १ १ १ १
वाउवाऽ। ऊऽ४पा। तराऽ। सूषाऽवासोऽ। मम।
३ ५२ २ ४ ३२ ४ १२ ४ ५२ २
द्राऽयिभाऽऽ४औह्वोवा॥(१) सुषावसोममा। ह्वाऽह्वा
१ ५ १ १
यि। द्राऽऽ४यि। भिर्द्रिभोवाःसुषाह्वोऽई। वसाह्वो
१ ७ १ २२ २ १ २
ऽ। मामद्रायिभाऽयिः। ननम्पुना। नोआवायिभा
३२ २ ५ १ १ १
यिः। पराउवाऽ। ऊऽ४पा। स्ववाऽ। आदाऽब्भाः
१ ३ ५२ ८ ३ ४ ५
सूऽ। रभि। ताऽरराऽऽ४औह्वोवा॥(२) अदब्भःसुर
२ २ १ ५ १
भि। ह्वाऽहाऽयि। ताऽऽ४। रस्तरोवा। अदाही

* ऊ० मा० १५५०१अ० ६मा०।

रयि। अःहहो२। राभिन्तारा२:। हतेचित्वा। प्रु
मादा। मआउवाइ। ऊ३४पा। धमा२। आयिणा
२न्तोगो२। भिहु। ता२रा२३४औहोवा। ऊ३२३
४पा(३) ॥ १२ * ॥ [१६]

॥ मानवोत्तरम् ॥ हावायि। परीतोषिञ्चतासुतम्।
होवायि। सोमोयउत्तमःहविः। दाधन्वाःयः। ना
रियोआ३१। पःवारन्ता२३४रा। सुषावा२ ३ सो ३।
मारमा२३४औहोवा। द्रा२३४यिभीः ॥(१) होवायि।
सुषावसोममद्रिभिः। होवायि। हषावसोममद्रिभिः।
नूनम्पुना। नोअविभा३१यिः। परा२यिस्वा२३४वा।
अदाध्वा२:हइ३। रा२३४औहोवा। ता२३४राः ॥(२)
होवायि। अदब्धःसुरभिन्तरः। होवायि। आदब्धः

* ऊ० मा० १५प्र० २अ० १०मा०।

सुरभिन्तरः। ह्वोवायि। आदब्यःसुरभिन्तरः। ह्वते
चित्त्वा। आप्सुमदा३१। मोआरन्धा२३४सा। श्रीणा
न्तो २ ३ गो ३। भारयिह्व२३४औह्वोवा। ता २ ३ ४
राम्(३)॥ १३ *॥ [१७]

॥ आनूपं वाध्र्यश्वम्॥ परायिपरायि। तोपिञ्चा ३
ताह्व१ता२म्। सोमोयउ। तमाङ्हा१वा२यिः। दा
धा२न्ग्याङ्या२ः। नर्य्योअप्सुवन्ता२३रा। सुषावा३मो
३। मा२३मा३। द्रा३४५यिभोइ्हायि॥(१) सूषासूषा।
वसोमा३माद्रा१यिभा२यिः। ह्वषावसो। ममाद्रा१यि
भा२यिः। नूना२म्पूना२। नोअविभिःपरिषा२३वा।
अदाब्या३ःह्व३। रा२३भा३यि। ता३४५रोइ्हायि॥(२)
अदाअदा। ब्यःसुरा३भायिन्ता१रा२ः। आदब्यःसु।

* ऋ० गा० १५प्र० २च० १३सा०।

१ २ १ १ १ २ २र
रभायिन्ता१रा२:। ह्वते२चायित्वा२। अप्सूमदीमो
१ २ १र २ १ १ ४ २
अन्धा२३सा। ओणान्तोऽगोऽ। भा२३यिहूऽ। ता
५
३४५रोऽहूत्तायि(३) ॥ १४ * ॥ [१८]

॥ यौधाजयम् ॥ ३२ २ ४ ५ २, ३
परा३१यि। तोऽषि। च। तान्
५ १ २ १ १ २ ३
२३४ताम्। सोमो३। यजा२। तमा३४५म्। हा२
५ १ १ २र १ २ १र ३ २
३४वीः। दधान्वाण्याः। न। र्य्याआ२। पसुवा३४५।
३ ५ २ १ ३ २ ३
ता२३४रा। सुषा२। वासो२। ममा३४५। द्रा२३४
५ ३ २ २ ४ऽ ५ २, ३ ५
यिभीः॥(१) सुषा३१। वाऽसो। मम्। आद्रा२३४यिभायिः।
१ २ १ १ ३ २ ५ १र १ २
हूषाऽ। वसो२। ममा३४५। द्रा२३४यिभीः। नूनापु
१ २ १ ३ २ ३ ५
ना। नः। अविभा२यिः। परा३४५यि। स्वा२३४वा।
२ १ ३ २ ३ ५
अदा२। ब्याःहू२। रभा३४५यि। ता२३४राः॥(२)
३ २ ५ ५ २ १ ५ १ २
अदा३१। ब्याः३मू। र। भिन्ता२३४राः। आदा३।

* ऊ० गा० १५प्र० २अ० १४सा०।

१ ३२ ३ ५ २१ २१
ब्यःह्व२। रभा३४५यि। ता२३४राः। सुतायिचित्त्वा।
२ १ ३२२ ३ ५ २२
अ। प्सुमदा२। मोआ३४५। धा२३४सा। श्रीणा२।
१ ३२ ३ ५
तोगो२। भिहू३४५। ता२३४राम्(३) ॥५ * ॥ [१९]

५२२ ४५४२ ५ १२२
॥ द्वैगतम्॥ परीतोऽषिञ्चतासुताम्। सोमोयउ।
१ २ ३२ १२२ १२
तमाँ३ह्वा१वा२यिः। दधा३। ह्वौ३ह्वो३वा। न्वाँ
२२ ७ १ १३ ५२२
योनर्य्याअप्ह्वअन्तारा२। सुषा२३। वा२सो२३४औह्वो
२ १ ३११११ ५२२ २५
वा। ए३। ममा२द्रिभा२३४५यिः॥(१) सुषावाऽसोम
४ ५ १२२ १२ ३२२
मद्रिभायिः। ह्वषावसो। ममाद्रा१यिभा२यिः। नूना
ऽ२२ १२२ ७ १
२म्। ह्वौ३ह्वो३वा। पुनानोअविभिःपारिस्रावा२। अ
१ ३ ५२२ २ १ ३
दा२३। ब्या२ःसू२३४औह्वोवा। ए३। रभा२यिन्तरा
११११ ५ २ ४५४ ५ १ २
२३४५ः॥(२) अदब्धाऽःसुरभिन्तराः। आदब्धःसू। र
१ २ ३२ ऽ २२ १२
भायिन्ता१रा२ः। सुताऽयि। ह्वौ३ह्वो३वा। चित्त्वा

° ऋ० गा० २६५ प्र० १अ० ५सा०।

ऽ० १ २ ० ३ १२ १ ० १ २
एमदामोअन्धसा२। श्रीणा२३। तो२गो२३४औ

२ २ ३ ३ १ १ १ १
ह्वोवा। ए३। भिरू२त्तरा२३४५म्(३) ॥ ६ ॥ [२०]

२ २ १ २ १ २ १ २ १ ३ १
॥ काण्वरथतन्तरम् ॥ पारीतोषिच्यतासुताम्। सो

१ २ ३ २ १ ३ २ २ २ २
मोयजा। ताऽमाऽहाऽवायिः। दधन्वाऽयोनर्य्याऽप्सु

३ ३ २ १ २ ५ २
वन्तरा२३४ऐहो। सुषावा२३४सो। ममा३१उवा२३।

२ २ ३ २ २ १ २ १ २ १ २ १ २ २ १ २
ए३। द्रिभिरा ॥(१) ह्वषावसोममद्रिभायिः। सुषावसो।

२ १ २ २ २ २ ३
माऽमाद्राऽयिभायिः। नूनम्पुनानोऽविभिःपरिस्रवा२३

५ २ १ ५ २ २
४ऐषो। अदब्धा२३४ःहा सू। रभा३१उवा२३। ए३।

२ ३ २ २ १ २ १ २ २ २ १ २
तरत्रा ॥(२) आदब्धःसुरभिन्तराः। अदब्धःहा। रा३

१ २ २ २ २ २ ३ ५ २
भायिन्ताऽराः। सुतंचित्ताप्सुमदामोअन्धसा२३४ऐहो।

२ २ १ ५ २ १ २ २ ३ २
श्रीणन्तो२३४गो। भिरू३आउवा२३। ए३। तरमा(३)

॥ १८ ॥ [२१]

* ऋ० गा० १६प्र० १अ० ६मा० ।
† ऋ० गा० १५प्र० २अ० १८मा० ।

अथ तृचात्मके तृतीय-सूक्ते—

प्रथमा।

१ २ ३ १ २ २३३ ३ २ ३
असाविमेमाअरुषोवृषाहरी
१ २ ३ २ ३ १२ २२
राजेवदस्मोअभिगाअचिक्रदत्।
२ २३ ३१२ ३१२ ३ १२
पुनानोवारमत्येष्यव्ययꣳश्येनो
२२ ३ १२ ३१ २
नयोनिङ्घृतवन्तमासदत्॥ १ *॥

"सोमः" "असावि" अभिषुतोऽभूत्। कीदृशः सोमः? "अरुषः" आरोचमानः, "वृषा" वर्षकः, "हरिः" हरितवर्णः; स च राजेव "दस्मः" दर्शनीयः सन् "गाः" उदकानि "अभि" लक्ष्य "अचिक्रदत्" शब्दं करोति स्व-रस-निर्मोक-समये, पश्चात् पुनानः "अव्ययम्" अविनश्यं "वारं" वालं दशापवित्रम् "अत्येषि" हे सोम! अतिक्रम्य गच्छसि। ततः "श्येनो न" श्येन इव "योनिं" स्वीयं स्थानं "घृतवन्तम्" उदकवन्तम् "आसदत्" प्रविशति॥

"अत्येषि"-"पर्येति"—इति पाठो, "आसदत्"-"आसदम्"—इति च॥ १॥

---

* ऋ० आ०९, २, २, ५ (२भा० १९१ पृ०) = सा० व०१, ३, १ ।

अथ द्वितीया।

३ १ २ ३ १ २ ३ १ २ १ २ ३
पर्जन्यःपितामहिषस्यपर्णिनो
१ २ ३ १ ३ २ ३ १ २
नाभापृथिव्यागिरिषुक्षयन्दधे।
१ २ ३ १ २ ३ १३ ३ १ २ ३
स्वसारआपोअभिगाउदासर
२ २ ३ १ २ ३ २
न्त्सङ्गावभिर्वसतेवीतेअध्वरे ॥ २ * ॥

यस्य "महिषस्य" महतः "पर्णिनः" पर्णवतः पननवतो वा सोमस्य "पर्जन्यः" "पिता" जनकः "सः" सोमः "पृथिव्याः" † "नाभा" नाभौ नाभिस्थानीये ‡ द्युविर्द्याने "गिरिषु" गिरिसम्बन्धिषु द्यावसु "क्षयं" निवासं "दधे" धारयति अभिषव-समये। तथा "स्वसारः" अङ्गुलयः "आपः" वसतीवर्यः ¶ "गाः" आगिरार्थाः स्तुतयो वा § "अभि" आभिमुख्येन "उदासरन्" उद्गच्छन्ति गच्छन्तु, "वसते", "सम्" गच्छते च, "गावभिः" साकम्। कुत्र? "वीते" कान्ते "अध्वरे" यज्ञे॥

"उदासरन्"-"उतासरन्"—इति पाठो, "वीते"-वीथे"—इति च॥ २॥

---

* ऋ० वे० ७, ३, ७, २।

† 'पृथिव्याः समुत्पन्नः'—इति वि०।

‡ 'नाभा—नाभि-स्थानीयः'—इति वि०।

¶ 'अप्सु साधुरूपः'—इति वि०।

§ 'गाः—सोमस्य रश्मयः'—इति वि०।

अथ तृतीया।

३ १२ ३ १२ २२ ३ १ २ ३
क्रविर्वेधस्यापर्य्येषिमाहिन

२ ३ १ १ ३ ३१ २१
मत्योनमृष्टोअभिवाजमर्षसि।

१ १२ ११ २
अपमेधन्दुरितासोमनोमृड

३ १८ २२३ १ २ ३ १ २
घृतावसानःपरियासिनिर्णिजम्॥ ३ * ॥ १३

हे "सोम!" "कविः" क्रान्तदर्शी सन् "वेधस्या" यागविधानेच्छया "माहिनं" महनीयं पवित्रं "पर्येषि" परिगच्छसि, पश्चात् "मृष्टः" प्रक्षालितः "अत्योन" † अश्वइव "वाजं" सङ्ग्रामम्‡ "अभ्यर्षसि"। सोम! "दुरिता" अस्मदीयानि दुरितानि "अपमेधन्" परिहरन् ¶ "नः" अस्मान् "मृड" सुखय "घृतावसानः" घृतानि उदकानि वसानः आच्छादयन् "परि यासि" अभिगच्छसि। किंलक्षणं? "निर्णिजम्" पवित्रम्॥

"सोमनोमृडघृता"-"सोममृडयघृतम्"—इति पाठौ॥३॥ १३

इति सामवेदार्थप्रकाशे उत्तरार्चस्य दशमस्याध्यायस्य नवमः खण्डः॥ ९॥

---

* ऋ०वे० ७, १, ७, १।

† 'अत्यः—अतीत्य गच्छति'—इति वि०।

‡ 'वाजम्—अन्नं चरुपुरोडाशादिलक्षणम्'—इति वि०।

¶ 'अपमेधन्—एध वृद्धौ (भ्वा० आ०) अन्तर्भिः स्तुतः संवर्धति'—इति वि०।

॥ महासामराजम् ॥ ह्राउह्वोवाऽहायि। असावि

सोमोऽआ। रुषोऽवाऽ। पाहरा२३४५यिः। राजेव

दस्मोऽआ। भिगाऽ। आऽ। चिक्रदा२३४५त्। पुना

नोवाराऽमा। जियाऽयिषीऽ। अव्यया२३४५म्। श्ये

नोनयोनीऽघा। तवाऽन्ताऽम्। आमदाऽदाउ ॥(१)

पर्ज्जन्यःपिताऽमा। हिपाऽस्याऽ। पर्णिना २ ३ ४ ५:।

नाभापृथिव्याऽगायि। रिषूऽन्ताऽ। यन्दधा२३४५यि।

स्वसारआयोऽआ। भिगाऽजऽत्। आसरा२३४५न्।

सङ्गावभिर्वाऽमा। तेवाऽयितेऽ। अध्वरा३२उ ॥(२)

कविर्वधस्याऽपा। रियाऽयिषीऽमाहिना२३४५म्। अत्यो

नम्रष्टोऽआ। भिवाऽजाऽम्। अर्षसा२३४५यि। अप

सधन्दूऽरायि। तासोऽमाऽ। नोम्रडा२३४५। ह्राउ

र २ २ र १ २ ४ २
ह्वोवाऽह्वायि। घृतावसानाऽःपा। रियाऽसी३। नि
२ १११
र्णिजाऽमाउवा२३४५(३) ॥ ८ * ॥ [१]

३ ४र ३र ४र ३र ४ १र ४
॥ हिरभ्यासाल्लौशम् ॥ असाविमोमोअरुषोवृषोवृ
५र ३२ ३१११ ३र र २ र
षा। ह्वरायिः। ह्वरा२३४यिः। राजे३१२३४। वदस्मो
र १ १ १ ७ ३ ४र र
अभिगाअचि। क्रदात्क्रदात्। पुना३१२३४। नोवार
र १ २ १ २, ३र २ २ र
मत्येष्य। व्ययांव्ययाम्। श्येनो३१२३४। नयोनिङ्क्त
३ २ ४ ४ ३ ४ ३र ४ ४
व। तमाऽमाप्रदाई५ई५ई्त् ॥(१) पर्ज्जन्यःपितामहिषस्य
५ ६ २ १ १ १ १ ३र २ २ र
प। र्णिना२३४५ः। नाभा३१२३४। पृथिव्यागिरिषुक्षयस्।
१२ १२, ३ २ २र र र र १
दधायिदधायि। स्वसा३१२३४। रआपोअगाउदा। म
२ १ २, ६ २ २ र र ६र २ ४
रान्सरान्। सङ्क्रा३१२३४। वभिर्वसतेवो। नेआऽध्वा
४ ३ र ४ र ६र ४ ५ र र ३ २
५रा६५ई५ई्यि ॥(२) कविर्वेधस्यापरियेषिमा। हिनाम्।
३ १ १ १ १ ३ २ २ र र
हिना२३४५म्। अत्यो३१२३४। नसृष्टोअभिवाजम।

* ऋ० मा० ५प्र० २अ० ८सा०।

१२ १२, ३२ २२ २ २
षसायिषसायि। अपा३१२३४। सेधन्दुरितासोमनः।
१ २१ २ ३ २ २ २ २, ३ २
स्तृडास्तृडा। घृता३१२३४। वसानःपरियां। मिनाऽ
४
यिर्णापयिजाइपृइम्(३)॥ २ ॥ ।२।

॥ ऐडमायास्यम्॥ २ २ १ २ २ १
असावायिसो२३। मोअरुषा२
२ २ २ २ २ १ २ २
३:। ए३। वृषाक्षरिरे३। राजेवादा२३। सोअभा
२ २ २ १ २ १
यिगा२३:। ए३। अचिक्रदद३। पुनानोवा२३। रमता
२ २ २ २ १ २ १
यिये२३। ए३। षिअव्ययमे३। ग्येनोनायो२३। नि
१ २ २ २ २ १
क्रृतावा२३। ए३। तमासदद३४३॥(१) पर्ज्जन्याःपा२
२ १ २ २ २ २
३यि। तामहायिषा२३। ए३। स्यपर्णिनए३। नाभा
१ २ १ २ २
पार्था२३यि। व्यागिरायिषू२३। ए३। क्षयन्दधए३।
२ २ १ २ १ २ २ २
स्वसाराआ२३। पोअभायिगा२ ३:। ए३। उदासरन्ने
२ २ ३ २ १ २
३। सङ्गावाभा२३यिः। वसतायिवा२३यि। ए३। पो

* ऋ० गा० ८प्र० १अ० २भा०।

अभायिगा२३:। ए३। उदासरन्ने३। सङ्गावाभा२३
यि:। वसतायिवा२३यि। ए३। तेअध्वरए३४३॥(२)
कविर्वायिधा२३। स्मापरायिये२३। ए३। षिमाहिन
मे३। अत्योनामा२३। ष्टोअभायिवा२३। ए३। ज
मर्षसिए३। अपसायिधा२३न्। दुरितासा२३। ए३।
मनोमृडए३। घृतावासा२३। नःपरायिया२३। ए३।
सिनिर्णिजमे३४३। ओ२३४५ई। डा(३)॥ ४ *॥ [३]

॥ वासिष्ठम्॥ हायि। उङ्गवायि। असा३४औहो
वा। विमो। मो३अरु। षोवृषाङ्गरायिः। राजे३ ४
औहोवा। वदा। स्मो३अभि। गाअचिक्रदान्। पुना
३४औहोवा। नोवा। रा३मति। एषिअध्वयाम्। ग्ये
नो३४औहोवा। नयो। निघृत। व। तमा३साप्रदाई ५

---

* क० गो० १७५० २अ० ४सा०।

२ २ ३र ४र ५ १ २ १
६त्॥(१) पर्ज्जा३४औह्वोवा। न्यःपायि। ता ३ मह्वि।
२ ३ ४ ५ ३र २ ३र ४र ५ १ १ १
षस्यपर्णिनाः। नाभा३४औह्वोवा। पृथायि। व्या३गि
२ ३ ४ ५ ३ २ ३र ४र ५ १ २
रि। पृक्षयन्दधायि। खसा३४औह्वोवा। रश्मा। पो
१ २ ३ ४र ५ ३ २ ३र ४र ५ १
३अभि। गाउदासरान्। सङ्ग्रा३४औह्वोवा। वभायिः।
२१र २ ३र १ ४ ३ २ ३र ४र
वसते। वौ। तेआ३ध्वा५रा६५६यि॥(२) कवा३४औह्वो
५ १र २ १ २र ३ ४र ५ ३ २
वा। वेधा। स्या३परि। पृषिमाह्विनाम्। अत्यो ३ ४
३र ४र ५ १ २ १ २र ३ ४ ५ ३ २
औह्वोवा। नमा। ष्टो३अभि। वाजमर्षसायि। अषा
३र ४र ५ १र २ १ र २र ३ ४र ५ २
३४औह्वोवा। मेधान्। दुरिता। सोमनोमृडा। ह्वा
३ २ ४ २ ३र ४र ५ १ २ १
यि। उरुवायि। घृता३४औह्वोवा। वमा। नःपरि।
४ ३ २ ४
या। मिना३यिर्णापृयिजा६५६म्(३)॥ १७ ॥ [४]

॥ सीमानांनिषेधम्॥ २ १ २ १
अमो। वाह्वायि। वायि
२र १ २ १ १ र र
सोमोअरुंषो। वृषाह्वारा२यिः। राजेवदस्रोअभिगाः।

---

* कौ० गो० ७प्र० २अ० १७खं०।

२ १ १ २ १ २ ३ ४ र
अचिक्रादा२३त्। पू२३ना। नो२३वा३४। रमतिये

५ २ २ १ २ १ २ ३
षिअ। व्या३याम्। श्या२३यिनो। ना२३यो३४। नि

४५ ३२ ४ २ १ २
ह्नुतव। तमा३साप्रदाई५६त्॥(१) पज्जी। वाह्वायि।

१ र २ १ १ र र
न्याःपितामहिषा। स्यपर्णायिना२ः। नाभापृथिव्यागि

२ १ १ २ १ २
रिषू। त्तयन्दाधा२३यि। स्वा२३सा। रा२३आ३४

३र४ ३ ४र ५र २ २ १ २ १ २
पोअभिगाउदा। साश्रान्। सा२३या। वा२३भा३४

३ ४र५र ३र २ ४ २ १
यिः। वसतेवो। तेआ३ध्वा५रा६५६यि॥(२) कवो।

२ १ र २ र १
वाह्वायि। वायिधस्यापरियायि। षिमाह्वायिना२म्।

१ र र २ १ १ २
आत्योनम्रष्टोअभिवा। जमर्षासा२३यि। आ२३पा।

१ २ ३ ४र र ५ २ २ १
मा२३यिधा३४न्। दुरितामोमनः। मा३र्डी। घा२३

५ १ २ ३ ४ ५र ३ २ ४
र्त्ना। वा२३मा३४। नःपरिया। सिना३यिर्णा५यिजा

६५६(३)॥ २० * ॥ [५] १३

* ऋ० गौ० २३प्र० ८अ० २८मा०।

अथ दशमे खण्डे—

प्रगाथात्मके प्रथम-सूक्ते,

प्रथमा।

१ २ ३ २ ३ १र २र
आयन्तद्वस्वूर्य्यं विश्वेदिन्द्रस्यभक्षत।
१२ २ १र २र३ १ २ ३ १ २ ३ १र २र
वसूनिजातेजनिमान्योजसाप्रतिभागन्नदीधिमः॥ १*॥

हे अस्मदीया जनाः! "आयन्त इव" सूर्य्यं यथा समाश्रिता रश्मयः सूर्य्यं भजन्ते, तथा "इन्द्रस्य" "विश्वेत्" विश्वान्येव धनानि "भक्षत" भजत। "वसुजातः" प्रादुर्भूत इन्द्रः यानि "वसूनि" धनानि "ओजसा" बलेन "जनिमा" जनिष्यमाणानि करोति अतो "भागं न" पित्र्यं भागमिव तानि धनानि "प्रति दीधिमः" प्रतिधारयेम॥

"जातोजनिमानि"-"जातेजनिमानि"—इति पाठौ॥ १॥

अथ द्वितीया।

१ २ ३ १र २र ३ १र २र ३ १ २
अलर्षि†रातिंवसुदामुपस्तुचिभद्रादिन्द्रस्यरातयः।
१ २ १ १ २ ३ १र २र३ १ २ ३ १ १ ३ १ २
योअस्यकामंविधतोनरोषतिमनोदानायचोदयन्॥२‡॥ १४

हे स्तोतः! "अलर्षिरातिम्" अपापक्र-दानम् अपापिष्ठस्य दातारङ्कुर्य्यं [अलर्षि-पद-समानार्थमनर्श-पदं यास्केन व्याख्या-

* क० आ० ३, २, ३, ५ (२भा० ५११ ह०) = ऋ० वे० ७, ३, ३, ४।
† "अलऋषि"—इति क० पु० पाठः।
‡ ऋ० वे० ७, ७, ३, ४।

तम्—"अनर्शरातिमनश्लील-दानमश्लीलं पापकम्"-इति (निरु० नै० ६,२३)] "वसुदां" धनस्य दातारमिन्द्रम् "उप स्तुहि"* यतः "इन्द्रस्य" "रातयः" दानानि "भद्रा" कल्याणानि महद्ऐश्वर्यकारीणीत्यर्थः। "यः" इन्द्रः स्वकीयं "मनः" "दानाय" अभीष्टप्रदानाय "चोदयन्" प्रेरयन् "विधंतः" परिचरतः "अस्य" स्तोतुः "कामम्" इच्छां "न रोषति" न हिनस्ति। तमिन्द्रमुपस्तुहीति सम्बन्धः॥

"अनर्शरातिम्"—इति छन्दोगाः पठन्ति, "अनर्शरातिम्"—इति बह्वृचाः; "योऽस्य"-"सोऽस्य"—इति च॥ २॥ १४

॥ आयन्तीयम्॥ आयन्तइवसू१रायाम्। विश्वा२ यिदिन्द्रा२। स्वभा२ज्ञाता। वामूनिजातोजनिमा। नि र्योजा१सा२। प्रतिभागन्नदी२घिमः। प्रा२३नी। भा गान्ना३दा। ङम्। धिमाः। ओ२३४वा॥(१) प्रति भागन्नदा१यिधायिमाः। प्रता२यि। भागा२म्। न दा२यिधायिमाः। आङ्गर्षिरातिम्बसदाम्। उपास्त१

* 'उपस्तुहि—समीपे स्थित्वा स्तुहि'—इति वि०।

२ १२ २ २ १ २ १ २ १ २
ह्वायि। भद्राइन्द्रस्यरातयः। भा२३द्राः। इन्द्रास्याइ
२ १ ३ २ १ ५ २ २
रा। ऊम्। तयाइः। ओ२३४वा॥(२) भद्राइन्द्रस्य
२ १ १ १ १
रा१तायाः। भद्रा२इन्द्रा२। स्यरा२तायाः। याअ
२ २ १ २ १ २ ११ २ १२ २ २ २ १
स्यकामम्बिधतः। नरोषा१ता२यि। मनोदानायचोद
२ १ २ १२ २ २ १ ३ २
यन्। मा२३नाः। दानाया३ चो। ऊम्। दया३।
१ ५ ३ १ १ १ १
ओ२३४वा। हे२३४५(३)॥ ९ *॥ [१]

२२ २२
॥ निषेधम ॥ आयन्तइवा३सूरियाम्। विश्वायिन्द्रा।
१ २ १
२ १ १ २ १ ४ ५ २ ३
स्यभक्षता२। इहा३। वामू३नायिजा। हाहो२३४
५ १ २ १ २ २ १ २ १ २ १ २
हा। तोजनिमा। नियोजा२३सा। इहा३। प्राता
५ ५ २ ३ ५ ३ २ ४
३यिभागाम्। हाहो२३४हा। नदा३यिधा५यिमा६५
३ १ १ १ १
६ः। हे२३४५(३)॥ २ †॥ [२] १४

---

* ऊ० गा० ५प्र० २अ० ९सा०।

† ऊ० गा० १५० २अ० २सा०।

अथ प्रगाथात्मके द्वितीय-सूक्ते--

प्रथमा।

१२ ३११ ३१२ ३ १२
यतइन्द्रभयामहेततोनोअभयङ्कृधि।

११ ३ १७ ३१२१ २३ २७ ३१८ ३८
मघवञ्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥१*॥

हे "इन्द्र!" "यतः" हिंसकात् "भयामहे" वयं, ततः "नः" अस्मभ्यम् "अभयं" "कृधि" कुरु। हे "मघवन्" धनवन्निन्द्र! "नः" अस्मानुद्दिश्य "तत्" तस्मै "तव ऊतये" त्वत्कर्तृकायै रक्षायै "शग्धि" शक्तो भव। किञ्च "वि द्विषः" अस्मद्द्वेष्टॄन् विजहि; "वि मृधः" अस्मद्धिंसकान् विजहि॥

"ऊतये"-"ऊतिभिः"—इति पाठो॥ १॥

अथ द्वितीया।

१८ २८ ३१ २ ३२७ ३१ २ ३२
त्वञ्हिराधसस्पतेराधसोमहःक्षयस्यासिविधर्त्ता।

१२ ३१२ ३१ १
तन्त्वावयम्मघवन्निन्द्रगिर्वणःसुतावन्तोहवामहे ॥२†॥१५

हे "राधसस्पते" धनस्य स्वामिन्! "त्वं हि" त्वं खलु "महः" महतः "राधसः" धनस्य "क्षयस्य" गृहस्य च ‡

---

* ऋ० अ० ३, २, ४, २ (१मा० १६४ ४०) = ऋ० वे० ६, ४, ३७, २।

† ऋ० वे० ६, ४, ३७, ४।

‡ 'क्षयो निवासः, तस्य'—इति वि०।

"विधर्त्ता असि हि" अस्मभ्यं दातुं धारको भवसि खलु। हे "गिर्वणः" गोभिर्वननीय! "मघवन्" धनवन्निन्द्र! "तं" तादृशं "त्वा" त्वाम् "वयं" "सुतावन्तः" अभिषुत-सोमाः "हवामहे" आह्वयामः।

"राधसस्पते"-"राधस्पते"—इति पाठो, "विधर्त्ता"-"विधर्त्ते"—इति च॥ २॥ १५

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य दशमस्याध्यायस्य दशमः खण्डः ॥ १० ॥

धा२। हा२ऊऊवायि। नङ्कारिणेनप्रोवाइओ२३४वा।

४ ५ ३४ ३र४५ ३ २ १
याप्र्ष्ण्सोई६हायि॥(२) सवर्द्धितावर्द्ध। नःपू३। या२३

र५ र र र ४ ५ १र र र र
४। मानःसोमोमी। ढ्वाण्आ। भिनोज्योतिषावीद्य

र र र १ १
चनःपूर्वेपितरःपदज्ञाःह्व२र्वा२यि। हा२ऊऊवायि।

र र २ १ ५ ४ ५
दोअभिगाअद्रोवाइओ२३४वा। आ५यिष्णोई६हा

यि(३)॥१०*॥[४]४

अथ माचिदन्यदिति प्रगाथात्मके द्वितीयसूते—

प्रथमा।

१ २ ३ १ २र ३ १ २ ३ १ ६
माचिदन्यद्विशंसतसखायोमारिषण्यत।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
इन्द्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसत॥१†॥

---

* ऋ० मा० २६प्र० २अ० १०सा०।

† ह० सं० ३, १, ५, १० (१भा० ५०० ४०) = ह० वं० ५, ७, १०, १।

हे "सखायः" समान-ख्यानाः स्तोतारः! इन्द्र-स्तोत्रात् "अन्यत्" स्तोत्रं "मा चित् विशंसत" मैवोच्चारयत, "मा रिषण्यत" मा हिंसिता भवत अन्यदीय-स्तोत्रोच्चारणेन व्यर्थोपत्तीगा मा भवत, "सुते" अभिषुते सोमे "वृषणं" कामानां वर्षितारम् "इन्द्रम् इत्" इन्द्रमेव हे प्रस्तोतादयः! "सचा" सह "स्तोत" स्तुत। हे प्रगास्तादयः! "उक्था च" उक्थानि शस्त्राणि च इन्द्रविषयाणि यूयं "मुहुः" पुनः पुनः "शंसत" ॥१॥

अथ द्वितीया।

३ १२ ३१२ १२ १ २र ३ १२
अवक्रक्षिणं वृषभं यथाजुवं गां न चर्षणीसहम्।

३१२ ३१२ ३१ २र ३१२
विद्वेषणं संवननमुभयङ्करं मंहिष्ठमुभयाविनम् ॥२*॥५

"वृषभं यथा" वृषभमिव "अवक्रक्षिणम्" अवचर्षणशीलं शत्रूणां हिंसितारं "जुवं" शीघ्रकारिणं "गां न" गामिव वृषभमिव† "चर्षणीसहम्" मनुष्याणां शत्रुसेनानामभिभवितारं, "विद्वेषणं" विद्वेष्टारं शत्रूणां, "संवननं" सम्यक् सम्भजनीयं स्तोतृभिः "उभयङ्करं" निग्रहानुग्रहयोरुभयोः कर्त्तारं "मंहिष्ठं" दातृतमम् "उभयाविनं" दिव्य-पार्थिव-लक्षणेन उभय-विधानेनोपेतम् [यद्वा, स्थावर-जङ्गम-रूपेण द्विप्रकारेण रक्षितव्येनोपेतम्। अथवा उभयविधै स्तोतृभिर्ईष्टृभिर्योपेतम्]—एवं विध मिन्द्रमित्स्तोतेति पूर्वेणान्वयः ॥

---

* ऋ० वे० ५, ७, १०, २।

† 'गां न—न-शब्द उपमार्थीयः। गामिव वृषभमिव'—इति वि०।

"शुवं"-"शुर"—इति पाठो, "संवननं"-"संवनना"—इति च॥ २॥ ५

॥ मैधातिथम्॥ माचिदन्यद्दोहायि। विश्राऽइसा ता। सखायाऽइहोऽयि। माऽओऽइहो। रायिषाउवा। एतांताउवा। इन्द्रमिन्मोतावृषणाऽओऽइहो। साचाउवा। स्तताउवा। मुञ्जरुक्थाऽओऽइहो। चश्रा। ओहो। वाहोऽइ४वा। साऽ५तोऽ६हायि॥(१) मुञ्जरुक्थोहायि। चश्राऽएसाता। मुञ्जरुऽइहो१। क्थाऽओऽइहो। चाश्रा उवा। साताउवा। अवक्रक्षिणंवृषभाऽओऽइहो। याथा उवा। जूवाउवा। गान्नचाऽओऽइहो। षणा। ओहो। वाहोऽइ४वा। साऽ५होऽ६हायि॥(२) गान्नचोहायि। षणाऽयिसाहाम्। गान्नाऽइहो१यि। चाऽओऽइहो। षा णाउवा। साहाउवा। विहेषणऽसंवननमाऽओऽइहो।

१ १ १ १ १ १ १ २
भायाउवा। कारोउवा। कारोउवा। मण्हिष्ठमाभी

२ १ २र १ ३र ५ ४
ष्टुवो। भया। औहो। वाहो२३४वा। वा५यिनो

५
६हायि(३) ॥ १५* ॥ [१] ५

अथ उदुत्यइति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१२ १र २र ३ १ १ १ १
उदुत्येमधुमत्तमागिरःस्तोमासईरते।

१ १ १ १र १र ३ १ १
सत्राजितोधनसाअक्षितोतयोवाजयन्तोरथाइव ॥ १† ॥

"त्ये" ते प्रसिद्धाः "मधुमत्तमाः" अतिशयेन मधुराः "गिरः" स्तुति-रूपया वाचा "स्तोमासः" त्रिवृदादि-स्तोमाश्च "उदीरते" हे इन्द्र! त्वामुद्दिश्य उद्गच्छन्ति ऊर्ध्वं प्रसरन्ति [ईर गतौ आदादिकः (आ०)]। तत्र दृष्टान्तः—"सत्राजितः" सहैव सर्वान् जयन्तः "धनसा" धनानि सम्भजन्तः [वन षण सम्भक्तौ (भ्वा० प०), "जन-सन-खन-क्रम-गमो विट्" (३, २, ६७), "विड्वनोरनुनासिकस्यात्" (६, ४, ४१)"—इत्यात्वम्, "अक्षितोतयः" अक्षिताः क्षय-रहिताः जतयो रक्षा येषां ते तथोक्ताः [क्षियो भावे निष्ठा, "निष्ठायामण्यदर्थे (६, ४, ६०)"—इति

* ऋ० मा० ६म० १ख० १५सा०।

† ऋ० सा० १, १, १, ८ (१मा० ५१८ ऋ०) = ऋ० वे० ५, ७, १७, ५।

पर्युदासाद्दीर्घाभावः अतएव "त्रियो दीर्घात् (८, २, ४६)" —इति निष्ठा-नत्वाभावश्च "वाजयन्तः" वाजमन्नमिच्छन्तः, वाचि "न छन्दस्यपुत्रस्य (७, ४, ३५)"—इतीत्व-दीर्घयोः प्रतिषेधः], एवङ्गुणविशिष्टाः "रथाइव" ते यथा विविधमितस्तत उत्तिष्ठन्ति तद्वदुदीरतइत्यर्थः ॥ १ ॥

अथ द्वितीया।

१ २ ३१२३ १२ ३ २३२ ३ १२
कण्वाइवभृगवःसूर्य्याइवविश्वमिद्धीतमाशत।
२३ १ २ ३२ ३ १२ ३१२
इन्द्रꣳस्तोमेभिर्मह्ययन्तआयवःप्रियमेधासोअस्वरन्॥२*॥६

"कण्वाः" कण्व-गोत्रोत्पन्ना ऋषयः "इव" स्तुवन्तः "भृगवः" भृगु-गोत्रोत्पन्ना ऋषयः† "धीतम्" आध्यात्मम् "विश्वमित्"‡ व्याप्तं तमेव "इन्द्रम्" "आशत" आनशिरे "सूर्य्याइव" यथा सूर्य्य-रश्मयः सर्वं जगद् व्याप्नुवन्ति, तद्वत्। अपिच "प्रियमेधासः" प्रियमेधाः एतत्सञ्ज्ञका वा¶ "आयवः" मनुष्याः तमेवेन्द्रं "मह्ययन्तः" पूजयन्तः "स्तोमेभिः" स्तोत्रैः "अस्वरन्" अस्तुवन् [स्वृ शब्दोपतापयोः भ्वादिकः (प०)॥

"आशत"-"आनशुः"—इति पाठौ ॥ २ ॥ ६

---

* ऋ० वे० ५, ७, २८, १।

† अत्राह यास्कः—"अर्चिषि भृगुः मन्त्रभूव भृगुर्भृज्यमानो न देहे"—इति निरु० दै० ३, १७। 'भृगवः—भर्जनकराः सूर्य्याइव यथा आदित्य-रश्मयः'—इति वि०।

‡ 'इत्—इति पादपूरणः'—इति वि०।

¶ अत्राह यास्कः—"प्रियमेधः प्रिया अस्य मेधाः"—इति निरु० दै० ३, १७।

॥ अभीवर्त्तम् ॥ उदू३त्ये३माधुमत्तमोवा। गायिर
स्तोमा। सआधिरा१ता२यि। साजाजितो३१२३४।
धनमाअ। क्षितोता१या२ः। वाजाया१न्ता२ः। रथा३ः।
आ२३४५यि। वा२३४५॥(१) वाजा३रा३न्तोरथाइवो
वा। वाजयन्तः। रथाआ१यिवा२। काण्वाइवा३१२३
४। भृगवःह। रियाआ१यिवा२। विश्वामा१यिड्वी२।
तमाअ। शा२३४५। ता२३४५॥(२) विश्वाअमाअयिड्वी
तमाशतोवा। वायिश्वमिड्वी। तमाशाता२। आयिन्द्रꣳ
स्तोमा३१२३४यि। भिर्मह्य। तआया१वा२ः। प्रिया
मा१यिधा२। सोआ३। स्वा२३४५। रा२३
४५न्(३)॥ १६*॥ [१] ६

---

* ऊ० मा० ६प्र० १अ० १६मा०।

अथ पर्यूषिति ऋचात्मकं चतुर्थं सूक्तम्—

तत्र प्रथमा।

१२१ २२१ १ ११२३१ २ ११ १
पर्यूषुप्रधन्वाजसातयेपरिवृत्राणिसक्षणिः।

२२३ ११ २१ २
द्विषस्तरध्याऋणयानईरसे ॥ १* ॥

हे सोम! "सु" सुष्ठु "वाजसातये" अस्मभ्यमन्नदानायैव "परि प्रधन्व" परितः प्रगच्छ [यद्वा, "वाजसातये" अन्नस्य लाभाय सङ्ग्रामं प्रगच्छ]। किञ्च "सक्षणिः" सहनशीलत्वं "वृत्राणि" शत्रून् परिगच्छ। तदेवोच्यते—"नः" अस्माकम् "ऋणया" ऋणानां यापयिता विनाशयिता त्वं "द्विषः" शत्रून् "तरध्यै" तरीतुं हन्तुम् "ईरसे" परिगच्छसि।

"ईरसे"-"ईयसे"—इति पाठो ॥ १ ॥

अथ द्वितीया।

१ १ ३ ११ ३११३ २३१२ ३ ११
अजीजनोहिपवमानसूर्यंविधारेशक्मनापयः।

१ १ ३ १ १ ३ १२
गोजीरयारुहमाणःपुरन्ध्या ॥ २† ॥

हे "पवमान" सोम! त्वं "पयः" पयस उदकस्य "विधारे" विधारके अन्तरिक्षे "शक्मना" सामर्थ्येन बलेन "सूर्यम्"

---

* ऋ० मा० ५, १, ५, २ (१ भा० ८७१ मं०)=ऋ० वे० ७, ५, २२, १।
† ऋ० वे० ७, ५, २२, २।

"अजीजनः हि"* उत्पादितवान् भवसि खलु। कीदृशः? "गोजीरया" स्तोत्रभ्यो गवां प्रेरकेण स्तोतृणां प्रेरित-पशुकेनेत्यर्थः, तादृशेन†; "पुरन्ध्या" बहुविध-प्रज्ञानेन युक्तः‡ "रंहमाणः" वेगं कुर्वाणस्त्वं सूर्यमजीजनः॥ २॥

अथ तृतीया।

११ १ २ २१ २ २१२
अनुहित्वासुतꣳसोममदामसि॥ २॥ ७

—इति तृतीयायाः ऋचः प्रतीकमिदम्। मा चात्यच (५,१, ५, ६=१भा० ८७७पृ०) व्याख्याता॥ ३॥ ७

३ २ २ ४ ५ १
॥ श्यावाश्वम्॥ परा३?यि। ऊ३षू। प्रध। न्वा
४१ ५ १ १ २ १ १२
इषा। णहियाजा। सातयेपा। रि। वृचा२। णहि
१ २ ४ ५ २१
या२। णिसत्तणायिर्दा३यिषाइः। ता२३४रा। ऐन्द्रा
१२ १ २ ४ १
२यि। णहियाइ२। धियाकृणवानाइई३। रा३४५सो
५ ३ २ २ ४ ५ १ ४१
६न्द्रायि॥१॥ अजा३?यि। जाइनो। क्षिप। वाइमा।

* 'हि-इति पद-पूरणः'—इति वि०।

† गोजीरया रंहमाण —गोजीरेण संयुक्तया दध्ना वा मिश्रया, रंहमाणः वेगेन गच्छन्'—इति वि०।

‡ 'पुरन्ध्या —उदकेन —इति वि०।

§ ऋ० भा० ५, १, ५, ६ (१ भा० ८७७पृ०=सा० वे० ७, ५, २२, २।

५ १ २ २र १र १र
एह्यिया। ना। ह्वरियंवायि। धा। रेमा२। एह्यिया
२। क्मनापृषोगोइजीइजीइ। रा२३४या। ऐहा२यि।
१र १र २ ४
एह्यिया२। र०ह्हमाणाःप्र३रा३म्। धा३४५यो६
४ ३२ २ ४ ५ २ ४
ह्वायि॥(२) अनु३१। हाइयित्वा। सुतम। सोइम।
५ १ २ २र १ १र
एह्यिया। पा। दामंमिमा। ह्वे। समा२। एह्यिया
२। र्यराजियेवाइजा०३। आर२३४भो। ऐहा२यि।
१र १र ५
एह्यिया२। पवमानाप्रा३गा३। हा३४५सो६ह्वा
यि(३)॥१८*॥[१]

॥आन्धीगवम्॥ पर्य्युषुप्रधा१न्वावा। जसात।
२ २ १ १र २ १ २१ २ ३११
येपा२३री। ऊम्मा२१३। वृचाणिमत्तणिर्द्विषस्तरा२३
११ १ ० २ १ २ १ २
४५। धारयाइउवार्णा२या। नार२३ई। रसा। औ
४ ५ २ २ २ २
३होवा॥(१) अजीजनोच्चिपा१वामानह्वरि। घंवा२३

* क० गा० ६प्र० १अ० १८सा०

र १ २र१ २र१र र २ ३ १ १ १ १
यिधाऊम्मा२१ऽ२। रेशक्मनापयोगोजीरया२ ३ ४ ५।
१ २ २ २ १ १
राऽहा३उवा। मा२पगम्। पू२३राम्। धिया। औ
४ ५ २ र १ १ र
३ह्वोवा॥(२) अनुहित्वासुता१ऽसोमा। मदाम। रु
२ १ १र २र११ र २ ३ ११
मा२३ह्वे। ऊम्मा२१ऽ३। समर्यराज्येवाजाऽअभी२३
११ २ २ १ १ २
४५। पावा३उवा। मा२ना। प्रा२३गा। ह्वसा। औ
४ ४
३ह्वोवा। ह्वोऽई। डा(३)॥ १८*॥ [२]

॥ विराट्सुवामदेव्यम्॥ ३ र४ २ ४ पाऽऽरि। ऊषू ३ प्रा३ध
र ५ १ र २र१ २१र २१ २ १ न्वावा। जा। सातयेपरिवृत्राणिसक्षणिर्दिषस्त। रा।
२ र २ १ र र र ५ १ औ३ह्वोहायि। जा। सातयेपरिवृत्राणिसक्षणिर्दिषस्त।
२ र २ १ २ ३ र २ रा। औ३होहायि। धिया२३कृणवाः। नऔहो३।
१ १ २ ३ र ४ ऊम्मा२। राऽ२सो३ऽह्वायि॥(१) आऽऽजी। जनो३
४ ५ १ र २ १र२र१ २र १२र१र २र१ यिपवमा। ना। हरियंविधारेशक्मनापयोगोजीर।

---

* ऊ० मा० ६प्र० १अ० १८सा०।

या । औ३ह्वोहायि । ना । ह्वरियंविधारेशक्मनापयोगो
जीर । या । औ३ह्वोहायि । रण्ह्वा२३माणः । पुरी
ह्वा३ । ऊम्मा२ । धाऽ२योऽ३५ह्वायि ॥(२) आऽ५नु ।
ह्वित्वा३ह्व३तण्सोमा । मा । दाममिमह्वेसमर्य्यराज्ये
वाजाण्अ । भा । औ३ह्वोहायि । मा । दामसिमह्वेसम
र्य्यराज्येवाजाण्अ । भा । औ३ह्वोहायि । पवा२३मा
माना । प्रगोचो३ । ऊम्मा२ । धाऽ२सो३५ह्वा
यि(३) ॥ ८* ॥[३]

॥ गौरीवितम् ॥ परि । ऊषू३ । प्रधन्वाषा । जसा
तयेपरिवृचा२३ । णायिसक्षणा३१२३यिः । द्विषा५स्तरा ।
ध्याक्षणया३१२३ः । नओवा । रा५सोऽह्वायि(१) ॥ ५† ॥[४]

---

* ऊ० मा० ८प्र० २ख० ८सा० ।

† ऊ० मा० १०प्र० १ख० ५सा० ।

॥ ओकोनिधनम् ॥ अजाइयिजनोद्दिपवमा। नसू।
रियंविधारेशक्मना २ पाया २:। गोजा२यिराया२।
र्ण्हमा२३४णाः। पुरम्। धा२या२३४ओहोवा। औ
होवा। ओ२३४काः(२) ॥ ६ * ॥ [५] ७

अथ परिप्रधन्वेति-त्रचात्मकं पञ्चमं सूक्तम्—

तत्र प्रथमायाऋचः

परिप्रधन्व ॥ १ † ॥

—इति प्रतीकमिदम्। सा चान्यत्र (५, १, ५, १ =२भा० ८६८पृ०) व्याख्याता ॥ १ ॥

अथ द्वितीया।

एवामृतायमद्देत्तयाय
सप्तक्रोअर्षदिव्यःपीयूषः ॥ २ ‡ ॥

---

* ऊ० गा० २०प्र० २ख० ६सा०।
† ऋ० सा० ५, १ ५, १ (२भा० ८६८पृ०)=ऋ० वे० ७, ५, २०, १।
‡ ऋ० वे० ७, ५, २०, २।

हे सोम! "शुक्रः" दीप्तः "दिव्यः" दिवि भवः "पीयूषः" देवैः पातव्यः "सः" त्वम् "अमृताय" अमरणाय "महे" महते "क्षयाय" निवासाय च "एव अर्ष" एवं पवस्व क्षर ॥ २ ॥

अथ तृतीया।

२ २ ३ १ २ ३
इन्द्रस्तेसोमसुतस्यपेयात्
२ ३ १ १ ३ १ २ ३ १ २
क्रत्वेदक्षायविश्वेचदेवाः ॥ ३ * ॥ ८

हे "सोम!" "सुतस्य" अभिषुतस्य "ते" तव स्वभूतं (रसमिति शेषः) "इन्द्रः" "पेयात्" पिबतु [पिबतेराशीर्लिङि रूपम्]। किमर्थम्? "क्रत्वे" क्रतवे प्रज्ञानाय "दक्षाय" बलाय "च" किञ्च, अमी "विश्वे" सर्वे "देवाः" च त्वदीयं रसं पिबन्तु॥

"पेयात्"-"पेयाः"—इति पाठो ॥ ३ ॥ ८

॥ वाड्विभ्नंसौदविषम् ॥ प। र्येपारी। प्रधन्वा।
२ १ ३ ३ २ १ २ १
दोवाऽहोयि। इन्द्रायसोमा। दोवाऽहोयि। स्वादु
३ २ १ ३ ३ ३ ५ ४
म्मित्राया। दोवाऽहोऽयि। पूष्णोवाओऽयवा। भ

* ऋ० वे० ७, ५, २०, २।

गायूयाउ ॥(१) एव। एआयिवा। एव। एआयिवा।
अम्हताया। होवा३होयि। मच्छेत्तयाया। होवा३
होयि। सगुक्रोअर्षा। होवा३हो२३यि। दिव्यौवा
ओ२३४वा। पीयूषाउ ॥(१) इन्द्रः। एआयिन्द्राः।
इन्द्रः। एआयिन्द्राः। तेसोमा। होवा३होयि। सु
तस्यपेयात। होवा३होयि। क्रत्वेदक्षाया। होवा३
हो२३यि। विश्वौवाओ२३४वा। वदायूयिवाउ।
वा(३) ॥ २०* ॥ [१]

॥ वारवन्तीयम् ॥ परिप्रधाऔहोहायि। न्वाई२३४
न्द्रा। यसोमा२३४हायि। स्वादुमिंत्वा३३। औहोवा।
दूहा२३४हायि। उक्षवा२३४या। पू। ष्णायिभगा३४।
औहोवा। दूहा२३४हायि। औहो३१२३४। या। ए

* ऋ० सा० ६प्र० १अ० २०मा०।

५ २ २ २ १ २ १ ५
ह्यियाई३ह्वा ॥(१) एवामृताऔहोहायि । यामा२३४ह्वे ।
२ २ १ ५ १ २ २ ३२ ४२ ५ १ ३
क्षयाया२३४ह्वायि । मघुक्रोआ३४ । औहोवा । इहा
५ २ ३ ५ २ १ २ ३२ ४२
२३४ह्वायि । उरुवा२३४र्या । दित्याःपीयू३४ । औहो
५ १ ३ ५ ३२ १ ५२
वा । इहा२३४ह्वायि । औहो३१२३४ । पाः । एहिया
५ २ २ २ १ २ १ ३ ५ २
ई३ह्वा ॥(२) इन्द्रस्तेनाऔहोहायि । मारु२३४ता । स्व
१ ५ १ २ २ ३२ ४२ ५ १ ३ ५
पेया२३४ह्वायि । क्रत्वेदक्षा३४ । औहोवा । इहा २ ३
५ २ ३ ५ २ १ २ ३२ ४२
ह्वायि । उरुवा२३४या । वि । ष्वायिचदा३४ । औहो
५ १ ३ ५ ३२ २ ५२
वा । इहा२३४ह्वायि । औहो३१२३४ । वा । एहियाई
५ ३
ह्वा । होपुई । डा ३) ॥ १०* ॥ [२]

२ १ २ ५ १ ३ ५ २ १
॥ सफम् ॥ परिप्राऽधान्वाई२३४न्द्रा । यसोमा२३ ।
२ ५ २ १ २ ४ २ ५
स्वा३२३४दूः । मित्रा । यपूष्ण३भा३ । गा३४५योई३ह्वा
यि(३)॥ ९ ॥ [३]

---

* ऋ० म० ८प० २अ० १०सा० ।

† ऋ० मा० १०प्र० १अ० ४सा० ।

॥ वाजदावर्यम् ॥ परिप्रधा। न्वा२ई२३४द्रा। या
२सो२३४मा। खा२दूः। मा२३यित्वा। या
२पू। ह्वोभो२३४वा। गाप्रयोऽहायि ॥(१) एवाम्हता।
या२मा२३४त्वे। त्वा२या२३४या। सा२मृढ्। क्रो२३
त्या। षा२दायि। व्यःपो२३४वा। यूप्रषोऽहायि ॥(२)
इन्द्रस्तोमा। मा२सू२३४ता। स्वा२पे२३४यात्। क्रा२
त्वे। दा२३त्ता। या२वायि। श्व चो२३४वा। दाप्र
यिवोऽहायि(३) ॥ ७* ॥ [४]

॥ स्वर्निधनम् ॥ परी३ह्वोयि। प्रधा२३४न्वा। इन्द्रा
३ह्वो। यसो२३४मा। खादू३ह्वोयि। मित्रा
२३४या। पूष्णे३ह्वोयि। भगा२३४या। पूष्णे
भगाय। पूष्णा३४३। ह्वो३४३यि। भा३गाप्रयाऽ

* ऊ० गा० १२म० १च० ७सा०।

३२ १ ३ ५ ३२ १
५६ ॥(१) एवाऽहोयि । अमृताऽ३४या । मऽहेऽहोयि ।
३ ५ ३२ १ २ ३ ५ ३२ १
त्तयाऽ३४या । सम्राऽजो । क्रीआऽ३र्षा । दिव्याऽहो
२ ३ ५ ४ ३ २५ ३२
यि । पीयू२३४षाः । दिव्यःपीयूषः । दिव्याऽ४३ः ।
२ २ ४ ३२ १ २ ३
होऽ४३यि । पीऽयूऽषा६५६ः ॥(२) इन्द्राऽहो । तेसो
५ ३२ १ ३ ५ ३२ १
२३४मा । सुताऽहो । स्यपे२३४यात् । क्रत्वेऽहोयि ।
३ ५ ३२ १ ३ ५ ४ ३२
दक्षा२३४या । विश्वेऽहोयि । चदा२३४यिवाः । विश्वे
४२५२ ३ २ २ २ ४
चदेवाः । विश्वेऽ४३ । होऽ४३यि । चाऽदा५यिवा६५
३ १ ३ १ १ १ १
६ः । एऽ । सुवर्वते२३४५(३) ॥ ४* ॥ [५]

१ १ १ २
॥ वाजजित् ॥ परिप्रधन्वा । होवाऽहोयि । इन्द्रा
२ २ १ २ २ २
यसोमा । होवाऽहोयि । स्वादुर्मिऽचाया । होवाऽ
१ २ २ २ १ १ ३ ५२
होयि । पूष्णेभगाया । होवाऽहोऽ । वा२३४औ
२ १२२ २ २ १ २ २
होवा ॥(१) एवामृताया । होवाऽहोयि । मऽहेत्तया

---

* ऋ० गा० १४प्र० १अ० ४सा० ।

या। होवा३होयि। सप्तक्रोअर्षा। होवा३होयि।
दिव्यःपीयूषाः। होवा३हो२। वा २ ३ ४ औहोवा ॥
इन्द्रस्तेसोमा। होवा३होयि। सुतस्यपेयात्। होवा
३होयि। क्रत्वेदक्षाया। होवा३होयि। विश्वेदेवाः।
होवा३हो२। वा२३४औहोवा। वाजोजिगीवाविश्वाध
ना२नो२३४५(२) ॥ ६* ॥ [६]

॥ पौष्कलम् ॥ परिप्रा३ध। न्गाई२३४न्द्रा। यसो।
मासा२३४दूः। मित्रा। या२३४५। पू६५६। ष्णा
गाया२३४५(१) ॥ १८† ॥ [७] ८

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य एकादशस्याध्यायस्य
द्वितीयः खण्डः ॥ २ ॥

---

* ऊ० गा० १७प्र० २अ० ६सा०।
† ऊ० गा० ११प्र० १अ० १८सा०।

अथ तृतीय-खण्डे—

सूर्य्यस्येवेति तृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१२ ३१२ ३१२
सूर्यस्येव रश्मयो द्रावयित्नवो
३१२ ३१२ ३१२
मत्सरासः*प्रसुतः साकमीरते।
१२३ २उ ३१२ ३१३
तन्तुन्ततम्परिसर्गासआशवो
१२३२२ ३१३ २३२
नेन्द्राद्ऋतेपवतेधामकिञ्चन॥ १†॥

"सूर्यस्य" सर्वस्य प्रेरकस्य सवीर्यस्यादित्यस्य "रश्मय इव" सर्वतो व्यापकाः किरणा इव "द्रावयित्नवः" सर्वत्र द्रवणशीलाः "मत्सरासः" मदकराः "प्रसुतः" प्रकर्षेण सुताः अभिषुताः [एकवचनं छान्दसम् (३, १, ८५)] "आशवः" ग्रहेषु चमसेषु च व्याप्ताः "सर्गासः" सृज्यमानाः सोमाः "ततं" विस्तृतं "तन्तुं" तन्तुभिः ऋतं यज्ञं दशापवित्रं "साकं" सह युगपत् "परि-षरते" परितो गच्छन्ति। ते सोमाः "इन्द्राद्ऋते" इन्द्रं वर्ज-यित्वा अन्यत् "किञ्चन धाम" कंदेव-शरीरं लक्ष्यीकृत्य "न पवते"

---

* "प्रसुवः"—इति ऋ०-पाठः।

† ऋ० वे० ७.२, २२, १।

‡ 'इन्द्रं मुक्त्वा नान्यत् सोमस्य स्थापनमस्ति'—इति वि०।

न गच्छन्ति ॥ [इन्द्रस्य धाम्नो यष्टव्यत्वञ्च "अयामीन्द्रस्य प्रिय-धामानि"—इति मन्त्रवर्णादवगम्यते ॥ १ ॥

अथ द्वितीया।

१ १ ३ २ ३ १ २ ३ २ १ १ २
उपोमतिःपृच्यतेसिच्यतेमधु

३ १ २ ३ २ १ १ २
मन्द्राजनीचोदतेअन्तरासनि।

१ २ ३ १ २ ३ १ २ २
पवमानःसन्तनिःसुन्वतामिव

१ २ ३ २ ३ ३ १ २
मधुमान्द्रप्सःपरिवारमर्षति ॥ २* ॥

अस्मिन् परिवाद-रूपे स्तोत्रे इन्द्रे "मतिः" स्तुतिरूपा "पृच्यते" स्तोतृभिः संयोज्यते [पृची सम्पर्के (दि० आ०)]। तथा "मधु" मदकरः सोमः इन्द्रार्थं "सिच्यते" अद्भिर्यव-सक्तु-भिश्च सिक्तो भवति, ततः "मन्द्राजनी" [अज गति-क्षेपणयोः (अदा० आ०)—इत्यस्य ल्युटि ङीपि रूपम्] मदकरस्य रसस्य प्रेरयित्री सोमधारा तस्येन्द्रस्य "आसनि" आस्ये "अन्तर्" मध्ये "चोदते" प्रेर्यते [आस्य-शब्दस्य "पद्दन्नोमास्नित्यादिना (६, १, ६३) आसन्नित्यादेशः]। किञ्च "सन्तनिः" यज्ञादिषु सम्यक् विस्तृतः "सुन्वताम्" अभिषुतवतां यजमानानां सम्बन्धिनी,

---

* ऋ० वे० ७, २, २१, २।

† 'सन्तनिः—सन्ततिः, सुन्वतामिव—यथा सुन्वतां सन्ततिः क्रमं-सन्ततिः एवं सोमस्य धारयेति'—इति वि०।

"पवमानः" पूयमानः सोमः "द्रप्सः" द्रुत-गमन-शीलः "वारम्" अवि-वालमयं पवित्रं "परि"परितः "अर्षति" गच्छति। "द्रव"—इति पाद-पूरणः॥

"सुन्वतामिव"—"प्रन्नतामिव"—इति पाठो॥ २॥

अथ तृतीया।

३ १ २ ३ १ २ ३ १ २
उच्चामिमेतिप्रतियन्तिधेनवो

३१ २ ३१र २र ३ २
देवस्यदेवीरुपयन्तिनिष्कृतम्।

१ २ ३ १ १ ३१ १३ २ ३
अत्यक्रमीदर्ज्जुनंवारमव्यय

३ १ १ ३ २उ ३ १ २
मत्क्रन्ननिक्रम्परिसोमोअव्यत॥ ३*॥ ९

"उच्चा" रेतसः सेक्ता वृषभः पुरतो "मिमेति" शब्दायते [माङ् माने शब्दे च (द्वा० आ०) तं वृषभं "धेनवः" गावः† "प्रति यन्ति" अनुगच्छन्ति। तथा "देवस्य" द्योतमानस्य संस्कृतं स्थानं "देवीः" देव्यः स्तुतयः "उप यन्ति" उपगच्छन्ति [अनेनाहित-सोमः स्तुतिभिरभिधीयते। सोमो हि द्रोणकलशाभिगमन-काले शब्दं करोति, तमनु धेनवः प्रीणयित्र्यः स्तुतयः परियन्ति देवस्य स्थानं स्तुतयोऽभि गच्छन्ति। तथा सोऽयं

* ऋ० वे० ७, २, २१, ४।

† 'धेनवः→धेट् पाने (भ्वा०प०), पिबन्त्युदकानि आदित्य-रश्मयः। अथवा '* * *'— इति वि०।

सोमः "अर्जुनं" श्वेतवर्णम् "अव्ययम्" अविमयम् अवेः स्वभूतं "वारं" वालं पवित्रम् "अत्यक्रमीत्" "अतिक्रामति [अतिक्रम्य पात्राणि गच्छतीत्यर्थः]। किञ्च सोमः "अर्कं न" आत्मीय-कवचमिव "नित्तम्" उज्वलं अयण-द्रव्यम् "परि अव्यत" परितः संवृणोति॥

"मिमेति"-"मिमाति"—इति पाठौ॥ ३॥ ९

॥ वाजजित्॥ सूर्यस्येवा। रश्मयोद्रा। वायिन्न वाः। हेवाऽहोयि। मत्सरासाः। प्रसुतःसा। का मीरतायि। हेवाऽहायि। तन्तुन्ततान्। परिसर्गा। साआग्रवाः। हेवाऽहोयि। नन्दोहतायि। परतेधा। माकिच्चना। होवाऽहोर। वा २ ३ ३ औहोवा॥(१) उरोमतायिः। पृच्यतेसायि। च्यातेमधू। होवाऽहो यि। मन्द्राजनायि। चोदतेआ। तारासन्नायि। हो वाहोयि। पवमानाः। सन्तनिःमू। न्चातामिवा। हो वाऽहोयि। मधुमान्द्रा। ष्ठःपरिवा। रामर्षतायि।

२ १ ३ ४र र २ र १
ह्वोवाऽह्वो२। वा२३४ओह्वोवा॥ २) उत्तामिमायि।
२१ २र१र २ १ २र १
तिप्रतिया। तीधेनवाः। ह्वोवाऽह्वोयि। देवस्यदायि।
२र१ २र १ २ १ १
वीरुपया। तीनिष्कृताम्। ह्वोवाऽह्वोयि। अत्यक्र
२ १ २र१ २ १
मायिन्। अर्ज्जुनम्वा। रामव्ययाम्। ह्वोवाऽह्वोयि।
२ १ १ २र१ २ १
अत्कन्ननायि। क्रम्परिसो। मोअव्यता। ह्वोवाऽह्वो
३ ४र र २र१र २र१र १र ३ १ १
२। वा२३४ओह्वोवा। वाजोजिगीवाविश्वाधनारनो२ ३
१ १
४५॥ २१*॥ [१]

२र १ र र २ १
॥ कावम्॥ ह्व्योवा। स्वेवरमयोद्रा। वयित्ना
१ र २र १
वा२रः। मत्सरासः। वसुतःसा। कमीराता२यि।
१ २र१ १ १ ४ ५
तन्तुन्ततम्परिसर्गा। सम्राशावा२३ः। नेन्द्राऽदार्त्ता
२ १ १ २ ४
यि। पवतायिधा२३। माकाऽयिच्चापूना ६ ५ ६॥(१)
२ १ र २र१ १र
उग्रोवा। मतिःपुच्यतेसायि। च्यतेमाधू२। मद्राज

---

* ऊ० गा० ६प्र० १अ० २१सा०।

र र र २ र १ १ र
नीचोदतेऽआ। तरामाना२यि। पवमानःसन्ननिःसू।
२र १ १ २ ४ ५ २ १
न्वतामायिवा२३। माधू३मान्द्रा। ष्ठःपरायिवा २ ३।
२ २ ४ १ १ र
रामाऽर्षापुताई५६यि ॥(२) उत्तोवा। मिमेतिप्रतिया।
२ र १ १ र र २ १
तिधेनवा२ः। देवस्यदेवीरुषया। तिनिष्क्रात्ता२म्।
१ र २ १ १ २ ४ ५
अत्यक्रमीदज्जनम्वा। रमव्यायाऽ३म्। आत्काऽन्नानी।
२ १ १ २ ४
क्षम्परायिसो२३। मोऽआऽव्यापुताई५६(३) ॥११*॥ [२] ९

अग्निन्नरइति ऽचात्मकं द्वितीयं सूक्तम्,†

तत्र प्रथमा।

२ २उ ३ १ २ ३ २ ३
अग्निन्नरोदीधितिभिररण्यो
१ २ ३ २
र्वस्तच्युतज्जनयतप्रशस्तम्।
३ १ २ ३ १ २ ३ २
दूरेदृशङ्गृहपतिमथव्युम् ॥ १‡ ॥

---

* ऋ० मा० ८प्र० २अ० ११सा०।

† 'अग्निन्नः—एतदग्निष्टोमसाम। वामदेव्यम्'—इति वि०।

‡ ऋ० मा०,१, २, २, १० (१मा० २१५ ब्र०) = ऋ० वे० ५, १, ३३, १।

हे "नरः" नेतार ऋत्विजः ! यूयं "प्रशस्तं" प्रकर्षेण स्तुतं "दूरेदृशं" दूरे दृश्यमानं दूरे पश्यन्तं वा "गृहपतिम्" गृहाणां पालकम् "अथर्युम्" अगम्यम् अतनवन्तं वा "अग्निम्" "अरण्याः" सकाशात् "हस्तच्युतं" हस्तगतं "दीधितिभिः" अङ्गुलिभिः "जनयन्त" उत्पादयन्त ॥

"हस्तच्युतञ्जनयन्त"-"हस्तच्युतीजनयन्त"—इति पाठौ, "अथर्युम्"-"अथर्य्युम्"—इति च ॥ १ ॥

अथ द्वितीया।

३ ३ २३ ३ १ १३३ २१
तमग्निमस्तेवसवोन्यृण्वन्

३ २ ३ १ ३ १ १ २
सुप्रतिचक्षमवसेकुतश्चित्।

३ २ ३ १३ ३ २ ३ १ २
दक्षायोयोदमआसनित्यः ॥ २* ॥

"यः" अग्निः "दमे" गृहे गृहे "दक्षाय्यः" पूजनीयो हविर्भिः समर्धनीयो वा "नित्यः" अजस्रः "आस" बभूव "तं" "सुप्रतिचक्षं" सुप्रतिदर्शनम् "अग्निं" "कुतश्चित्" सर्वस्मादपि भयहेतोः "अवसे" रक्षणाय "वसवः" वासकाः वसिष्ठाः स्तोतारः "अस्ते" गृहे "न्यृण्वन्" न्यदधुः ॥ २ ॥

---

* ऋ० वे० ५, १, २३, २।

† विवरण-नपे आसनित्य इत्येकं पदम्, तथाहि—'आसनित्यः—आसमासनं नित्यं यजमान-गृहे यस्य'—इति तदाख्यानम्। विपश्चित्तत् पदकारादीनाम् १ २ १ २ 'आस। नित्यः'—इति दर्शनात् बह्वृचादि-खण्डानुसेति विचार्यम्।

अथ तृतीया।

१ २ ३ १२ २र ३ १र
प्रद्यो अग्नेदीदिहिपुरोनोअजस्रयासूर्म्यायविष्ठ।

१र २र ३ १ २ ३ १ २
त्वाग्रश्वन्तउपयन्तिवाजाः॥ ३॥ १०

हे "यविष्ठ" युवतमाग्ने! "प्रेद्धः" प्रकर्षेण समिद्धः त्वम् "अजस्रया" असरणशीलया "सूर्म्या" ज्वालया "नः" अस्मदर्थं "पुरः" पुरस्तात् आहवनीयायने "दीदिहि" दीप्यस्व। "त्वां" "ग्रश्वन्तः" बहवः "वाजाः" अन्नानि हवींषि "उपयन्ति" उपगच्छन्ति॥ ३॥ १०

ऋ० वे० ५, १, २३, ३ = य० वे १७, ७६।

॥ अत्रेयं महीधर-व्याख्या—"हे 'यविष्ठ'! [अतिशयेन युवा यविष्ठः। अतिशायने तमबिष्ठनौ, स्थूलदूरयुवेत्यादिना व-लोपे पूर्वगुणः] हे युवतम! हे 'अग्ने'! त्वं 'नो' ऽस्माकं 'पुरो' अग्रे 'दीदिहि' दीप्यस्व [दीव्यतेर्विकरण-व्यत्ययेन जुहोत्यादित्वात् श्यः, स्नौ द्वित्वम्, तुजादीनामिति पूर्व-दीर्घः]। किम्भूतस्त्वम? 'अजस्रया' अनुपक्षीणया 'सूर्म्या' समित्काष्ठेन 'प्रेद्धः' प्रकर्षेण दीप्तः [सूर्मी शब्दः काष्ठ-वाचकः; यद्वा, लोहमयी ज्वलनी स्रुणा सूर्मी। अजस्रया सूर्म्या सूर्मी-समानया ज्वालया दीदिहि। सूर्मी-शब्दो ज्वालोपलक्षकः]। हे अग्ने! यतः ग्रश्वन्ती निरन्तर-भाविनो वाजाः अन्नानि हवींषि त्वामुपयन्ति प्राप्नुवन्ति अतो दीप्यस्वेत्यर्थः"—इति।

आयङ्गौरिति ऽचात्मकं तृतीयं सूक्तम्,*

तत्र प्रथमा।

१२ २२ ३ १ २ ३ १ २ ३ २
आयङ्गौःपृश्निरक्रमीदसदन्मातरम्पुरः।

३ १ २ ३ १ २
पितरञ्चप्रयन्त्स्वः॥ १॥

"गौः" गमनशीलः "पृश्निः" प्राप्तवर्णः व्याप्ततेजाः "अयं" सूर्यः "आक्रमीत्" आक्रान्तवान् उदयाचलं प्राप्तवानित्यर्थः। आक्रम्य च "पुरः" पुरस्तात् पूर्वस्यां दिशि "मातरं" सर्वस्य भूतजातस्य निर्मात्रीं भूमिम् "असदन्" आसीदति प्राप्नोति [सदेश्छान्दसो लुङ्, ल्दित्त्वात् च्लेरङादेशः। ततः "पितरं" पालकं द्युलोकं "च"-शब्दादन्तरिक्षञ्च "प्रयन्" प्रकर्षेण शीघ्रं गच्छन् "स्वः" सु अरणः शोभन-गमनो भवति [यद्वा, पितरं स्वर्द्युलोकं प्रयन् वर्त्तते]॥ १॥

---

* 'उल्लमग्निष्टोमसाम। इदानीं मानसं स्तोत्रं भवति। * * *। मनसाभिष्करोति। मनसोद्गायति। मनसा प्रतिहरति। मनसा निधनमुपयन्ति। एतन्मानसं येनाग्निष्टोमाधङ्गौः पृश्निरक्रमीदिति'—इति वि०।

+ ऋ० वा० पु० २, ५, ४ (१भा० ३४३ पृ०) = ऋ० वे० ८, ८, ४७, १ = य० वे० ३, १।

अथ द्वितीया।

३ १ २ ३ २३ ३ १ २ ३ २
अन्तश्चरतिरोचनास्यप्राणादपानती।

१ २ ३ ३ १ २ ३ २
व्यख्यन्महिषोदिवम् ॥ २* ॥

"अस्य" सूर्यस्य "रोचना" रोचमाना दीप्तिः "अन्तः" शरीर-मध्ये मुख्य प्राणात्मना "चरति" वर्त्तते। किङ्कुर्वती? "प्राणादपानती" मुख्य-प्राणस्य प्राणाद्या वृत्तयः, तत्र प्राणनं नाड़ीभिरुद्वं वायोर्निर्गमनम्, तथाविधात् प्राणात् प्राणनात् अनन्तरम् अपानती, अपानं तन्नाड़ीभिरवाङ्मुखं वायोर्नमनं तत् कुर्वती, [अप-पूर्वादनितेः लटः शतृ, अदादित्वाच्छपोलुक्, "उगितश्च (४, १, ६)"—इति ङीप्, "शतुरनुमः (६, १, १७३)"—इति नद्यनुदात्तत्वम्। यद्वा, 'अन्तर्' द्यावापृथिव्योर्मध्ये 'अस्य' सूर्यस्य 'रोचना' रोचमाना दीप्तिः 'चरति' गच्छति। रुच दीप्तौ (भ्वा० आ०), 'अनुदात्तेतश्च हलादेः (३, २, १४९)"—इति युच्। किङ्कुर्वती? 'प्राणात्' प्राणनात् उदयादनन्तरम् 'अपानती' सायं समये अस्तं गच्छतीति। ईदृश्या दीप्त्या युक्ता:] अतएव "महिषः" महान् सूर्यः "दिवम्" अन्तरिक्षम् उदयास्तमययोर्मध्ये "व्यख्यत्" विचष्टे प्रकाशयति॥ महिषः—महेः "अविमहीष्टिषज् (उ० १, ४५)"—इति

---

* ऋ० भा० प० १, १, ५ (२भा० ३, ४६) = ऋ० वे० ८, ८, ४७, २ = य० वे० ३, ७।

औणादिकः ष्टिषच् प्रत्ययः। व्यत्ययन्—"चक्षिङः ख्याञ् (२, ४, ५४)", छान्दसे लुङि "अस्यतिवक्ति (३, १, ५२)"—इत्यादिना च्लेरङादेशः॥ २॥

अथ तृतीया।

३ १४ ३ १ २ ३ १ २ ११ २
त्रिंशद्धामविराजतिवाक्पतङ्गायधीयते।

२ ३ २ ३ २ ३ १ २
प्रतिवस्तोरह्द्युभिः॥ ३*॥ ११

"त्रिंशत्" "धाम" धामानि स्थानानि [वचन-व्यत्ययः (३, १, ८५)]। "वस्तोः" वासरस्याहोरात्रस्यावयवभूतानि "अह" [अह्नोऽवधारणे] "द्युभिः" सूर्यस्य दीप्तिभिरेव "वि राजति" विशेषेण दीप्यन्ते [व्यत्ययेनैकवचनम् (३, १, ८५)। मुहूर्त्तान्यत्र धामान्युच्यन्ते; पञ्चदश रात्रेः, पञ्चदशाह्नः]। "पतङ्गाय" [पतन् गच्छतीति पतङ्गः सूर्य्यस्तस्मै] सूर्य्याय, स्तुतिरूपा "वाक्" "प्रति धीयते" प्रतिमुखं धीयते प्रतिमुखं स्तोतृभि विधीयते क्रियते [यद्वा, 'वस्तोः' अहनि 'त्रिंशद्धामानि' घटिकाभिप्रायमेतत्, त्रिंशत् घटिकाः; "अत्यन्त-संयोगे द्वितीया (२, ३, ५)"]। एतावन्तं कालं 'द्युभिः' दीप्तिभिः असौ सूर्य्यो 'वि राजति' विशेषेण दीप्यते, तस्मिंश्च समये 'वाक्' त्रयीरूपा 'पतङ्गाय' 'प्रतिधीयते' प्रतिमुखं धीयते तं सूर्यं सेवत

---

* ऋ० भा० प० ३, ५, १ (२मा० ३४९ पृ०) = ऋ० वे० ८, ८, ४७, ३ = य० वे० ३, ८।

इत्यर्थः । श्रूयते हि—"ऋग्भिः पूर्वाङ्गे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अङ्गः"—इत्यादि ॥ ३ ॥ ११

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य एकादशस्याध्यायस्य तृतीयः खण्डः* ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थाश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ११ ॥

॥ इति षष्ठस्य प्रथमोऽर्धप्रपाठकः ॥ ६ † ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थ-प्रकाशे उत्तरायन्ये एकादशोऽध्यायः ॥ ११ ॥

---

* 'समाप्तश्चायं द्वादशाद्यः सचात्मकोऽर्चीनात्मकश्च'—इति वि० ।

† 'षष्ठस्य प्रपाठकस्य प्रथमोऽध्यायः समाप्तः'—इति वि० ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १२ ॥

॥ अथ द्वादशोऽध्याय आरभ्यते* ॥

तत्र

प्रथमखण्डे उपप्रयन्तेत्युक्तं चतुर्ऋचं प्रथमं सूक्तमनूक्तम्—

तत्र प्रथमा ।

३ १२ ३१८ २८ ३ ११

उपप्रयन्तोऽध्वरम्मन्त्रंवोचेमाग्नये ।

३२ ११ १२ ३२

आरेअस्मेचशृण्वते ॥ १ ॥

---

* 'इदानीं गवामयनं संवत्सरं सत्रमुच्यते । तत्रादौ ज्योतिष्टोमेऽतिरात्रः पुनः प्रायणीयमहरं तदुक्थ्यम् । पुनश्चत्वारोऽभिप्लवाः । पृष्ठः षडहः समाप्तः । स द्वितीयः तृतीयः स चतुर्थः स पञ्चमः त्रयोऽभिप्लवाः षडहाः पृष्ठः षडहश्चेत्यहीनारम्भणश्चत्वारोऽभिप्लवाः समाप्ताः । स द्वितीयः स तृतीयः स चतुर्थः त्रयोऽभिप्लवाः षडहः आयुषो गौरयं द्वे अयने द्वादशाहानि सत्रायतनान्यतिरात्रश्च संवत्सरश्चैतद् ब्राह्मणम् । अचार्क्षां परिजग्मुः सप्तषष्ट्यानि त्रीणि शतानि । एकादशाहषडहाः पञ्चचत्वारिंशदभिप्लवाः अभिजित् तवाहं आयङ्गौ आयुषो द्वादशाहस्य दशाहानि अतिरात्रः । चतुर्विंशत्या सह षष्टो मासः पूर्वस्मिन् पक्षसि व्रतातिरात्राभ्यां प्रथम उत्तरस्मिन् गवामयने अतिरात्रमीदिसम् अध्याय-परिसमाप्तेः ब्राह्मणेनोक्तानि आर्षेयकल्पोदैवसानि । इदानीं तेषां साम्नां लौकीयाः ते यक्षत्य इत्येवमारभ्यते—इति वि० ।

† 'आग्नेयमाज्यम्'—इति वि० ।

‡ ऋ० वे० १, ५, ९, १ = य० वे० ३, ११ ।

"अध्वरं" हिंसा-प्रत्यवाय-रहितम् अग्निष्टोमादि-यज्ञम् "उप प्रयन्तः" उपेत्य प्रकर्षेण यन्तो गच्छन्तः प्राप्यविच्छेदेन सम्यगनुष्ठितवन्तइत्यर्थः। तादृशा वयम् "अग्नये" अङ्गनादि-गुण-युक्ताय देवाय "मन्म" मनन-साधनमेतत् सूक्तरूपं स्तोत्रं "वोचेम" वक्तारो भूयास्म इत्याशास्यते। कीदृशायाग्नये? "अस्य अस्मे च शृण्वते" च-शब्दोऽप्यर्थे आरे-शब्दात् परो द्रष्टव्यः आरे च दूरेऽपि स्थित्वास्माकं स्तुतीः शृण्वते अस्मासु प्रीत्यतिशयेन सर्वत्र विद्यमानोऽग्निः अस्मदीयमेव स्तोत्रं शृणोतीति भावः। [वोचेम—ब्रुवोवचिः (२, ४, ५३),लिङ्याशिष्यङ्, "वचउम् (७, ४, २०)"—इत्युमागमः। शृण्वते—"शतुरनुमः (६, १, १७१)"—इति विभक्तेरुदात्तत्वम् ॥ १ ॥

अथ द्वितीया।

१२ २२ ३१ १ २१ १३ ११
यःस्त्रीहितीषुपूर्व्यःसञ्जग्मानासुकृष्टिषु।
११ २ १ १११२
अरत्तदाप्रुषेगयम् ॥ २* ॥

"पूर्व्यः" चिरन्तनः "यः" अग्निः "स्त्रीहितीषु" बधकारिणीषु "कृष्टिषु" शत्रुरूपासु प्रजासु "जग्मानासु" समङ्गतासु सतीषु "दाशुषे" हवींषि दत्तवते यजमानाय "गयं" धनम् "अरत्त" रत्तवान्†। तस्मै मन्मं वोचेमेति पूर्वेण सम्बन्धः। [स्त्रीहितीषु—

* ऋ० वे० १, ५, २१, २।

† 'गयं प्राणम् यद्यपि सर्वासु मनुष्यजातिषु अन्नादुदयात्स्थितं ज्योतिः तथापि च यजमानाः तेषां गयान् प्राणान् रक्षति'—इति वि०।

ष्णिह स्नेहने चुरादिः ; "स्नेहयति"—इति वध-कर्मसु (निघ० २, १९, १३) पठितम् ; स्निह्यन्ते हिंस्यन्ते प्रजा आभिरिति स्नीहितवः करणे "तितुत्रेष्वग्रहादीनाम् (७, २, ९ वा०)"—इति वचनात् निष्टक्षीतिर्निपतितिवदिड़ागमः व्यत्ययेनैकारस्य ईकारः, क्लिनोर्दीर्घश्च ; नित्त्वादाद्युदात्तत्वम् । सञ्चमानासु—"समोगमि (१, ३, २९)"—इत्यात्मनेपदम्, लिटः कानच्, गमहनेत्यादिनोपधालोपः । अरक्षत्—"छन्दसि लङ्लुङ्लिटः (३, ४ ६)"—वर्त्तमाने लङ् ॥ २ ॥

अथ तृतीया ।

२ ३ १ २ ३ १ २ ३ १ १ २ १ १
सनोवेदोअमात्यमग्नीरक्षतुशन्तमः ।

३ १ ३ ३ १ १
उतास्मान्पात्वंहसः ॥ ३* ॥

"सः" अग्निः "नः" अस्माकं "वेदः" धनम् "अमात्यम्"† अन्तिके भवं सहभूतं वा "रक्षतु" शत्रोः सकाशात् पालयतु । कीदृशः ? "शन्तमः" सुखतमः "उत" अपिच "अस्मान्" वसिष्ठान् "अंहसः" पापात् "पातु" रक्षतु ॥

"शन्तमः"—"विश्वतः"—इति पाठो ॥ ३ ॥

---

* ऋ० वे० ५, २, १८, ३ ।

† 'अमत् प्राणः, प्राणवत् हृदयावस्थितं ज्योतिः'—इति वि० ।

अथ चतुर्थी।

१ १२ १ २ ३ २ २ १ १ ३ १ १
उतब्रुवन्तुजन्तवउदग्निर्वृत्रहाजनि।

३ १र २र
धनञ्जयोरणेरणे ॥ ४* ॥ १

"अग्निः" "उदजनि" अरण्योः सकाशात् उत्पन्नः "उत" अनन्तरं "जन्तवः" जाताः सर्वे ऋत्विजः ब्रुवन्तु तमग्निं स्तुवन्तु। कीदृशोऽग्निः?"वृत्रहा" वृत्राणामावरकाणां शत्रूणां हन्ता "रणे रणे" सर्वेषु सङ्ग्रामेषु "धनञ्जयः" शत्रु-धनानां जेता† ["सञ्-ज्ञायां (१, २, ४६)"—इति खच्, "अरुर्द्विषदजन्तस्य (६, ३, ६७)"—इति मुम्, चित्स्वरेणान्तोदात्तः। रणेरणे—रणणि दुन्दुभयोऽस्मिन्निति रणः सङ्ग्रामः ["वह्निरण्योरुपसङ्ख्या-नम् (३, ३, ५८ वा०)"—इत्यप्, "नित्यवीप्सयोः (८,१,४)"—इति द्विर्वचनम्, आम्रेडितानुदात्तत्वम् ॥ ४ ॥ १

अथाग्नेयुङ्क्ष्वाहीति ऋचात्मकं द्वितीयं सूक्तम्‡,

तत्र प्रथमा।

१ १ ३ १र २र ३ १ १
अग्नेयुङ्क्ष्वाहियेतवाश्वासोदेवसाधवः।

२ १ १ २ १ १
अरंवहन्त्याशवः ॥ १¶ ॥

---

* ऋ० वे० १, ४, ११, १।

† 'धनञ्जयः—अग्निधनानां जेता'—इति वि०।

‡ 'अग्निहोम याम'—इति वि०।

¶ ऋ० आ०१, १, ३, ४। (१ भा०१३३४०,=ऋ० वे० ४, ५, २९, १।

हे "देव" द्योतमानाग्ने ! तान् अश्वान् "युङ्क्ष्व" आत्मीये रथे योजय। "ये" "तव" त्वदीयाः "साधवः" साधकाः सुशीला वा "अश्वासः" अश्वाः "आशवः" शीघ्रगामिनः सन्तः "अरम्" अलम् पर्य्याप्तं त्वदीयं रथं वहन्ति "हि" खलु। तानश्वान् रथे युङ्क्ष्वेत्यर्थः ॥

"युङ्क्ष्व"-"युङ्क्ष्वा"—इति पाठौ, "आशवः"-"मन्यवः"—इति च ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ २ ३ १ २
अच्छानोयाह्यावहाभिप्रयाꣳसिवीतये।

३ १ २ ३ १ २
आदेवाꣳसोमपीतये ॥ २* ॥

हे अग्ने ! "नः" अस्मान् "अच्छ" आभिमुख्येन "याहि" आगच्छ, तथा "प्रयांसि" हविर्लक्षणान्यन्नानि "अभि" लक्ष्य "देवान्" "आवह"। किमर्थम् ? "वीतये" तेषां हविर्भक्षणार्थं, तथा "सोमपीतये" सोमपानार्थञ्च ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २ ३ १ २
उदग्नेभारतद्युमदजस्रेणदविद्युतत्।

२ ३ १ २
शोचाविभाह्यजर ॥ ३† ॥ २

---

* ऋ० वे० ८, ५, २२, ८।
† ऋ० वे० ८, ५, २२, ५।

हे "भारत" हविषां भर्त्तरग्ने ! * "उत् शोच" उद्ततरं दीप्यस्व। तदेव विवृणोति— हे "अजर" जरा-रहिताग्ने ! "द्रविणुतत्" भृशं द्योतमानस्त्वं "द्युमत्" द्युमता दीप्तिमता सुपांसुलुगिति (७, १, ३९) तृतीया-लुक् "अजस्रेण" अविच्छेदेन "तेजसा" "वि भाहि" विशेषेण प्रकाशयस्व [यद्वा, भाति रन्तर्णीत-ण्यर्थः। त्वं प्रथममुद्दीप्यस्व पश्चादात्मीयेन तेजसा सर्वं जगत् प्रकाशयेति योजनीयम्] ॥ ३ ॥ २

अथ प्रसुन्वानायेति तृचात्मकं तृतीयं सूक्तम्।

तत्र प्रथमा।

१ २ ३ १२ २२ ३ २ ३ १ २ ३ १२ २२
प्रसुन्वानायान्धसोमर्त्तानवष्टतद्वचः।

२ ३ १ २ ३ १ १ ३ २ ३ १२ २२
अपश्यानमराधसꣳहतामखन्नभृगवः॥ १॥

"सुन्वानाय" सुन्वानस्याभिषूयमाणस्य "अन्धसः" अदनीयस्य सोमस्य "तत्" प्रसिद्धं "वचः" वचनं घोषं "मर्त्तः" मारकः कर्म-विघ्नकारी सन् "न वष्ट" [वश कान्तौ (अदा० प०) —इति धातुः] न कामयतां न शृणोत्विति यावत्। तथा, हे स्तोतारः ! "राधसं" साधक-धर्म-रहितं "सन्तम्" "अपहत"।

---

* 'भारत—भरतामनुष्याञ्जैर्मथितामग्ने'—इति वि०।

† इत्यतोऽभिष्ठविकमुच्यते'—इति वि०।

‡ ऋ० सा० ६, २, १, ९ (२ भा० १९८ प०) = पुनरेव पुरस्तात् १, २, ११, २ (३ भा० २९० प०) = ऋ० वे० ७, ५, ३, ३।

तत्र दृष्टान्तः—"मखं न" यथा पुरा अपराद्धं मखं एतर्हामानं "भृगवः" अपहृतवन्तः तथा अपहृतेत्यर्थः ॥

"सुन्वानाय"-"सुन्वानस्य"—इति पाठौ, "वष्ट"-"वृत"—इति च ॥ १ ॥

अथ द्वितीया।

२ ३ १र २र ३२ड ३१ ३ १र
आजामिरत्केअव्यतभुजेनपुत्रओण्योः।

१२३ १र २र ३१र २र३११
सरज्जारोनयोषणांवरोनयोनिमासदम् ॥ २* ॥

"जामिः" बन्धुभूतो देवानां † सोमः "अत्के" आच्छादके पवित्रे "आ अव्यत" आवृणोति मध्यस्थो भवति। तत्र दृष्टान्तः—"भुजे न" यथा "ओण्योः" रक्षकयोः मातापित्रोः भुजे "पुत्रः" आवृणोति, तद्वत्। ततः सोऽयं सोमो "योनिं" स्व-स्थानभूतं कलशम् "आसद" आसत्तुं "सरत्" सरति। तत दृष्टान्तद्वयम्—"जारो न" यथा जारो "योषणां" असतीं स्त्रियं प्राप्तुं सरति, यथा वा "वरः" कन्यां प्राप्तुं गच्छति, तद्वत् ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ १ ३ २ड ३ १ ३ १ १
सवीरोदक्षसाधनोविय्यक्षस्तभ्नारोदसी।

१ १ ३ १ २ ३१र २र ३ १ १
हरिःपवित्रेअव्यतवेधानयोनिमासदम् ॥ ३‡ ॥ ३

---

* ऋ० वे० ७, ५, ३, ४।

† जामिः—सोमस्य भगिनी'—इति वि०।

‡ ऋ० वे० ७, ५, ३, ५।

"दक्षसाधनः" बल-साधनः "सः" सोमः* "वीरः" समर्थो भवति, "यः" सोमः "रोदसी" द्यावापृथिव्यौ "वि तस्तम्भ" स्व-तेजसा व्यस्तवात् आच्छादयदित्यर्थः। किञ्च "हरिः" हरित-वर्णः सोमः "वेधा न" यथा विधाता यजमानः स्व-गृहमासी-दति, तद्वत् "योनिं" स्व-स्थानं कलशम् "आसदम्" आसत्तुं पवित्रे "अक्षत" आहृणोत् सम्बद्धो भवति ॥ ३ ॥ ३

॥ मत्तागौरीवितम् ॥ प्रसु। न्वानाइ। यअन्धसाः। मर्त्तानवष्टतद्वचाइ३ः। आपस्वानाइ१२३म्। अराऽधसाम्। ह्वातामखाइ१२३म। नभोवा। गाऽवोऽ ह्वाइ(१)॥ १७† ॥ [१]

॥ गौतमम् ॥ प्रसुन्वानायअन्धसाः। मर्त्तानवो। ष्टतद्वचाइः। अपा। औहोइ२३४वा। श्वानमराधसा

* 'सः—सोमः प्रजापतिः नृपो वा'—इति वि०।

† क० गा० १प्र० २च० १७सा०।

१ १ १ १ ३ २ ३ २ ५ ७ २ ३ २
२३४५म्। ह्वना। औह्वो२३४वा। मखा। औह्वो२३
५ ४ ४
४वा। नभ्रूगवाः। ह्वोइ। डा(१)॥ १८* ॥ [२]

५ ३ २ २ ४ ५
॥ मह्वागौरीवितम्॥ प्रस्तु। ष्वानाउ। यअन्धसाः।
१ २ १ २ ४
मत्तीनिवष्टतद्वचा२३:। आपस्वानाउ१२३म्। अरा५ध
१ २ २ ४ ५ ४ ५
साम्। ह्वातामखाउ१२३म्। नभोवा। गा५वोइह्वा
५ ३ २ ३ २ ४ ५ १ २
यि॥(१) आजा। मिराउ। त्के अव्यता। भुजेनपुत्र
२ १ २ २ ४ १ २
ओणियो२३:। सारङ्गाराउ१२३:। नयो५षणाम्। वारो
२ ४ ५ ४ ५ २
नयोउ१२३। निमोवा। सा५दोइह्वायि॥(२) सबी।
३ २ ४ २ ५ १ २
राद्राउ। ह्वसाधनाः। वियस्तस्तभ्नरोदसा २ ३ यि।
१ २ ४ २ १ २ २
हारिःपवाउ१२३यि। त्वे आ५व्यता। वायिधानयोउ१२३।
४ ५ ४ ५
निमोवा। सा५दोइह्वायि(३)॥ १७*॥ [३]

---

* क० मा० १प्र० २अ० १८मा०।

† क० मा० ६प्र० २अ० १७मा०।

॥ ओकोनिधनम् ॥ आजाइमिरत्केअव्यता। भुजा
यि। नपुत्त्रओ२ऽणायो ३ः। मरज्झारोनयो२ऽषाणा२
म्। वरोना२३४यो। निमा। सा२दा२३४ओहोवा।
ओ२३४काः(२) ॥ १८* ॥ [४]

॥ औदलम् ॥ सवीरोदा। त्रासा२धनाः। वियस्त
स्ता३। भारोदा२३४साथि। हरिःपवाथि। त्रेचा२
व्यता। वेधाना२३योइ। ना२३यिमाइ। सा३४५दो
६ह्वायि३) ॥ १९* ॥ [५]

॥ साध्रम् ॥ प्रसुन्वाइनायअध्यसाः। मत्तीनवा२।
ष्टताइ४५त्। वा२३४चाः। अपश्चानमराधसा२३४५म्।
ह्वाताओ२३४वा। माखाओ२३४वा। नभ५गवाः ॥(१)
आजामाइयिरत्के अव्यता। मुजायिनपू२त्त। चओइ

* ऋ० मा० ६प्र० २च० १८सा०।
| ऋ० मा० ६प्र० २च० १९सा०।

४५। णी२३४योः। सरज्जारोनयोषणा२३४५म्। वा
राओ२३४वा। नायाओ२३४वा। निमा५सदाम्॥(२)
सवीरो३दत्तसाधनाः। वियास्तस्था२। भरो३४५। दा
२३४सी। हरिःपविवेअव्यता२३४५। वायिधाओ२३४
वा। नायाओ२३४वा। निमा५सदाम्। हो५ई।
डा(३)॥२०*॥[६]

॥गौतमम्॥ आजामिरत्केअव्यता। भजायिनपूत्।
चओणियोरः। मरा। औहो२३४वा। जारोनयोष
णा२३४५म्। वरा। औहो२३४वा। नाया। औहो
२३४वा। निमा५सदाम्। हो५ई। डा(२)॥२१*॥[७]

॥प्यावाश्वम्॥ प्रसू३१। न्वाइना। यज्ञ। धाइसः।
एहिया। मा। तोनवष्टा। तत्। वचा२ः। एहिया२।

---

* ऋ० मा० ६प्र० २ख० १०सा०।

† ऋ० मा० ६प्र० १ख० १सा०।

१२ २ ४ ५ २२ १२
अपश्वानामाऽराऽ। धा२३४साम्। ऐद्वा२यि। एद्वि
२१ २ ४ २४
या२। द्वतामखान्नाऽभृऽ। गा३५वोऽद्वायि ॥ २* ॥ [८]

१२ २ १ १ २१२
॥ औदलम् ॥ प्रसुन्वाना। याआ२न्धसाः। मत्तो
२ १२३ ५ १२ २१
नवाऽ। ष्टातदा२३४चाः। अपश्वानाम्। आरा२ध
१ २१२ २ १ ४ २
साम्। द्वतामा२३खाऽम्। नाऽ२३भृऽ। गा३४५वोऽ
५ १२२२ १ १ २१२ २
द्वायि ॥ १† आजामिरा। त्केआ२व्यता। भुजेचपू३
१ २, ३ ५ १२ २ १ १
त्। वाओणा२३४योः। सरज्जाराः। नायो२षणाम्।
२१२ २ १ ४ २ ५
वरोना२३योऽ। नाऽ२यिमाऽ। सा३४५दोऽद्वायि ॥(२)
१२२२ १ १ २१ २ १ २, ३
सवीरोदा। द्वासा२धनाः। वियस्तस्ताऽ। भारोदा
५ १२ १ १ २१२२
२३४साय। हरिःपवायि। क्षेत्रा२व्यता। वेधाना२३
२ १ ४ २ ५
योऽ। नाऽ२यिमाऽ। सा३४५दोऽद्वायि(३) ॥१०॥ [९]

---

* ऋ० मा० १।प्र० २ख० २मा०

† ऋ० मा० १।प्र० २ख० ३मा०।

५ ३र २र ३ ४ ५ २ १ २ १

॥ गौतमम् ॥ प्रसुन्वानायान्धसाः। मत्तीनवा।

२ १ ३ २ ३र ५ १र २ र १३

ष्टनद्वचाः। अपा। औहो२३४वा। स्वानमराधसा

१ १ १ १ ३ २ ३र ५ ३ २ ३र

२३४५म्। इता। औहो२३४वा। मखा। औहो२३

५ ४ ५र र ३ २ ३र ४ ५ २ १

४वा। नभूपगवाः ॥(१) आजामिरत्केअव्यता। भजा

२ १ २ र १ ३ २ ३र ५

यिनपूत्। चओणियोः। सरा। औहो २ ३ ४ वा।

१र १र र ३ १ १ १ ३ २ ३र ५ ३ २

जारोनयीषणा२३४५म्। वरा। औहो२३४वा। नया।

३र ५ ४ ५ र ३र २ ३ ४र ५

औहो२३४वा। निमापमदाम् ॥(२) मवीरोदक्षसाध

२ १ २ १ २ र १ ३ २ ३र

नाः। वियास्तस्ता। भरोदसारय। इरा। औहो

५ २ १ र २ ३ १ १ १ १ ३र २ १र ५

२३४वा। पविचेअव्यता२३४५। वधा। औहो२३४वा।

३ २ १र ५ ४ ४

नया। औहो २ ३ ४ वा। निमापमदाम्। होपई।

डा(३) ॥ १३* ॥ [१०]

२ १ ४र ५ २ ३ ५

॥ आकूपारम् ॥ प्रसुन्वा२३नाय। अन्धा२३४साः।

---

* ऊ० ग्रा० ११प्र० २अ० १२सा०।

१ १ २ १ २ १ २ १
मर्त्तीरनवा। ष्टतद्वचाः। अपघ्नानरम्। अराध-

२ २ १ १ ४ २ ४
साम्। हतामाखाऽरम्। नाऽरभूऽ। गाऽ४५वोऽहा

२र १र ४५र २ ३ ५ १
यि॥(१) आजामाऽरियरत्के। अत्याऽ३४ता। भुजा

१ २ र १ २ १ २ १ र १
रयिनपूत्। चओणियोः। मरज्जारोऽ। नयोपणाम्।

२ र १ १ ४ २ ५
वरोनायोऽरे। नाऽरयिमाऽ। साऽ४५दोऽहायि॥(२)

२ १र ४ ५ २र ३ ५ १ १ २ र
सवीरोऽरदत्त। माधाऽरे४नाः। वियाऽरस्तस्ता। भरो

१ २ १ र १ २ र र १
दसायि। हरिःपावाऽरयि। चेअत्यता। वेधानायो

१ ४ २ ५
ऽरे। नाऽरयिमाऽ। साऽ४५दोऽहायि(३)॥ १६*॥[११]

॥ दैवोदासोत्तरम्॥ ३ ५ र र २, ३ ४
प्राऽसुन्वाना। ह्वो। यअन्ध

५ ५ २ र र र १ २ ४ ५र
साऽए। मर्त्तानवष्टतद्वचोअपघ्नानमराधाऽसाम्। हता

३ २ ५र र २ ५ ३
मखाऽ४। औह्वोवा। नाऽ३४भूऽ। गवोऽरे४५ई।

डा(३)॥ १४†॥ [१२]

---

* ऋ० मा० १५प्र० १अ० १६सा०।

† ऋ० गे० १६प्र० २अ० २४सा०।

॥ शुद्धाशुद्धीयम् ॥ प्रसुन्वानायान्धसः। मर्त्ताँ
नवष्टतद्वा२३चाः। अपस्वानमराधा२३साम्। घृतामा
२३स्वा३म्। ना२। भृगा३४औहोवा। वा२३४५ः ॥(१)
आजामिरत्केअव्यता। भुजेनपुत्रओणा२३योः। सर
ज्जारोनयोषा२३णाम्। वरोना२३योइ। ना२३यो
३। ना२यिम्। आसा३४औहोवा। दा२३४५म् ॥(२)
सवीरोदत्तसाधनाः। वियस्तम्भरोदा२३सायि। हरिः
पवित्रेअव्या२३ता। वेधाना२३योइ। ना२यिम्। आ
सा३४औहोवा। दा२३४५म्३ ॥ १७* ॥ [१३]

॥ वैश्वामित्रम् ॥ प्रसुन्वानायान्धसः। मर्त्तोना२३४
वा। ष्टाइताद्वा३चाः। आपस्वाना२३ए्चा३यि। अरा
२धा२ ३ ४माम्। घृतामाखौवाओ२ ३ ४वा। नभूपुग

* ऋ० गा० १८प्र० १ऋ० १०षा०।

३२ ४२ ३२ ४ ५ २ ३ ५
वाः ॥(१) आजामिरत्केअव्यत । भुजायिना२ ३ ४पू ।
२ १ १ २ २२ २ १ २ १ ३
त्रा३ओणा३योः । सारङ्गारा२३त्रा३ । नयो२षा२ ३ ४
५ १ २२ ३ ५ ४
णाम् । वरो । नायोवाओ२३४वा । निमा५सदाम् ॥(२)
३४ २ ३२ ४ ५ २ ३ ५ २ १२ २
सवीरोदत्तसाधनः । वियास्ता२३४स्ता । भा३रोदा३सा
१ २ १ २ १ ३ ५
यि । त्रारि:पवा २ ३यित्रा ३ यि । त्रे आ२व्या२ ३ ४ता ।
१ २२ ३ ५ ४ ४
वेधाः । नायोवाओ२३४वा । निमा५सदाम् । त्रो५
ई । डा(३) ॥ १८* ॥ १४

॥ स्वारकौत्सम् ॥ प्रसुन्वानाया३अन्धसाः । मर्त्तान
२ २ २ २ १ २
वष्टना१द्वा३चाः । अपस्वाना३म् । आ३राधा३साम् ।
१ २ ३ ५ ३२ ४
आ३यि । त्रतामखो२३४त्रायि । नभू३गा५वा६५६ ॥(१)
२२ २ २ १२ २ २ २
आजामिरत्के३अव्यता । भुजेनपुत्र ओ१णा३योः । सर
२ २ १२ १ १ २ ३
ङ्गारो३ । नाऽयोषा३णाम् । आ३यि । वरो नयो२३

* क० मां० १८म० २ष० १८मा० ।

४ह्वायि। निमाऽसाप्रदाऽप्रई ॥(२) सवीरोदत्ताऽसाध
नाः। वियस्तस्तम्भरो१दाऽसायि। हरिः। पवाऽयि।
चेऽआव्याऽता। आऽयि। वेधानयो२ऽ४ह्वायि। नि
माऽसाप्रदाऽप्रईम्(३) ॥ २०* ॥ १५

॥ उरुत्तयम् ॥ प्रसुन्वानायान्धसाः। मर्त्तीनवष्ट
तद्वा२ऽचाः। अपश्वानमराधा२ऽसाम्। हतामखा२
म्। नाऽभूः। गा२। या२३४औह्वोवा। वा२३४औ
ह्वोवा। वा२३४पुः ॥(१) आजामिरत्केअव्यता। भुजे
नपुत्त्रओणा२ऽयोः। सरज्जारोनयोषा२ऽणाम्। वरोन
यो२। नाऽयमा। सा२। या२३४औह्वोवा। दा
२३४प्रम् ॥(२) सवीरोदत्तमाधनाः। वियस्तस्तम्भरो
दा२ऽसायि। हरिःपविचेअव्या२ऽता। वेधानयो२।

* ऋ० मा० १८प्र० १अ० २०मा०।

१ १ २ ५ ४ २ ३ १ १
नाऽ२ यिमा। साराया २ ३ ४ औचोवा। दा २ ३
१ १
४ ५म्(३) ॥ २१* ॥ [१६]

२ १ २ १ २ १ २ १ २ १
॥ क्षत्रवरथन्तरम्॥ प्रासुन्वानायन्धसः। मर्ज्जानवा।
२ १ २ २ २ २ ५ २ १ २
ष्टाऽतादाऽचाः। अपश्चानमराधसा२३४मैच्ची। चता
५ २ १ २ १ २ २
मा२३४खाम्। नभूऽआउवा२३। ए३। गवआ॥(१)
२ २ १ २ १ २ १ २ १ २ १
आजामिरत्केअव्यता। भुजेनपूत्। चाऽओणाऽयोः।
२ २ २ ३ ५२ २ १ २ ५ २
सरज्जारोनयोषणा२३३मैच्ची। वरोना२३४यो। निमाऽ
१उवा२३। ए३। सदमा ॥(२) सावीरोदत्तसाधनाः।
२ १ २ २ २ २ २ १ २ १ २ १ २ १
वियत्तस्ता। भाऽरोदाऽसायि। हरिःपविचेअव्यता
५ २ २ २ १ २ २ ३
२३४ऐच्ची। वेधाना२३४यो। निमाऽ१उवा२३। ए३।
२ ३ २
सदमा(३) ॥ ७† ॥ [१७] ३

इति सामवेदार्थप्रकाशे उत्तरार्चस्य द्वादशस्याध्यायस्य
प्रथमः खण्डः ॥ १ ॥

---

* क० मा० १९प्र० २अ० २१सा०।
† क० मा० २२प्र० २अ० ७सा०।

अथ द्वितीय-खण्डे—

अभ्रातव्यइति प्रगाथात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

३ २ ३ १ २१ ३ २ २ ३ १ २
अभ्रातव्योअनात्मनापिरिन्द्रजनुषासनादसि।
१ २ २ ३ १ २
युधेदापित्वमिच्छसे॥ १*॥

हे "इन्द्र!" त्वं "जनुषा" जन्मनैव "अभ्रातव्यः" ["व्यन् सपत्ने (४, १, ४५)"—इति व्यन् प्रत्ययः] सपत्न-रहित इत्यर्थः, "अना" अनेतकः ["ऋतश्छन्दसि (५, ४, १५८)"-इति कपः प्रतिषेधः] अनियन्तृक इत्यर्थः, "अनापिः" बन्धु-वर्जितश्च, "सनादसि" चिरादेव भ्रातृव्यादि-वर्जितोऽसि, यत्र त्वया "आपित्वं" बान्धवम् "इच्छसे" इच्छसि, तत्र "युधेत्" युद्धेनैव युद्धं कुर्वन्नेव स्तोतृणां सखा भवसि॥ १॥

अथ द्वितीया।

१ १ ३ १ २ ३ १ २ ३ १ २ १ २ ३
नकीरवतएसख्यायविन्दसेपीयन्तितेसुराश्वः।
३ २ ३ १ २ ३ १ २१ ३ २ ३ १ २
यदाकृणोषिनदनुएसमूहस्यादीत्पितेवश्रयसे॥ २†॥ ४

---

*ऋ० ऋ०५, १, २, १ (१भा० ८१४०)=ऋ० वे० ६, २, ३, ४।
†ऋ० वे० ६, २, ३, ५।

हे इन्द्र! "रेवतं" केवल-धनवन्तं यागादि-रहित मयष्टारं माढा मन्यं मानवं "सख्याय" सखिभावाय "न किः विन्दसे" न लभसे नाश्नयसीत्यर्थः। अयष्टारो जनाः किं सन्तीत्यतआह—"सुराध्वः" [टु ओ ष्वि गति-वृद्धयोः; सुरया वृद्धाः तद्वत्] प्रमत्त-नास्तिकाः। "ते" त्वां "पीयन्ति" [पीयति हिंसा-कर्मा] हिंसन्ति तन्नाश्नयतीत्यर्थः। "यदा" त्वं "नदतुं" [नद अव्यक्ते शब्दे (भ्वा० प०)] यं स्तोतारं "क्रणोषि" मदीयोऽयमिति यदा भावयसि, तदानीं संवहसि धनादिकं तस्मै वहसि। "आदित्" अनन्तरमेव तेन लब्धधनेन स्तोत्रा "पिता इव" पालयिता जनक इव "हूयसे" स्तुतिभिराह्वयसे स्तूयस इत्यर्थः॥ २॥ ४

॥ उक्थामदीयवम्॥ अभ्रातृव्योअनातुरम्। अ
१ २ १ २ १ २ १ २
नापाइयिरा२यि। द्रजनुषासना२३दसायि। यूधेदापा
१ २ ५ २ ५ ५
यि। त्वमा२३यिच्छसाउ। वा३॥(१) युधेदाइपित्वमि
१ २ १ २ १ २
च्छसायि। नकायिरा१यिवा२। तएसखियायवा२३यि
१ २ १ २ १
न्दसायि। पायियन्तितायि। सुरा२३श्रुवाउ। वा
५ २ ५ ५ २ १ २ १
३॥(२) पीयन्ताइयितेसुराश्रुवाः। यदाकाइर्णो२। षि

तदनु॒ष्मम्॒२३हसायि। आदित्यितायि। वह्नि॒२३यमा
उ। वा३। स्तोषे३४५(३)॥ १०*॥ ४

आत्वासहस्रमिति त्रृचात्मकं द्वितीयं सूक्तम्,†

तत्र प्रथमा।

आत्वासहस्रमाशतंयुक्ताःरथेहिरण्यये।
ब्रह्मयुजोहरयइन्द्रकेशिनोवहन्तुसोमपीतये॥ १‡॥

हे "इन्द्र!" "त्वा" त्वां "सहस्रं" सहस्र-सङ्ख्याका "हरयः" त्वदीया अश्वाः "आ वहन्तु" आनयन्त्वस्मद्यज्ञं, तथा "शतं" शत-सङ्ख्याकाश्च भवदीयाश्वाः त्वामावहन्तु [यद्यपि द्वावेवास्य हरी तथापि तद्विभूतयोऽन्येऽपि बहवोऽश्वाः सन्ति। ननु युगपदेनैरश्वैः कथं वाहयितुं शक्यत इत्यत आह— युक्ता इति] "हिरण्यये" स्वर्ण-विकारे [हिरण्य-शब्दाद् विकारार्थे विहितस्य मयटः "ऋत्व्यवास्त्वा (६, ४, १७५)"— इत्यादौ म-लोपो निपात्यते] तादृशे "रथे" "युक्ताः" सम्बद्धाः [बलिना अश्वाना शीघ्र-गमनाय रथे नियुक्तत्वाद् युगपदेव सर्वैरश्वैर्गन्तुं शक्यत इति भावः]। कीदृशा हरयः? "ब्रह्मं-

---

* ऋ० गा० ७प्र० १अ० १०सा०

† "अभीवर्त्त" स्तोत्रीयम्'—इति वि०।

‡ ऋ० आ० २, ४, १, २ (१सा० ५०५ऋ०) = ऋ० वे० ५, ७, १४, ४।

युजः" ब्रह्मणा परिवृढेनेन्द्रेण युक्ताः [यद्वा, ब्रह्मणास्मदीयेन स्तोत्रेण अस्माभिर्दत्तेन हविषा वा युक्ताः] "केशिनः" केशाः सटाः तैर्युक्ताः। किमर्थम् इन्द्रस्य वहनम्? तत्राह—"सोमपीतये" सोमस्य पानाय यथास्मदीयं सोमं पिबेत्, तथा वहन्वित्यर्थः ॥ १ ॥

अथ द्वितीया।

२ ३ १ १ २ २ १ १ २ १ १
आत्वारथे हिरण्यये हरी मयूरशेप्या।

३ १ १ २ २ १ १ ३ १ १ ३ १ १
शितिपृष्ठा वहतामध्वो अन्धसो विवक्षणस्य पीतये ॥ २* ॥

[पूर्वं हर्यो विभूतिरूपा अश्वाः इन्द्र मा वहन्विति प्रार्थितम्, अधुना तावेवेन्द्र मा वहतामिति प्रार्थते—]"हिरण्यये" हिरण्मये "रथे" युक्तौ "मयूरशेप्या" मयूरवर्णः शेपो ययोस्तौ [सुपां सुलुगिति (७,१,३९) विभक्तेर्डादेशः] "शितिपृष्ठा" श्वेतपृष्ठौ† एवम्भूतौ "हरी" अश्वौ हे इन्द्र! "त्वा" त्वाम् "आ वहताम्"। किमर्थम्? "मध्वः" मधुर-रसस्य "विवक्षणस्य" वक्तुमिष्टस्य स्तुत्यस्य‡ यद्वा वोढव्यस्य प्रापणीयस्य "अन्धसः" अन्नस्य सोमरूपस्य "पीतये" पानार्थम् ॥ २ ॥

---

* ऋ० वे० ५, ७, १४, ५।

† 'शितिपृष्ठा—शोणपृष्ठौ—इति वि०।

‡ 'अतिशयेन विवक्षितभूतस्य'—इति वि०।

अथ तृतीया।

२२ १ १ २ ३११ ११,२
पिबात्वाऽऽस्यगिर्वणःसुतस्यपूर्वपाइव।

१२ ३ ११३१ २ ३२ ११२
परिष्कृतस्यरसिनइयमासुतिश्चारुर्मदायपत्यते॥ ३*॥ ५

हे "गिर्वणः" गीर्भिर्वननीयः स्तुतिभिः सम्भजनीयेन्द्र! "सुतस्य" अभिषुतस्यास्य सोमस्य [क्रियाग्रहणं कर्त्तव्य मिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी (२,३,६२)] इमं मभिषुतं सोमं "नु" क्षिप्रं "पिब"। तत्र दृष्टान्तः—"पूर्वपाइव"† [पूर्वः पूर्वेभ्यो देवेभ्यः प्रथममावी सन् पिबतीति पूर्वपा वायुः, सञ्जेन्द्रवायवे मुख्ये ग्रहे सर्वेभ्यः देवेभ्यः पूर्वं पिबति "यस्य देव दधिषे पूर्वपेयम्"—इति निगमान्तरम्; तादृशः] वायुरिव त्वमपि सर्वेभ्यो देवेभ्यः पूर्वं पिबेत्यर्थः। कीदृशस्य सोमस्य? "परिष्कृतस्य" अभिषवादिभिः संस्कृतस्य ["सम्यर्युपेभ्यः (६,१,१३८)"—इति करोतेर्भूषणे सुट्, "परिनिविभ्यः (८,३,७०)"—इति सुटः षत्वम्], "रसिनः" रसवतः। अपिच "इयमासुतिः"‡ अयमासवो मदकरः "चारुः" शोभनः सोमरसः "मदाय" हर्षाय हर्ष-जननाय "पत्यते" सम्पद्यते [पत्लृ गतौ (भ्वा० प०), यद्वा पत्यतिरैश्वर्य-कर्मा। मदाय—मदस्य पत्यते ईष्टे मदोत्पादने शक्त इत्यर्थः]॥ ३॥ ५

---

* ऋ० वे० ५, ७, १४, १।

† 'पूर्वपातारो ये ते यथा पिबन्ति तद्वत् पिबस्व'—इति वि०।

‡ 'आसुतिरासवनिरित्यर्थः'—इति वि०।

॥ अभीवर्त्तम् ॥ आत्वा३ सा२ ह्वस्वमाग्नतोवा। यूक्ता
रथे। हिरण्या१यार्२यि। ब्राह्मयुजौ३१२३४। हरय
इ। न्द्रकायिग्रा१यिनार्२:। वहान्ता१सोर्२। मपा३यि।
ता२३४५यि ॥(१) आत्वा३रा३थायिहिरण्ययोवा। हारी
मयू। रग्रायिपा१यार्२। यितिपृष्ठा३१२३४। वहता
म्भ्वोआन्धा१सार्२:। विवाक्षा१णा२। स्यपा३यि। ता
२३४५। या२३४५यि ॥(२) पिबा३तू३वस्रगिर्वणोवा।
हृतस्रपू। र्वपात्रा१यिवार्२। पारिष्कृता३१२३४। स्य
रसिनद्। यमाहु१ताश्यिः। चारुर्म्मा१दार्२। यपा३।
त्या२३४५। ता२३४५यि(३) ॥ १५* ॥ १

॥ भारद्वाजम् ॥ आत्वासहा। स्मायाग्ना १ ताश्रम्।
यूक्तारथेहिरण्यये। ब्रह्मायू१जार्२:। हारयइ। द्रका

---

* ऋ० गी० ७म० १अ० १५सा०।

यिष्णा१यिना२: । वह्वान्नू१सो२३ । मारपा२३४औह्वो
वा । ता२३४य ॥(१) आत्वारथायि । हिराण्या१या२
यि । हारीमयूरशेष्या । भिनायिपा१ष्ठा२ । वाहता
म्म । ध्वोआन्धा१सा२: । विवाक्षा१णा२३ । स्थारपा२
३४औह्वोवा । ता२३४ये ॥(२) पिबातुवा । स्थगायिर्वा
१णा२: । हृतस्यपूर्वपाइव । परायिष्का१र्त्ता२ । स्थार
सिनद्रु । यमाह्व१ना२यि: । चारुर्मा१दा२३ । या२पा
२३४औह्वोवा । त्यो२३४ते(३) ॥ १२* ॥ २

॥ अभिनिधनं काण्वम् ॥ औह्वोह्वोहायि । आयाह्वो ।
आत्वा । सा२३४हा । स्तामाभा२३४ताम् । यूक्षारा२३४थायि ।
हीरण्ययायि । ऐह्वोयि । आ२३४यिह्वो । ब्राऽह्मायू२३
४जो । हारायाहा२३४ई । द्राकेभिना: । ऐह्वोयि । आ

* जै० गा० १८प्र० २अ० १२खा० ।

२३४यिहो। वा इन्द्र२३४सो। मपाऽयिताऽयाऽऽयि ॥(१)
औद्दोद्दोहायि। आयिद्दी। आत्वा। रा२३४थायि।
द्दायिरण्या२३४यायि। द्दारीमा२३४यू। राज्ञेपिया।
ऐद्दोयि। आ२३४यिहो। प्रायितायिपा२३४र्ष्टा। वा
द्दाता२३४म्मा। ध्वोऽन्धसाः। ऐद्दोयि। आ२३४यि
द्दी। वायिवन्ना२३४णा। स्वपाऽयिताऽयाऽऽयि ॥(२)
औद्दोद्दोहायि। आयिद्दी। पायिवा। तूर२३४वा।
स्यागिर्वा२३४णाः। सूतस्या२३४पू। र्वापाहुवा। ऐद्दो
यि। आ२३४यिद्दी। पारिष्का२३४र्त्ता। स्यारासी२३
४नाः। दृयमासुतायि। ऐद्दोयि। आ२३४यिद्दी। चा
रुर्म्मा२३४दा। यपाऽत्याऽयता ऽऽयि। आ२३४
भी(३) ॥ ३ * ॥ [३] ५

* ऋ० गा० २३म० ३अ० ३सा०।

अथ आसोतेति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १२ ३ २३१र २र३१२ ३१२
आसोतापरिषिञ्चताश्वन्नस्तोममप्तुरंरजस्तुरम्।

१ २ ३१२
वनप्रक्षमुदप्रुतम् ॥ १ * ॥

हे ऋत्विज! "आसोत" सोमम् अभिषुणुत [षुञ् अभिषवे (स्वा० उ०), लोटि छान्दसो (२, ४, ७२) विकरणस्य लुक्, "तप्तनप्तनथनाश्च (७,१,४५)"—इति तस्य तबादेशः]। किञ्च, "परिषिञ्चत" परितस्तं वसतीवर्यादिभिः सिञ्चत। कीदृशम्? "अश्वं न" अश्वमिव वेगिनं "स्तोमं" स्तोतव्यम्, "अप्तुरम्" अन्तरिक्षस्थितानामुदकानां प्रेरकम् "रजस्तुरं" तेजसां प्रेरकम्, "वनप्रक्षम्" उदकवत् चरणशीलम्, "उदप्रुतम्" उदके गच्छन्तं प्लवमानं सोममभिषुणुत अभिषिञ्चत च॥

"वनप्रक्षं"-"वनक्रक्षम्"—इति पाठौ॥ १॥

अथ द्वितीया।

३१२ ३१ १३ १२ ३ २३ २ ३१२
सक्षन्नधारंवृषभम्पयोदुहम्प्रियन्देवायजन्मने।

१२३२३ १,२ ३१र ९र ३२३ २ ३२
कृतेनयक्रतजानोविवावृधेराजादेवकृतम्भृक्षत् ॥२॥ †

---

* ऋ० अ० ५, २, ४, २ (२मा० १२८४०) = ऋ० वे० ७, ५, १८, २।

† ऋ० वे० ७, ५, १८, ३।

"सहस्रधारं" बहुधारोपेतं, "वृषभं" कामानां वर्षकं, "पयोदुहं" क्षीरवत् सारभूतं रसं सिञ्चन्तं "प्रियं" प्रीणयितारं सोमं "देवाय" देव-सम्बन्धिने "जन्मने"* देवेभ्यस्तदर्थम् अभिषुणुत। "ऋतजातः" उदकाज्जातः "यः" "राजा" सोमः "ऋतेन" यमतीवर्ष्याख्येनोदकेन "वि वावृधे" विशेषेण वर्द्धते। कीदृशः? "देवः" द्योतमानः स्तोतव्यो वा, "ऋतं" सत्यभूतः, "बृहत्" महान्। तमासुनुतेति पूर्वेण समन्वयः॥

"पयोदुहम्"-"पयोवृधम्"—इति पाठौ॥ २॥ ६

॥ वाचःसाम॥ आसोतापा। क्षोरिषिञ्चता६ए। आश्वन्नस्तो। मामग्नुरा२म्। राजस्तुरम्। वानप्रा क्षा२३म्। ऊ२३दा३। ग्रू३४५तो६५क्षाइ(१)॥१०॥ [१]

॥ वाचःसाम॥ आसोतापा। क्षो। रिषिञ्चता६ए। आश्वान्नस्तो। मामग्नुरा२म्। राजस्तुरम्। वानप्रा क्षा२३म्। ऊ२३दा३। ग्रू३४५तो६क्षायि॥(१) वनप्र क्षाम्। क्षोयि। उदग्रुताइमे। साहस्रधा। राम्भृ

* 'जन्मनां मूलभूताय' इति वि०।

† ऊ० गा० १म० २ऋ० १सा०।

१२ २ १ ७ १ ४
षभा२। पायोदुग्धम्। प्रायन्दायिवा२३। या२३जा३।
२ ५ ३४५२ २ ७४ ५ ५
न्मा३४५नोई३हायि॥(२) प्रियन्देवा। ह्वो। यजन्मनाई३ए।
१२ २ १ ७ १ ४२२ १२ २
आर्त्तनयः। आर्त्तजाता२। वायिवावृधे। राजादा
१ १ ४ २
यिवा२३:। आ२३र्त्ता३म्। बृ३४५ह्वो ई
५
हायि(३)॥१७*॥[२]

२२ १२ २ ४५ १ ३ ५ २
॥सप्तम्॥ आसोता३परि। षिञ्चा२३४ता। अ
१ २ १ १ २ ४ २ ५
श्वन्नस्तोमा२म्। अप्रुराण्रा३जा३। स्तू३२३४राम्।
१ २ ४ २ ५ २ १ १
वना। प्रत्नामू३दा३। प्रू३४५नोई३हायि॥(१) वनप्रा३
४५ २ ३ ५ २ १ १ १ १ २
त्तमु। दप्रू२३ताम्। सहस्रधारा२म्। वृषभाया३
४ २ ५ २ १ २ २ ४ २
योइ३। दू३२३४त्ताम्। प्रियाम्। देवाया३जा३। न्मा
३ २ १ २ ४२४ २ ३ ५
३४५नोई३हायि॥(२) प्रियन्देइवाय। जन्मा२३४नायि।
२ १२ १ १ २ ४ २ ५
क्षतेनयाआ२। तजातोइवाइयि। वा३२३४र्द्धायि।

* ऋ० गा० ७प्र० १अ० १७सा०।

२ १ २ १ १२ २ ४ २, ५
ऋतेनयाआ२। तजानोवाइयिवाइ। वा३२३४र्ड्वायि।

२ १२ २ १ १ २ ४ २, ५
ऋतेनयाआ२। तजानोइवाइ। यि। वा३२३४र्ड्वायि।

२ २ १ २ २ ४ २ ५
राजा। देवाआ३त्ता३म्। बृ३४५ हो ईहायि(३)

॥ १२* ॥ [३] ६

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य द्वादशस्याध्यायस्य
द्वितीयः खण्डः ॥ २ ॥

अथ तृतीय-खण्डे—

अग्निर्हव्यानीति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

२ २ २ १ २ १ १ १ २ १ १
अग्निर्वृत्राणिजङ्घनद्द्रविणस्युर्विपन्यया।

१ २ ३ १२ २२
समिद्धःशुक्रआहुतः ॥ १† ॥

"विपन्यया" सुस्तूयमानः "द्रविणस्युः" द्रविणं धनं स्तोतृणामिच्छन् [यद्वा, द्रविलक्षणं धनमात्मन इच्छन् "अग्निः"

---

* ऋ० मा० १२अ० १ष० १३सा०।

† ऋ० अ० १, १, १, ४ (१मा० ९८४०) = ऋ० वे० ४, ५, २७, २।

"वृत्राणि" आवरकाणि रक्षः-प्रभृतीनि तमांसि वा "जङ्घनत्" हिंसन्तु। कीदृशोऽग्नि? "समिद्धः" सम्यक् दीप्तः अतएव "शुक्र" शुक्लवर्णः "आहुतः" हविर्भिरभिहुतः॥ १॥

अथ द्वितीया।

१ १ ३ २ ३ १ ३ १ २ २ १ ३ १ २
गर्भेमातुःपितुष्यताविदिद्युतानोअक्षरे*।

१ १ ३ २ १ १ २ ३ २
सीदन्नृतस्ययोनिमा॥ २†॥

[अत्र मात्र-पित्र-शब्दाभ्यां भूर्द्यौश्चाभिधीयेते "द्यौः पिता, पृथिवी मातेति श्रुतेः] "मातुः" भूम्याः गर्भे" गर्भस्थाने मध्ये "अक्षरे" क्षरण-रहिते वेद्याख्ये स्थाने‡ "वि दिद्युतानः" विशेषेण दीप्यमानः "पितुः पिता" द्युलोकस्य पालयिता हविषां प्रदानेन, एवम्भूतोऽग्निः "ऋतस्य" यज्ञस्य "योनिम्" उत्तरवेद्याख्यं "धिष्ण्यं" [सप्तम्यर्थे द्वितीया (३, १, ८५)] "आसीदन्" उत्तरवेद्यामुपविशन् अग्निर्वृत्राणि जङ्घनदित्यन्वयः॥ २॥

अथ तृतीया।

१ १ ३ २ १ १ २ ३ १ १ ३ १ २
ब्रह्मप्रजावदाभरजातवेदोविचर्षणे।

१ ३ १ ३ १ १ १ २
अग्नेयद्दीदयद्दिवि॥ ३¶॥ ७

---

* "अक्षरम्"—इति क० पु० पाठः।

† ऋ० वे० ४, ५, २७, ५।

‡ 'अक्षरे'—अधीयमाणे स्थाने' —इति वि०।

¶ ऋ० वे० ४. ५. २७, ५।

हे "जातवेदः" जातानां वेदितः! "विचर्षणे" विशेषेण द्रष्टः अग्ने! "प्रजावत्" पुत्र-पौत्र-सहितं "ब्रह्म" अन्नम् "आ भर" आहर "यद्" ब्रह्म "दिवि" द्युलोके "दीदयत्" दीप्यते। देवेषु यत् प्रशस्तमन्नं राजते तदाहरेत्यर्थः॥ ३॥७

अस्यप्रेषेति ह्यचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

३ २ ३ २ ३ १ २ ३ १ २
अस्यप्रेषाहेमनापूयमानो
३ २ ३ २ ३ १ २ ३ १ २
देवोदेवेभिःसमपृक्तरसम्।
३ १ ३ १ ३ १ २ ३ १ २
सुतःपवित्रमत्येतिरेभन्
३ २ ३ १ २ ३ २ ३ १ २
मितेवसद्मपशुमन्तिहोता॥ १*॥

"अस्य" सोमस्य "प्रेषा" [प्रेषतिर्गत्यर्थः क्विपि रूपं, "सावेकाच (६,१,१६८)"—इति विभक्तेरुदात्तत्वम्;] प्रेरणेन, "हेमना" हिरण्येन "पूयमानः"["हिरण्यपाणिरभिषुणोति"—इति हिरण्य-सम्बन्धः, तादृशः] "देवः" दीप्यमानः सोमः "रसम्" आस्वोयं "देवेभिः" देवैः सह "समपृक्त" सम्पर्चयति संयोजयति [पृची सम्पर्के (अदा०आ०)] ततः"सुतः"अभिषुतः सोमः"रेभन्" शब्दायमानः सन् "पवित्रम्" ऊर्णास्तुकेन निर्मितं "पर्येति"

* ऋ० वा० ६, १, ४, ४ (१भा० ११५४०)=ऋ० वे० ७, ४, ११, १।

परिगच्छति। कमिव?"होता" देवानामाह्वाता ऋत्विक् "मिता इव" निर्मितान् "पशुमन्ति" बहुपशून् "सद्म" सदनानि यज्ञगृहान् यथा पर्येति तद्वत् ॥ १ ॥

अथ द्वितीया।

३१ २र ३२ १२
भद्रावस्त्रासमन्याऽऽवसानो
३ २ २ ३१२ ३१ २
महान्कविर्निवचनानिशंसन्।
१ १ ३क२र ३१२
आवच्यस्वचम्वोःपूयमानो
३१ २र ३१२
विचक्षणोजागृविर्देववीतौ ॥ २* ॥

"भद्रा" भद्राणि कल्याणानि "समन्या" [समनमिति सङ्ग्राम-नाम (२, १७, १६), तत्र साधुरिति यत्] सङ्ग्रामयोग्यानि "वस्त्रा" वस्त्राणि आच्छादकानि तेजांसि "वसानः" आच्छादयन् "महान्" "कविः" क्रान्तदर्शी अतएव "निवचनानि" नितरां वक्तव्यानि स्तोत्राणि† "शंसन्" "विचक्षणः" विशेषेण सर्वस्य द्रष्टा "जागृविः" जागरणशीलः। हे सोम! एवम्भूतस्त्वं "देववीतौ" देवानां वीतिर्भक्षणं यस्मिन् तद्देववीतिर्यज्ञः तस्मिन् "चम्वोः" अधिषवण-फलकयोः‡ "आ वच्यस्व" पात्राण्यानिश [वंचिर्गत्यर्थः (भ्वा० प०) व्यत्ययेन श्यन् ॥ २ ॥

* ऋ० वे० ७, ४, ११, २।

† 'वचनानि—ऋग्यजुः-साम-लक्षणानि'—इति वि०।

‡ 'चम्वोः—अधिषवण-चर्मणीवपरि'—इति वि०।

अथ तृतीया।

१ २ ३ १ २ ३ २ ३ १ २
समुप्रियोमृज्यतेसानोअव्ये

३ १ २ १ २ ३ १ २ १ २ ३ २
यशस्तरोयशसाङ्नोअस्मे।

१ १ २ १ १ २ ३ १ २ ३
अभिस्वरधन्वापूयमानो

३ १ २ ३ २ ३ १ २
यूयम्पातस्वस्तिभिःसदानः॥ ३ *॥ ८

"यशसां" यशस्विनां मध्ये "यशस्तरः" अतिशयेन यशस्वी "चैतः" चितो भावः "प्रियः" प्रीणयिता सोमः "सानौ" समुच्छ्रिते "अव्ये" अवि-भवे पवित्रे "अस्मे" अस्मदर्थं "सम्मृज्यते" ऋत्विग्भिः परिपूयते "उ" [—अवधारणे] "पूयमानः" त्वं "धन्वा" अन्तरिक्षे "अभि स्वर" अभितः शब्दय "यूयम्" [प्रजायां बहुवचनम्†] हे सोम! त्वं "नः" अस्मान् "स्वस्तिभिः" कल्याणतमैः पालनैः "सदा" सर्वदा "पात" रक्षत पालयेत्यर्थः॥ ३॥ ८

२ २ २ १ ३ २
॥ उरुवायिवासिष्ठम्॥ उरुवायि। अस्राइ ४औ

४ ३ ५ १ ३ १ २ १ ३ २ ३ ४ ५ ३ २ २ ३
होवा। प्रेषा। हेइमना। पूयमानाः। देवाइ ४औ

४ ३ ५ १ ३ २ १ २ ३ ४ ५ ३ २
होवा। देवायि। भोइःसम। पुक्करसाम्। सुताइ

* ऋ० वे० ७, ४, ११, ३।

† 'यूयं पात—बहुवचनमिदं सत्र देवैरित्यर्थः'—इति वि०।

२२ २ १ १ २ ३४५ ३ २
४औ३होवा। पवायि। चा३परि। एतिरेभान्। मिता
३२ २ ५ १ २ १ २ ३ ४
३४औ३होवा। वसा। द्मा३पमु। मा३४३। तौ३द्यो
२ १ ३२ २४ ५ १ १ १
५ता६५६ ॥(१) भद्रा३४औ३होवा। वस्ता। समनि।
१ २ ३ ४ ५ ३ १ ३२ ४२ ५ १ २ १
यावसानाः। मद्दा३४औ३होवा। कवायिः। निवच।
२ ३ ४ ५ ३२ २ ३२ ४२ १ २ १ २
नानिशण्सान्। आवा३४औ३होवा। च्यस्वा। चमुवोः।
२ ३ ४ ५ ३ २ ३२ ४२ ५ १ १२ १
पूयमानाः। विचा३४औ३होवा। क्षणो। जागृविः।
१ २ ४ ३ १ १ ३२ ४२ ५
दा३४३यि। वा३चापुयिता६५६७ ॥(२) समू३४औ३होवा।
१ २ १२ २ ३२ ४ ५ ३ २ ३२ ४२ ५
प्रियो। मृज्यते। सानोअव्यायि। यज्ञा३४औ३होवा।
१ ११ २ २ ३२ ४ ५ ३ २ ३२ ४२ ५
स्तरो। यज्ञसाम्। स्तोमअस्मायि। अभा३४औ३होवा।
१ २ १ २ २ ३ ४ ५ ३ २ ३२ २ ४ ३२
स्वरा। धनुवा। पूयमानाः। उक्थवायि। यूया३औ
४२ ५ १२ २ १ १ २ ४
होवा। पाता। सुवस्ति। भा३४३यिः। सा३दा५
नाह५६(३) ॥ ६ * ॥ [१] ८

---

* ऋ० गा० ७प्र० २अ० ६सा०

अथैतोन्विन्द्रमिति ऋचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा ।

१२ २२ ११ २२ २२३१ १
एतोन्विन्द्रꣳस्तवामशुद्धꣳशुद्धेनसाम्ना ।
२२३१ २ ३१ १ २२३ १२
शुद्धैरुक्थैर्वावृध्वाꣳसꣳशुद्धैराशीर्वान्ममत्तु ॥ १ * ॥

[अत्रेतिहासमाचक्षते—पुरा किलेन्द्रो वृत्रादिकान् असुरान् हित्वा ब्रह्महत्यादि-दोषेणात्मान मपरिशुद्ध मित्यमन्यत अथ तद्दोष-परिहारार्थं यदेन्द्र ऋषीनवोचत्—यूय मपूतं मां युष्मदीयेन साम्ना शुद्धं कुरुतेति । ततस्ते च शुद्धत्वादकेन साम्ना शस्त्रेण परिशुद्ध मकार्षुः । पश्चात् पूतायेन्द्राय यागादि-कर्मणि सोमादीनि हवींषि च प्रादुरिति । एषोऽर्थः शाटायनक-ब्राह्मणे प्रतिपादितः—"इन्द्रो वा असुरान् हत्वाऽपूत इवामेध्यो ममन्यत सोऽकामयत शुद्धमेवमासन्नं शुद्धेन साम्ना स्तुयुरिति स ऋषीनब्रवीत् स्तुतमिति ततएव ऋषयः सामापश्यन् तेनास्तु-वन्नेतोन्विन्द्रमिति ततो वा इन्द्रः पूतः शुद्धो मेध्यो भवदिति । तथाच अस्या ऋचोऽयमर्थः—] ऋषयः परस्परं ब्रुवन्ति—"नु" क्षिप्रम् "एत उ" आगच्छतैव । आगत्य च "शुद्धेन" शुद्धत्वाद्-केन साम्ना, तथा "शुद्धैः" शुद्धि-हेतुभिः "उक्थैः" शस्त्रैश्च इन्द्रम् शुद्धमपापिनं कृत्वा "स्तवाम" स्तुयाम । ततः "साम्ना" शस्त्रेण च "वावृद्धांसं" पाप-राहित्येन वर्धमानं तमिमंमिन्द्रं "शुद्धैः"

* ऋ० सा० ४, २, १, ९ (१मा० ७१४पृ०) = ऋ० वे० ६, ६, २१, २ ।

शुद्धात्पादकैर्गव्यादिभिः "आग्रीवान्" आश्रयणवान् ["छन्दसोरः (८, २, १५)"—इति मतुपो वत्वम्, तादृशः सोमः] "ममत्तु" तमिन्द्रं मादयतु [माद्यतेश्छान्दसः (२,४,७६)श्लुः] ॥

"शुद्धैरागीर्वान्"-"शुद्धआग्रीर्वान्"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

१ १ ३ २ ३ १ २ ३ १ १ १ २ ३ १ २
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः।
३ २ ३ १ २ २ ३ १ २
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य ॥ २ * ॥

हे "इन्द्र!" "शुद्धः" अस्मदीयैः सामभिः शस्त्रैश्च परिशुद्धस्त्वं "नः" अस्मान् "आ गहि" आगच्छ "शुद्धाभिः" "ऊतिभिः" ऊतयो मरुतः [अवन्ति सर्वत्र गच्छन्तीति वा] तेऽपि सामभिः शस्त्रैश्च परिपूताः तैः मरुद्भिः सह "शुद्धः" पाप-रहितः त्वम् आगहि। आगत्य च "शुद्धः" त्वं "रयिं" धनं अस्मासु "निधारय" अतितरां स्थापय। किञ्च, हे "सोम्य" सोमार्ह! "शुद्धः" त्वं "ममद्धि" सोमेन माद्य [मदी हर्षे (दि० प०) लोटि "बहुलम्छन्दसि (२, ४, ७६)"—इति शपः श्लुः] ॥

"ममद्धिसोम्य"-"ममद्धिसोम्यः"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० १. ६, ३१. १।

अथ तृतीया।

१ २ ३ १र० २र ३ २ ३ १र १र ३ १ २
इन्द्र मृळीहि नो रयिं मृळा नो रत्नानि दाशुषे।
३ २ ३ १ २ ३ १र २र
मृळा वृत्राणि जिघ्नसे मृळा वाजं सिषाससि॥ ३ * ॥ ९

हे "इन्द्र!" "मृळः हि" [—अवधारणे†] मृळ एव त्वं "नः" अस्मभ्यम् "रयिं" धनं प्रयच्छ। तथा "मृळः" त्वं "दाशुषे" हविर्दत्तवते यजमानाय "रत्नानि" रमणीयानि कनक-गवादीनि देहि। ततः "मृळः" पाप-रहितः त्वं "वृत्राणि" अपामावरकान् कर्म-विघ्नकारिणं शत्रून् पापानि वा "जिघ्नसे" हंसि। ततः "मृळः" शत्रु-हनन-दोष- परिहाराय अस्मदीयैः सामभिः शस्त्रैश्च परिमृडत्वं वाजमन्नमस्मभ्यं "सिषाससि" प्रदातुमिच्छसि ‡ [यदा शत्रूनहं हन्यां तदा मृडयित्रादकैः सामभिः शस्त्रैश्च यूयं मां परिमृडं कुरुतेत्येवमस्मभ्यं धनमन्नञ्च दातुमिच्छसीत्यर्थः]॥ ३॥९

॥ मृळीमृळीयोत्तरम्॥ २र र १
एतोन्विन्द्रꣳस्तवाम। मृळ
२ १ १ २ २ १र
ीꣳमृळय। न। सामा२। मृळायिरु३क्थाꣳयिः। वा
१ ५ २ १र २ १ २ १
वा२र्द्धा२३४ꣳसाम्। मृळैरा२३शी। र्वान्ममत्तु। इडा

---

* ऋ० वे० ६, ६, ११, ४।

† 'हि तस्मादर्थे, मृळत्वं यस्मात् रयिं धनं मृळं सिषारयं' -इति वि०।

‡ 'सिषाससि—साधयसि'—इति वि०।

२३ ॥(१) इन्द्रशुद्धोनआगाइहि। शुद्धःशुद्धा। भिर्ऊ।
तायिभाइयिः। शुद्धोराइयीइम्। निधाररा२३४या।
शुद्धोमा२३मा। धीसोमिय। इडा२३ ॥(२) इन्द्रशुद्धो
ह्विनोराइयीम्। शुद्धोरत्नानिदा। शूषा२यि। शुद्धो
वाइर्चाइ। णिजा२म्नार२३४साधि। शुद्धोवा२३जाम्।
साधिषासधि। इडा२३भा३४३। ओ२३४५ई।
डा(३) ॥ १२ * ॥ [१] ९

इति सामवेदार्थप्रकाशे उत्तरार्चस्य द्वादशस्याध्यायस्य
तृतीयः खण्डः ॥ २ ॥

अथ चतुर्थ-खण्डे—

अग्नेस्तोममिति तृचात्मकं सूक्तम्,

तत्र प्रथमा।

अग्नेस्तोममनामहेसिन्धमद्यादिविस्पृथः।
देवस्यद्रविणस्यवः ॥ १ † ॥

---

* ऋ० मा० ७प्र०२अ० १२खा०।

† ऋ० मं० ४, १, ५, २।

"द्रविणस्यवः" द्रविणं धनमिच्छन्तो वयं "दिविस्पृशः" सूर्यरूपेण आकाशं व्याप्नुवतो "देवस्य" द्योतमानस्य "अग्नेः" "सिद्ध" पुरुषार्थानां साधकं "स्तोमं" स्तोत्रम् "अद्य" अस्मिन्यज्ञे "मनामहे" ब्रूमः ॥ १ ॥

अथ द्वितीया।

१ १ १ २ २ २ ३ १२ २१२१
अग्निर्जुषतनोगिरोहोतायोमानुषेष्वा।

१ १ २ २ ३ १ १
सयज्ञद्दैव्यञ्जनम् ॥ २ * ॥

"होता" देवानामाह्वाता होम-निष्पादको वा "अग्निः" "मानुषेषु" "आ" वसति। "यः" अग्निः "नः" अस्माकं "गिरः" स्तुतीः "जुषतां" सेवताम् "सः" अग्निः "दैव्यं जनं" देव-सम्बन्धिनं जनं† "यज्ञत्" यजतु ॥ २ ॥

अथ तृतीया।

१ २ ३ १२ १२
त्वयायज्ञंवितन्वते ॥ ३ ‡ ॥ १०

---

* ऋ० वे० ४, १, ५, २।

† 'दैव्यं जनं—देवानां सम्भूतं वसु-रुद्र-मरुत्-प्रभृतिकं जनम्'—इति वि०।

‡ ऋ० वे० ४, १, ५, ४।

हे "अग्ने !" "जुष्टः" सर्वदा प्रीतः "वरेण्यः" सर्वैर्वरणीयः "होता" त्वं "सप्रथाः असि" सर्वतः पृथुर्भवसि.[तथाहि यास्कः—"सप्रथाः सर्वतः पृथुः (निरु० नै० ६.७)"—इति]। किञ्च, सर्वे यजमानाः "त्वया" साधनेन "यज्ञं" "वि तन्वते"* ॥ ३ ॥ १०

अभित्रिपृष्ठमिति ऋचात्मकं द्वितीयं सूक्तम्,†

तत्र प्रथमा ।

३ १ २ ३ १ २ ३ १
अभित्रिपृष्ठं वृषणंवयोधा
१ ३ १ २ ३ १ २
मङ्गीषिणमवावशन्तवाणी ।
२ १ १ २ ३ १ २ ३ १ ३ २
वनावसानोवरुणोनसिन्धु-
१ २ ३ १ २ ३ १ २
र्विरत्नधादयतेवार्याणि ॥ १ ॥

"त्रिपृष्ठं" त्रीणि पृष्ठानि स्तोत्राणि सवनानि वा यस्य स तथोक्तस्तं "वृषणं" वर्षकं "वयोधाम्" अन्नस्य दातारम् "मङ्गीषिणम्" अपीषवन्तं सोममभिलक्ष्य "वाणीः" स्तोतॄणां वाचः "अवावशन्त" शब्दायन्ते । "वना" वनानि उदकानि "वसानः" आच्छादयन् "वरुणो न" वरुणो यथा सिन्धूनाच्छादयति तद्वत् ।

---

* 'ऋत्विजः क्रियारम्भे'—इति वि० ।

† 'यज्ञमध्याद्यः सप्तम्या'मध्यन्दिनम्'—इति वि० ।

‡ ऋ० अ० १, अ० १, व० ४, ए० ६ (२भा० १२० ब्र०)=ऋ० वे० ७, ३, २६, २ ।

"सिन्धुः" स्यन्दनशीलः, "रत्नधाः" रत्नानां दाता सोमः "वार्याणि" धनानि "दयते" प्रयच्छति स्तोतृभ्यः ॥

"अङ्कोषिणम्"-"अङ्कूषाणम्"—इति पाठो, "सिन्धुः"-"सिन्धून्"—इति च ॥ १ ॥

अथ द्वितीया।

१२ ३१२ ३११ ३
शूरग्रामःसर्ववीरःसहावान्
१२ ३१२ ३१२
जेतापवस्वसनितादनानि।
३ १२ ३१३ ३१२
तिग्मायुधःक्षिप्रधन्वासमत्
२२ ३ १२ ३२ ३ १३
स्वषाढःसाह्वान्पृतनासुशत्रून्॥ २*॥

हे सोम! त्वं "पवस्व"। कीदृशस्त्वम्? "शूरग्रामः" शूराणां ग्रामः सङ्घो यस्य सः, "सर्ववीरः" सर्वे वीरा यस्य स तथोक्तः, "सहावान्" सहनवान् "जेता" जयशीलः "सनिता" सम्भक्ता "धनानि" धनानां, "तिग्मायुधः" तीक्ष्ण-प्रहरण-साधनः,† "क्षिप्रधन्वा" क्षिप्र-सहनशील-धन्वा, "समत्सु" सङ्ग्रामेषु "स्वषाढः" असोढा, "साह्वान्" अभिभवन्। कुत्र? "पृतनासु" शत्रु-सेनासु। कान्? "शत्रून्" ॥ २ ॥

---

* ऋ० वे० ७, ३, २६, ३।

† 'तीक्ष्णायुधः—असि-परशु-पाश-प्रभृतिभिरायुधैः सम्पन्नः'—इति वि०।

अथ तृतीया।

३ १ २ ३ १ २ ३ १
उरुगव्यूतिरभयानिकृण्वन्

२ ३ १ २ २१ ३ १ २
त्समीचीनेआपवस्वापुरन्धी।

३ १ २ १ २ ३ २ ३ १ २ १ २
अपःसिषासन्नुषसःस्वा*ऽऽगाः

२ २ ३ २ ३ २ ३ १ १
सच्चिक्रदोमहोअस्मभ्यंवाजान्॥ ३† ॥ ११

हे सोम! "उरुगव्यूतिः" विस्तीर्ण-मार्गः त्वम् "उभयानि" स्तोतृभ्यः "कृण्वन्" कुर्वन्, "पुरन्धी"‡ इमे द्यावापृथिव्यौ "समीचीने" सङ्गते कुर्वन्, "आ पवस्व" आगच्छ। "अपः" "उषसः" "स्वः" आदित्यं "गाः" रश्मींश्च "सिषासन्" सम्भक्तुमिच्छन् "सं चिक्रदः"¶ सङ्गच्छसे। "महः" महतः महान्ति "वाजानि" अन्नानि अस्मभ्यं दातुमिति शेषः॥ ३॥ ११

१ २ ३ १ २ ३ २
॥ सम्यावेयश्वम्॥ ओ३हायि। ओ३हा। ओहा।

१ ३ २ ३ २ २ १ २ ३
इयाइ। ओ३हाइ३ए। अभिचिपा। ष्ठाइ३वृष। णम्व

---

* "स्व"—इति ऋ० पाठः।

† ऋ० वे० ७, ३, २६, ७।

‡ 'पुरं धारयितः'—इति वि०।

¶ 'चिक्रदः—शब्दं कुर्वन्'—इति वि

४ ५ २ १ २ २ १ २ ३ ४ ५ २
योधाम्। अङ्गोषिणाम्। अवाव। ग्रस्तवाणीः। व

१ २ २ १ २ ३ ४ ५ २ २ १
नावसा। नोऽवद्य। णोनसिधूः। विरत्नधाः। द्दय

२ १ २ ३ १ २ १
ते। वा३४३। रीयापूणा६५६यि॥(१) पूरुरग्रामाः।

२ १ २ १ २ ३ ४ ५ २ १ २ १ २
सर्ववी। रःसहावान्। जेतापवा। स्वाऽसनि। ता

२ ४ ५ ० १ २ १ २ ३ ४ ५ २ १ २
धनानी। तिग्मायुधाः। क्षिप्रध। न्वासमत्सृ। अषा

२ १ १ २ ४
ढःसा। क्षाऽन्यूत। नाऽ४३। सूऽशापूऽचू६५६न्॥(२)

२ १ २ २ ३ ४ ५ २ १ २ १
उद्गव्य। तीऽभर। यानिक्षणवान्। समीचीने।

२ १ २ ३ ४ ५ २ १ २ १ २
आऽपव। स्वापुरन्धी। अपःणिषा। साऽनुष। सः

३ ४ ५ १ १ २ १ २ १
सुवर्गाः। ओऽहायि। ओऽद्या। ओहा। इया२।

५ १ २ १ २ १ २
ओऽहाऽए। सच्चिक्रदो। महोम। ना३४३। भ्या

४
वापूजाऽ६५६न्(३)॥ १७* ॥ [१] ११

---

* ऋ० गा० ७म० १अ० १७सा०।

अथ त्वमिन्द्रेति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१२ ३१२ ३१ २२३१२
त्वमिन्द्रयशा अस्यृजीषीशवसस्पतिः।
२३१२ १२३ २१३१२ ३१२
त्वंवृत्राणिहंस्यप्रतीन्येकइत्पूर्वनुत्तश्चर्षणीधृतिः॥ १*॥

हे "इन्द्र!" "त्वं" "शवसस्पतिः" शवसोऽन्नस्य बलस्य वा पालयिता, "ऋजीषी" ऋजीषोऽभिषुतः सोमः तद्वान्, त्वं "यशा असि" यशस्वी भवसि। कथमस्य यशस्वित्वं? तदाह-- "अप्रतीनि" बलिभिरपि अप्रतिगतानि "वृत्राणि" रक्षांसि "अनुत्तः" अन्यैर्नेतुमशक्यः त्वम् "एकइत्" एकएव असहाय एव "चर्षणीधृतिः" रक्षात्वेन यजमानादि-मनुष्याणां धारकः "पुरु" बहुलं यथा भवति तथा "हंसि" सम्यहरसि। अतएवास्य यशस्वित्वम्॥

"शवसस्पतिः"-"शवसस्पते"—इति पाठो, "इत्पूर्वनुत्तश्चर्षणीधृतिः"—"नएकइदनुत्ताचर्षणीधृता"—इति च॥ १॥

अथ द्वितीया।

१२ ३१२ २१२ ३ १२३१२
तमुत्वानूनमसुरप्रचेतसंराधोभागमिवेमहे।
३२३१२ ३१२ २१३१२
मघोवक्षत्रियंशरणातदिन्द्रप्रतेसुम्नानोअश्नवन्॥ २†॥१२

---

* ऋ० ५।३३।३, २, १, ६ (१ भा० ५।१२४०)=ऋ० वे० ६, ६, १३, ५।

† ऋ० वे० ६, ६, १२, ६।

हे "असुर" बलवत्! प्राणवत्! वा हे "इन्द्र!" यः उक्त-गुणोऽस्ति "तं" च "प्रचेतसं" प्रकृष्ट-ज्ञानं "त्वा" "उ"[—इत्यव-धारणे] पितृवत् पोषकं त्वामेव "राधः" धर्मादि-साधनं धनं "नूनम्"*इदानीम् "ईमहे" याचामहे। तत्र दृष्टान्तः—"भाग-मिव" यथा कश्चित् पितृतो भागभूतं धनं याचते, तद्वत्; इन्द्रो यजमानेभ्यः स्तोतृभ्यश्च धनं प्रयच्छत्येव तस्मात् भागभूतं धनं यष्टारो वयं याचामहे। किञ्च हे इन्द्र! "महीव क्रत्तिः" [क्रत्ति र्यज्ञोऽन्नं वा क्रतोश्छेदने (रु० प०) करणे क्तिन्। क्रतवस्त्वनेनेति, ईदृशो] क्रत्तिरिव "ते" तव "शरणा" शरणं गृहम् अन्तरिक्षं द्युलोके महद् वर्तते [अत्र यास्कः—"क्रन्ततेर्यज्ञोवान्नं वा। महीव क्रत्तिः शरणा त इन्द्र। सुमहत्त इन्द्र शरणमन्तरिक्षे क्रत्तिरिव (निरु० नै० ५, २२)"—इति]। किञ्च, "ते" तव स्व-भूतानि "सुम्ना" सुखानि मन्त्रादि-विषय-सुखानि च "नः" अस्मान् "प्राप्नुवत्" प्रकर्षेणाप्नुवतां व्याप्नुवन्तु [अश्नोतेर्लेट्यडागमः (३, ४, ८४)]॥ २ ॥ १२

५४ २ ४ ५२ ४२ ५ १
॥ अभीवर्त्तम्॥ तुवाऽमाऽयिन्द्रयशाऽसोवा। आ
२ १२ १ २ १ २ ३
ज्जीषीश। वसास्या१ताऽयिः। त्वम्वृचा३१२३४। णि
४५ २ २ १ २ १ २
च्छस्यप्रतीनिए। कऽआयित्पू१रुऽ२। अनूक्ता१स्वा२।
३ २ १ ३ १ १ १ ५ ४ २ ४
षणाऽयि। धा२३४५। ता२३४५भिः॥(१) अनू३क्ताऽस्व

* 'निश्चितम्'—इति वि०।

५र ४ ५ १ २ १ २ १
र्षणीधृतोवा। आनुत्तस्व। षणायिधा१र्त्ता२यिः। ता
र २ ३ ४५ २१ २ र १
मुत्वानू३१२३४। नमसुर। प्रचायिता१सा२म्। राधो
२ ३ २ १ ३ १ १ १ १
भा१गा२म्। दुवा३यि। मा२३४५। हा२३४५यि॥(२)
५र४ २ ४ ५र ४ ५ १ र २र १ १
राधोऽभाऽगमिवेमहोवा। राधोभागम्। दुवायिमा१
२ र १ ३४५र १ १ १
हा२यि। माहीवका३१२३४। तिःगरणा। तआआ१
१ २ ३र २ १
यिन्द्रा२। प्रतायिह्व१म्मा२। नोआ३। आ२३४५।
१ १ १ १
वा२३४५न(३)॥ १८*॥ [१]

॥ द्विर्हिङ्कारम्वामदेव्यम्॥ २१ ४ ५र
तुवमा२३यिन्द्रयज्ञाअसा
१र र र र ऽ
यि। आज्जोषीग्रवसस्पतिस्त्वम्वृत्राणिहर्ष्यप्रतीनआयि
१ ३र २ १ १ १ १ १ ३र २
कमौहोऽ३। ऊम्मा२। पृ२३ह्व। अनुत्तस्वार्षणीधोऽ३।
१ १ ४ ५ २ १ ४
ऊम्मा२। धृतायिः। औ२३धोवा॥(१) अनुत्ता२३स्व
५र १ र र र २
र्षणीधृतायिः। आनुत्तस्वर्षणीधृतस्तमुत्वानूनमसुराऽप्र

* ऋ० गा० ७अ०२व० १८सा०।

ओहोइ। ऊम्मा२। ता२३साम्। राधोभागाऽमिवो
हो३। ऊम्मा२। मघा। औ३हुवा॥(२) राधोभा
३गमिवेमघायि। राऽधोभागमिवेमघेमहीवक्तिःशरणा
ऽनओहोइ। ऊम्मा२। आ२३यिन्द्रा। प्रतेसुम्नाऽन
ओहोइ। ऊम्मा२। अवान्। औ२३हुवा। हो५ई।
डा(३)॥ ७ *॥ [२]

॥ यज्ञम्॥ त्वमिन्द्रा। यशाः। असायि। ऋजो
षीअवसः। पतायिः। त्वम्वृत्राणी३हव्यसिया। प्रतो
नाए२। कद्रत्पूरु२हो१। तश्च। षारणा२३४औहो
वा। धा२३४र्त्ताः॥(१) अनुत्तश्चा। अनुत्तश्चा। षणो।
धृतायिः। अनुत्तश्चर्षणो। धृतायिः। तमुत्वानू३नम
सुरा। प्रावा२यि। तामा२म्। राधा२हो१यि।

ऋ० मा० १६प्र० २अ० ७मा०।

र २ १ ३ ५ र र ३ ५
भागम्। आ२यिवा२३४औहोवा। मा २ ३ ४ हे ॥(२)

१र२ र १ २र र र १र र र
राधोभागाम्। राधोभागाम्। हवे। महायि। राधो

२र १ २र २ १ र २ ३ र १
भागमिवे। महायि। मह्हीवक्रा३र्त्तिःशरा। णातार२

१ १ २र २
यि। आयिन्द्रा२। प्रतार२यिहोयि। सुन्वा। नोर२

३ ५ र र ३ ५
आ२३४औहोवा। आ२३४वान्(३)॥ १४ * ॥ [३] १२

यजिष्ठन्त्वेति प्रगाथात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ ३ १ १र ३ १ २
यजिष्ठन्त्वाववृमहेदेवन्देववाहोतारममर्त्यम्।

३ २ ३ १ २ ३ १ १
अस्ययज्ञस्यसुक्रतुम्॥ १ †॥

हे अग्ने! "यजिष्ठं" यष्टृतमं "त्वा" त्वां "ववृमहे" वृणीमहे सम्भजामहे। कीदृशं त्वाम्? "देववाः" देवेषु मध्ये "देवम्" अतिशयेन दानादि-गुणकम्, "होतारं" देवानामाह्वातारम्, "अमर्त्यम्" अविनाशिनम्, "अस्य" "यज्ञस्य" यागस्य "सुक्रतुं" सुष्ठु कर्त्तारम्॥ १॥

---

* ज० गा० १८प्र० १अ० १४खं०।

† ऋ० अ० ३, १, ४, ६ (१भा० २८३ पृ०)=ऋ० वे० ६, १, १९, १।

अथ द्वितीया।

२१ २२ २१२ २१२ २२२१२
अपान्नपात्ꣳसुभगꣳ*सुदीदितिमग्निमुश्रेष्ठ†शोचिषम्।
१२२१ २११२ २२२२ २१२ २२
सनोमित्रस्यवरुणस्यसोऽपामासुम्नंयक्षतेदिवि॥ २‡ ॥१३

"जर्जः" अन्नस्य "नपातं" न पातयितारं¶ [यद्वा, नप्तारं चतुर्थं हविर्लक्षणेनान्नेन आपो जायन्ते, अन्नाद्योषधि-वनस्पतय-स्तेभ्य एष जायत इति चतुर्थत्वम्§। "नभ्रान्नपात् (६, ३, ७५)"—इति नञ् प्रकृतिभावः] "सुभगं" शोभन-धनं "सुदीदितिं" सुष्ठु दीदयन्तं "श्रेष्ठशोचिषं" प्रशस्यतम-तेजस्कम् अग्निं स्तोमीति शेषः। स तादृशोऽग्निः "नः" अस्मदर्थं "दिवि" द्योतमाने देवयजने द्युलोके वा "मित्रस्य" देवस्य "वरुणस्य" च "सुम्न" सुखम् "आ" अभिलक्ष्य "यक्षते" यजतु। तथा सोऽग्निः "अपाम्" अध्वर्यूणां च सुम्नमभि यजतु॥ २॥ १३

३ ४ २ ४ ५
॥ साध्यम्॥ याऽऽजि। ष्ठन्त्वाऽवाऽवृमहायि।
२२१२ २२ २ १ २ १ ७
देवन्देवचाहोता२ऽराम्। आमर्त्तियम्। आस्यायज्ञा

---

* "जर्जीनपातं"—इति ऋ० पाठः।

† "अग्निंश्रेष्ठ"—इति च ऋ०-पाठः।

‡ ऋ० वे० ६, १, २९, ४।

¶ ऋग्वेदीयपाठमवलम्ब्यैवं व्याख्यानम्।

§ 'अपां नपातम्—अपां पोचनमग्निम्। अपां पुञ्जका इवाः, तेषु सञ्जातं पुञ्जं-पोचम्'—इति वि०।

२३। स्या२३सू३। क्रा३४५तोई३हायि ॥(१) आऽ५पूस्य।
यज्ञा३स्या३सुक्रतूम्। अपान्नपातंसुभा२३गाम्। छदी
दितिम्। आग्निमूश्रे२३। ष्ठा२३ग्रो३। चा३४५यिषो
ई३हायि ॥(२) आऽ५ग्निम्। उश्रे३ष्ठा३ग्रोचिषाम्। स
नोमिचस्यवरू२३णा। स्यासोअपाम्। आसुम्नाया२३।
या२२ता३यि। दा३४५यिवोई३हायि(३) ॥ १* ॥ [१]

॥ ऐध्मवाहसम् ॥ यजिष्ठन्त्वावृमाहायि। देवन्देव
वाहोतारममर्त्तियाम्। अस्ययज्ञस्यसुदृहा। अस्ययज्ञ
स्यसूऽदृहा। जयायि। जवो२३४वा। क्रा५तोई३हा
यि ॥(१) असायज्ञस्यसुक्रातूम्। अपान्नपातंसुभगं
सुदीदितायिम्। अग्निमुश्रेष्ठशोदृहा। अग्निमुश्रेष्ठाग्रो
ऽदृहा। जवायि। जवो२३४। वा। चा५यिषोई३हा

* ऋ० मा० पञ्चा० १भ० ३खा० ।

२ ८ ८ १ १ ८
यि ॥(२) अग्निमुश्रेष्ठशोचायिषाम्। सुनोमित्वस्यवरुण
८ ६
सोमपाम्। आसुन्वंयजताऽइहा। ऊवायि। ऊवो२
५ ५ ५
३४। वा। दा५यिवोऽहायि(३) ॥ ३* ॥ [२] १३

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य द्वादशस्याध्यायस्य
चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चम-खण्डे—

यमग्नइति ट्यृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २उ ३ २ ३ १ २ ३ २ ३ २
यमग्नेपृत्सुमर्त्यमवावाजेषुयञ्जुनाः।
२उ ३ १ २ ३ १ २
सयन्तासुश्वतीरिषः† ॥ १‡ ॥

हे "अग्ने!" "पृत्सु" सङ्ग्रामेषु "यं" "मर्त्यं" यजमानम् "अवाः" अवसि रक्षसि, "यं" पुरुषं "वाजेषु" सङ्ग्रामेषु "यज्ञनाः" अवसि, "सः" नरः यजमानः "यन्तासुश्वतीरिषः" नित्यान्न-

---

* ऋ० मा० १८म० १अ० ३सा०।

† "स्वाहा"—इति यजुरधिकः पाठः।

‡ ऋ० वे० १, ९, २३, २ = य० वे० ६, २८।

स्मानि "यन्ता" नियन्तुं समर्थो भवति [पृक्षु—"पदादिषु मांस्तत्सूनामुपसङ्ख्यानम् (६,१,६३)"—इति पृतना-शब्दस्य पदादेशः "सावेकाच (६,१,१६८)"—इति विभक्तेरुदात्तत्वम्। अवाः—अवः अकाराकारयोर्विपर्ययः, यद्वा लेटाडागमः, "इतश्च (३, ४,८७)"—इति सिप इकार-लोपः। जुनाः—जुङ्इति गत्यर्थः सौत्रो धातुः, लङ्, सिप्, क्रयादिभ्यः श्ना; "बहुलञ्छन्दस्यमाङ्योगेऽपि (६,४,७५)"—इत्यड़ागमाभावः; यद्वृत्तयोगात् (८,१,३०)" अनिघातः। यन्ता—लृनो नित्त्वादाद्युदात्तत्वम् (६,१,१८७)। अग्रतीः—"उगितश्च (४,१,६)"—इति ङीप्॥ १॥

अथ द्वितीया।

१ २ ३ १२ २२
नकिरस्यसहन्त्यपर्येताकयस्यचित्।

१ २ १ १ २
वाजोअस्तिश्रवाय्यः॥ २*॥

हे "सहन्त्य!" शत्रूणामभिभवन-शीलाग्ने! "अस्य" त्वद्भक्तस्य यजमानस्य "कयस्यचित्" कस्यापि "पर्येता नकिः" आक्रमिता नास्ति। किञ्चास्य यजमानस्य "श्रवाय्यः" श्रवणीयः "वाजः अस्ति" बल-विशेषोऽस्ति†॥ २॥

---

* ऋ० वे० १, २, २३, १*।

† 'वाजवत्त्वं'—इति वि०।

अथ तृतीया।

१८ २८,३१२ ३१२ ३१२
सवाजंविश्वचर्षणिरर्वद्भिरस्तुतरुता।

१२ ३१२
विप्रेभिरस्तुसनिता॥ ३*॥ १४

"विश्वचर्षणिः" सर्वैर्मनुष्यैरुपेतः† "सः" अग्निः "अर्वद्भिः" अश्वैः‡ "वाजं" सङ्ग्रामं "तरुता" तारयिता "अस्तु" "विप्रेभिः" मेधाविभिः ऋत्विग्भिः सहितः तुष्टोऽग्निः "सनिता" फलस्य दाता¶ [विश्वचर्षणिः—विश्वे चर्षणयः अस्य "बहुव्रीहौ विश्वं सञ्ज्ञायाम् (६, २, १०६)"—इति पूर्वपदान्तोदात्तत्वम्। अर्वद्भिः—ऋ गतौ (भ्वा० प०), "अन्येभ्योऽपि दृश्यते (३,२,७५)"—इति वनिप्, भिसि "अर्वणस्त्रसावनञः (६, ४, १२७)"—इति नकारस्य त्र-इत्ययमादेशः। तरुता—तॄ प्लवन-तरणयोः (भ्वा०प०), अस्मात्"ग्रसित-स्कभित-(७, २, ३४)—इत्यादौ त्रन्तो निपातितः, निपातनादेवेकारस्योत्वम्] ॥ ३ ॥ १४

---

* ऋ० वे० १, १, २३, ४।

† 'विश्वस्य द्रष्टा'—इति वि०।

‡ 'अर्वद्भिः—तृतीयाबहुवचनं चतुर्थीबहुवचनस्य स्थाने द्रष्टव्यम्, अर्वद्भ्यः'—इति वि०।

¶ 'विप्रेभिः—विप्रेभ्यः सनिता, त्वां मुक्त्वा न कश्चिदन्यो दाता'—इति वि०।

अथ साकमुच्चदृति दृचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

३ १२ ३ १ २ ३
साकमुक्षोमर्ज्जयन्तस्वसारो

२ ३ १ २ ३ २ ३ १ २
दशधीरस्यधीतयोधनुत्रीः।

२ ३ १२ ३ १२ १२ ३
हरिःपर्यद्रवज्जाःसूर्य्यस्य

१ २ ३ २ ३ २ १ २
द्रोणन्ननक्षेअत्योनवाजी ॥ १* ॥

"साकमुक्षः" सह युगपत् सिञ्चाः [उक्ष सेचने (भ्वा०प०) क्विपि रूपम्, तादृश्यः] "स्वसारः" कर्म्म-करणार्थम् इतस्ततः सुष्ठु गच्छन्त्यः अङ्गुलयः "मर्जयन्त" सोमं शोधयन्ति [मृजू शोधनालङ्करणयोः (अदा० प०)]। तथा "दश" दश-सङ्ख्याकाः "धीतयः" [अङ्गुलि-नामैतत् (निघ०२, ५, ७)] "धीरस्य" समर्थस्य यज्ञस्य वा देवैर्ध्यातव्यस्य काम्यमानस्य वा सोमस्य "धनुत्रीः" प्रेरयित्र्यो भवन्ति। ततः "हरिः" हरितवर्णः सोमः "सूर्यस्य" "जाः" प्रादुभूता जाया दिशः ताः "पर्यद्रवत्" परितो गच्छति [सूर्यस्य तेजसा हि आविर्भवन्तीति दिशान्तस्य जायात्वम्] "अत्यः" अतनशीलः "वाजी न" अश्वइव स्थितः सोमः "द्रोणं" द्रोणकलशं "ननक्षे" व्याप्नोति [नक्षतिर्व्याप्तिकर्मा (निघं० २, १८, २)]॥ १॥

---

* ऋ० भा० ६, १, ५, ६ (२भा० ११६५०) = ऋ० वे० ७, ४, २, १।

अथ द्वितीया।

२ २ १ २ २ २ १ २
सम्मातृभिर्न शिशुर्वावशानो
२ २ १ २ १ २
वृषादधन्वे पुरुवारो अद्भिः।
२ १ १ २ १ २ १ २ १ २ १ २
मर्यो न योषामभि निष्कृतं यत्
२ २ १ १ २ १ २
सञ्छ्च्यते कलशउस्रियाभिः॥ २*॥

"वावशानः" देवान् कामयमानः "वृषा" कामानां वर्षकः अतएव "पुरुवारः" बहुभिर्वरणीयः सोमः "अद्भिः" माद्भूताभिः वसतीवरीभिः "सं दधन्वे" सन्धार्यते। तत्र दृष्टान्तः—"मातृभिर्न शिशुः" कामयमानः पुत्रो यथा मातृभिः पयःप्रदानेन सन्धार्यते [धवि गत्यर्थः (भ्वा० प०) कर्मणि लिटि रूपम्] "मर्यो न" मनुष्यो यथा "योषां" युवतिम् अभिगच्छति तद्वत्, "निष्कृतं" संस्कृतं स्वस्थानम् "अभि यन्" अभिगच्छन् "कलशे" द्रोणाभिधाने "उस्रियाभिः" अद्भिः गोविकारैः क्षीरादिभिर्वा "सञ्छ्च्यते" [गमेरकर्मकात् "समोगम्यृच्छि-भ्याम् (१, ३, २९)"—इत्यात्मने पदम्॥ २॥

---

* ऋ० वे० ७, ४, ३, २।

† 'आदित्यरश्मिभिः'—इति वि०।

अथ तृतीया ।

३ १२ २२३ २ ३ १ २ ३
उतप्रपिप्यऊधरघ्न्याया
२ ३ १ २ ३ २
इन्दुर्द्वाराभिःसचतेसुमेधाः ।
३ १ ३ २ ३ १ २ ३ २ ३ १
मूर्द्धानङ्गावःपयसाचमूषभि
२ ३ १ २ ३ २ ३ २
श्रीणन्तिवसुभिर्न्निक्तैः ॥ ३* ॥ १५

"उत" अपि च "अघ्न्यायाः" ["अघ्न्या"—इति गो नाम (निघ० २, ११, १)] अहं तथाविधायाः गोः "ऊधः" पयःस्थानं सोमः "प्रपिप्ये" ओषध्यादिषु सोमः प्रविश्य प्रकर्षेण प्याययति [प्यायतेर्लिङि "लिङाशीष्य (६, १, २८)"—इति पी-भावः] "सुमेधाः" शोभन-प्रज्ञः सोऽयम् "इन्दुः" सोमः "द्वाराभिः" "सचते" समवेति सङ्गच्छते । ततो "गावः" "चमूषु" [चमन्ति भक्षयन्त्यत्र सोममिति चम्वो ग्रहादयः, तेषु] स्थितं "मूर्द्धानं" समुच्छ्रितमिमं सोमं "पयसा" उदकेन "अभि श्रीणन्ति" अभित आच्छादयन्ति† । तत्र दृष्टान्तः—"निक्तैः" प्रक्षालितैः "वसुभिः" वस्त्रैः यथा आच्छादयन्ति तद्वत् ॥ ३ ॥ १५ ॥

---

* ऋ० वे० ७, ४, २, २ ।

† 'अभिश्रीणन्ति मिश्रयन्ति'—इति वि० ।

॥ इन्द्रवद्वासिष्ठम् ॥ औहोवाचा३ होयि । इन्द्रा ।
साकमुक्षो । मर्ज्जय । तस्तसाराः । दग्रधीरा । स्रा
३धीत । योधनुत्रीः । चरिःपर्य्या । द्रवज्जाः । स्रुरि
यस्या । द्रोणन्ननना । स्रे३अनि । यो३४३ । नाइवाप्र
जाह्५ ६यि ॥(१) सम्मातृभायिः । नग्निषुः । वाक्षा
नाः । वृषादधा । स्वे३पुरु । वारोअङ्गायिः । मर्य्यो
नयो । षाइमभि । निष्कृतंयान् । सङ्गच्छतायि । क
लशे । ज३४३ । स्त्रीइयापुभाह्५ ६यिः ॥(२) उतप्रपायि ।
प्याइजधः । अन्नियायाः । इन्दुर्द्वारा । भीइःसच ।
तेसुमेधाः । मूर्द्धानङ्गा । वाइःपय । साचमूषू । औ
होवाचा३होयि । इन्द्रा । औभिश्रीणा । नीइवसु । भा
३४३यिः । नाइनापयिक्षाह्५ ६यिः(३) ॥ ७ ॥ [१]

* ऋ० मा० ८म० १अ० ७सा० ।

॥ पार्थम् ॥ ओ३ह्वोइ३होयि। साकमुक्षो। मर्ज्जय। तस्वसाराः। दशधीरा। स्याइधीत। योधनुत्रीः। हरिःपर्य्या। द्रवज्ञाः। हरियस्या। द्रोणन्ना। न्वेइअति। योइ४३। नाइवा५जाइ५ई५यि ॥(१)

सप्तातुभायिः। नभिप्रुः। वावशानाः। वृषादधा। न्वेइपुरू। वारोअङ्गायिः। मर्य्योनयो। षाइमभि। निष्कृतंयान्। सङ्गच्छनायि। कलशे। ऊइ४३। स्त्रीइया५भाइ५ई५यिः ॥(२) उतप्रपायि। प्याइऊधः। अधियायाः। इन्दुर्द्वारा। भोइःसच। तंसुमेधाः। मूर्द्धानङ्गा। वाइःपय। साचमूषु। ओ३ह्वोइहोयि। अभिश्रीणा। तीइवृक्षु। भाइ४३यिः। नाइनाा५यियक्षाइ५ई५यिः(३) ॥ ८ ॥ [२]

---

* ऋ० म० १२१५ १७० ८१।

॥ औग्रनम् ॥ साकाम्। उक्षोमर्ज्जयन्ता। खसा

३राः। दृग्रधीरा। स्था३धीत। योधनुत्रीः। हरिः

पर्य्यद्रवज्जाःमू। रिया२३स्था। द्रोणन्नना। जे३अति।

यो३४३। ना३वा५जा६५६यि ॥(१) साम्मा। तृभिर्न

ग्रिभूर्वा। वशा३नाः। वृषादधा। न्वे३पुरु। वारो

अङ्गायिः। मर्य्यीनयोषासभिनायिः। क्रता२३यान्।

सङ्गच्छतायि। कलशे। ज३४३। स्त्री३या५भा६५६

यिः ॥(२) जता। प्रपिप्यजधरा। घिया३याः। दून्द

द्वारा। भी३ःसच। तेसुमेधाः। मूर्द्धानङ्गावःपयसा।

चमू२३षू। अभिश्रीणा। तीव्रवसु। भा३४३यिः। ना

३नाप्रयिक्ता६५६यिः(३) ॥ ४ ॥ [३] १५

---

* ऊ० मा० १८प्र० २ष० ४सा०।

अथ पिबासुतस्येति प्रगाथात्मकं तृतीयं सूक्तम्,—

तत्र प्रथमा।

११ २१ १२२ ३ १ १ २ १ २
पिबासुतस्यरसिनोमत्स्वानइन्द्रगोमतः।

३ १ २ ३१ २ ३२ १ २ ३१ १
आपिर्नोबोधिसधमाद्येवृधेऽस्माँअवन्तुतेधियः॥ १*॥

हे "इन्द्र!" "रसिनः" रसवतः "गोमतः" गोर्विकारैः पयःप्रभृतिभिः अपेत द्रव्ययुक्तस्य "नः" अस्मदीयस्य "सुतस्य" अभिषुतस्य ["क्रियाग्रहणं कर्त्तव्यम्"—इति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे (२, ३, ६२)—षष्ठी] ईदृशं सोमं "पिब", पीत्वा च "मत्स्व" तृप्तो भव। अपि च त्वं "सधमाद्ये" सह मादयितव्ये सहितैरस्माभिस्तर्पयितव्ये सोमे "आपिः" आपयिता बन्धुः सन् "नः" अस्माकं "वृधे" वर्द्धमानाय "बोधि" बुध्यस्व "ते" त्वदीया "धियः" बुद्धयः अनुग्रहात्मिकाः "अस्मान्" स्तोतॄन् "अवन्तु" रक्षन्तु॥

"सधमाद्ये"-"सधमादः"—इति पाठौ॥ १॥

अथ द्वितीया।

३ १ २ ३ २ ३ १ २ ११२ १२ ३ १ २
भूयामतेसुमतौवाजिनोवयम्माननस्तरभिमातये।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अस्माञ्चित्राभिरवताद्भिष्टिभिरानःसुम्नेषुयामय॥२†॥१६

---

* ऋ० सा० ३, ४, ५, ७ (१भा० ४८५१०)=सा० वे० ६, ७, २५, १।

† सा० वे० ७, ७, २५, २।

हे इन्द्र! "सुमतौ" शोभनायां बुद्धौ अनुग्रह-बुद्धौ "वाजिनः" हविष्मन्तो वयं "भूयाम" वर्त्तमाना भवाम "अभिमातये" अभिमन्यत इत्यभिमातिः शत्रुः * तस्मै तदर्थं "नः" अस्मान् "मा स्तः" माहिंसीः [स्तृङ् हिंसायाम् (क्रया० प०) माङि लुङि छान्दसस्सुलुक्]। अपितु "अभिष्टिभिः" अभ्येषणीयाभिः प्रार्थनीयाभिः "चित्राभिः" चायनीयाभिः बहुविधाभिर्वा त्वदीयाभिः "ऊतिभिः" "अस्मान्" "अवतात्" [अव रक्षणे (भ्वा० प०)]। तथा "नः" अस्मान् "सुक्षेषु"† सुक्षेषु "आ यामय"‡ आयतान् कुरु सर्वदा सुखिन एव कुरु ॥ २ ॥ १६

॥ अभीवर्त्तम् ॥ पिबा३मू३तस्यरसिनोवा। मात्खान द्र। द्रगोमा१ता२:। आपिर्नोवा३१२३४। धिसधमा। दियेवा१द्वा२यि। अस्माएआ१वा२। तुता३यि। धा २३४५। या२३४५:॥(१) अस्माए३आ३वन्तुतेधियोवा। आस्माएअव। तुतायिधा१या२:। भूयामता३१२३४ यि। सुमतोवा। जिनोवा१या२भ्। मानास्ता१रा२।

* 'अथवा कश्चिद्रोगः'—इति वि०।

† 'सुक्षेषु—यक्षेषु'—इति वि०।

‡ 'आप्नुयेत्यर्थः'—इति वि०।

३ २ १ ३ १ १ १ १ ५ ४ २
भिमाऽइ। ता२३४५। या२३४५यि ॥(२) मानाऽस्ताऽ

४ ५ ४ ५ १ २ १ २ १ ८
रभिमातयोवा। मानस्तर। भिमाताऽयाऽरयि। आस्मा

२ ३ ४ ५ २ १ २
ध्विचाऽ१२३४। भिरवतात्। अभायिष्टाऽयिभाऽरयिः।

८ १ २ ३ २ १ ३ १ १
आनाःढ्ऽस्नाऽरयि। घुयाऽइ। मा २ ३ ४ ३। या २ ३

१ १
४ ५(३) ॥ ८* ॥ [१]

४ ३ ८ ४ ३ ४ ५ ४ ५ ८ ३ २
॥ उत्सेधम् ॥ पिबासुतस्यरसिनः। मत्स्वा। नश्चा

३८ ४८ ५ २ १८ २
३४औढोवा। द्रगोमताऽरः। ढाऽ१उवाऽ२३। ऊऽ३४

५ ३८ ९ ४८ ५८ ४ ५ १ २ १
पा। आपाऽयिर्नोवो। औढोवाढायि। धायिसधमा।

१ ८ १ २८ २ ५ ३ २
दियेवार्द्धे। ढाऽ१उवाऽ३। ऊऽ३४पा। अस्मा

४ ५८ ४ ५ ३ २ ४
३ऽअव। औढोवाढायि। तुनाऽयिधा५याऽ६५६ः ॥(१)

४ ३८ ४ ८ ८ ५८ ८ २ ३८ ४ ५
अस्माऽअवन्तुतेधियो। स्मान्। अवा ३ ४ औढोवा।

१ १८ २ ५ ३ २८ ४
तुतेधियाऽरः। ढाऽ१उवाऽ३। ऊऽ३४पा। भूयाऽम

* ऊ० गा० ८प्र०१अ० ८खा०।

ता। औहोवाहायि। क्षमतीवा। जिनोवायम्।
ह्वा३१उवा२३। ऊ३४पा। मानाश्स्तर। औहोवाहा
यि। भिमाश्ताप्याए५६ ॥(२) मानस्तरभिमातये। मा
नः। स्तरा३४औहोवा। भिमातयाऽ२यि। ह्वा३१उवा
२३। ऊ३४पा। अस्माश्च्चित्रा। औहोवाहायि।
भायिरवतात्। अभिष्टायिभिः। ह्वा३१उवा। ऊ३४
पा। आनाश्:सुम्ने। औहोवाहायि। प्युयाश्माप्युया
ए५६। ऊ२३४५(३) ॥ १५* ॥ [२]

॥ निषेधम् ॥ पिबासुतस्याश्रसिनाः। मत्स्वानश्रा
यि। द्रगोमताऽः। इह्वाश्। आपाश्यिन्नीबो। ह्वा
ह्वो२३४ह्वा। धायिसधमा। दियेम्श्र२३ह्वायि। इह्वाश्।
आस्माश्यूआवा। ह्वाहो२३४ह्वा। तुताश्यिधापूयाए५

* ऊ० मा० १७म० १च० १५ऋा०।

२ २ २२ १ २ १ २ १
ईः। अस्माꣳअवन्तूऽतेधियाः। अस्माꣳअवा। तुतेधि
१२ १२ ४ ५ २, २ ५ १
याऽः। इड्हाऽ। भूयाऽमाताये। ढाढोऽ२३४ढा। सू
२२१ १२ १ २ १२ १ २ ४ ५
मतौवा। जिनोवाऽ२३याम्। इड्हाऽ। मानाऽस्तारा।
२, २ ५ २ २ ४ २२
ढाढोऽ२३४ढा। भिमाऽतापूयाऽ५६यि॥(२) मानस्तर
२२ २ १ २ १ २ २ १ १२
भीऽमातयायि। मानास्तरा। भिमातयाऽयि। इड्हा
२ २ ४ ५ २, ३ ५ १ २१
३। आस्माऽच्चायित्रा। ढाढोऽ२३४ढा। भायिरवतात्।
२ १ २ १२ १ २ ४५ २,
अभिष्टाऽ२यिभायिः। इड्हाऽ। आनाऽःढस्मायि। ढा
३ ५ ३२ ४ १११११
ढोऽ२३४ढा। ध्रुयाऽमाऽयाऽ५६। ढेऽ२३४५(३)॥१६*॥[३]

॥ षष्ठम् ॥ पिबाऽस्तुतस्यरसिनाः। मत्स्वानइन्द्रगो
१ २२ १ २ २ २ १
मताऽ२चोदूया। आपिन्नोबोधिसधमाद्येवृधा २ ३ चोद
२ १२ २ १ २,
या। अस्माꣳआऽ२३स्। तुतायिधाऽ२३या ३ ४ ३ः॥(१)
५ ४ १ २ ४ २ ५ १ २ २ १
अस्माऽꣳअवन्तुतेधियाः। अस्माꣳअवन्तुतेधियाऽ२ ३ चो

---

* ऋ० गा० १३प्र० १अ० १८चा०।

इया। भूयामतेसुमतौवाजिनोवया२३ए३ह्वोइया। मा
नस्ता२३रा। भिमाता२३या३४३यि ॥(२) माना३स्तर
भिमातयायि। मानस्तरभिमातया२३यिहोइया। अस्मा
श्चित्राभिरवतादभिष्टिभा२३यिहोइया। आनःसू२३स्मा
यि। घुयामा२३या३४३। ओ२३४५ई। डा(३) ॥१२*॥[४]

॥ जमदग्नेःसाम ॥ पिबासुतस्यरसिनोमत्स्वाहाउ।
ना२:। इन्द्रा२गोमता२३:। हाउ। आपिन्वा२वो।
धिसाधमा२। दियेवृधा२३। हाउ। अस्माए३अवा
२३। हा। तुते३हो२। या२३४औहोवा। धियऊ
२३४५ ॥(१) अस्माए३अवन्तुतेधियोस्माहाउ। आ२।
वन्तू२तेधिया२३:। हाउ। भयामा२ते। सुमतौवा
२। जिनोवया२३म्। हाउ। मानास्तरा२३। हा।

* क० मा० १९म० २ख० १२सा०।

२ १ १ २ ३ २ २ २ १ १ १ १
भिमा३हो२। या२३४ओ३होवा। तयऊ २ ३ ४ ५ ॥(२)

२ २ २ २ २ १ १ १ २
मानस्तरभिमातयेमानोहाउ। स्ता२:। अभा२यिमा

२ १ २ २ १ ०
तया२३यि। हाउ। अस्माच्चा२यित्रा। भिरावता२

१ २ २ १ ०
त्। अभिष्टिभा२३यिः। हाउ। आनाःसुम्ना २ ३ यि।

१ २ २ १ २ ३ २ २ १ २
हा। षुया ३ हो २। या २ ३ ४ ओ३होवा। मयऊ

१ १ १ १
२ ३ ४ ५(३) ॥ १६* ॥ [५] १६

अथ त्रिरस्मैसप्तेति ऋचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ ३ १ २
त्रिरस्मैसप्तधेनवोदुदुह्रिरे

३ २ ३ १ २ ३ १ १
सत्यामाशिरमरमेव्योमनि।

३ २ ३ १२ २२ ३ २ ३
चत्वार्यन्याभुवनानिनिर्णिजे

१ २ ३ १ ३ १२ २२
चारुणिचक्रेयहतैरवर्हत ॥ १† ॥

---

* ऋ० मा० १८प्र० २अ० १६खं०।

† ऋ० वो० ६, १, २, ७ (२मा० १८८६०) = ऋ० वे० ७, २, २३, १।

"परमे व्योमनि" विविधमोममवनं गमनं देवानामत्रेति व्योमा यज्ञः, तस्मिन् स्थिताय यद्वा परमे व्योमनि अन्तरिक्षे वर्त्तमानाय "त्रिः सप्त" एकविंशति-सङ्ख्याकाः "धेनवः" प्रीणयित्रो गावः "सत्यां" सत्यं यथार्थभूतम् "आशिरम्" आश्रयमाणं "दुदुक्षिरे" दुहन्ति [यद्वा, त्रिःसप्त द्वादश मासाः पञ्चर्त्तवः अय इमे लोका असावादित्य एकविंश इति, एतैः सर्वैः सह गोषु उत्पद्यते तद्भावो दुहन्तीति]। किञ्चायं सोमः "अन्या" अन्यानि "चत्वारि" "भुवनानि" उदकानि वसतीवरीस्त्रिस्त्रैकधना इति, तानि चतुःसङ्ख्याकानि "चारूणि" कल्याणानि उदकानि "निर्णिजे" निर्णेजनाय परिशोधनाय "चक्रे" करोति। "यद्" यदा अयम् "ऋतैः" यज्ञैरेव "वर्द्धितः" वर्द्धितवान् तदा करोति॥

"दुदुक्षिरे," "परमेव्योमनि"-"दुदुक्षे," "पूर्वेव्योमनि"—इति पाठो॥ १॥

अथ द्वितीया।

१२ २२ ३ १ १ ३ १ २
सभक्तमाणोअमृतस्यचारुण

१२३ ३ १ १ ३ १२
उभेद्यावाकाव्येनाविशश्रथे।

१ १ ३ २ ३ १३ १२ ३
तेजिष्ठाअपोमएनापरिव्यत

१ २ १ २ ३ १ २ ३ १ २ ३ २२
यदीदेवस्यश्रवसासदोविदुः॥ २*॥

---

* ऋ० वे० ७, १, १३, १।

"सः" "भक्षमाणः" "चारुणः" कल्याणस्य "अमृतस्य" उदकस्य ["क्रियाग्रहणमिति कर्मणः सम्प्रदान-संज्ञा, "चतुर्थ्यर्थे बहुलम् (२, ३, ६२)"—इति षष्ठी] चारूदकं भक्षमाणः [इकारलोपश्छान्दसः (३, ४, ९७)] भिक्षमाणः यष्टृभिः याच्यमानः सन् "उभे" "द्यावा" [द्यावादेशस्य हन्द्वे विहितत्वात् उत्तरपदाभावेऽपि हन्द्वः प्रतीयते] उभे द्यावापृथिव्यौ "काव्येन" कवि-कर्मणा "वि अख्यत्"* विहृतकारातिशयेन निमित्तेन प्रज्ञेनोदकेन सम्पूरयतीत्यर्थः। किञ्च "तेजिष्ठाः" अतिशयेन दीप्तानि "अपः" उदकानि "महना" महत्त्वेन "परि व्यत" तदा परित आच्छादयति। "यदि" यदा ऋत्विजः "देवस्य" द्योतमानस्य सोमस्य "सदः" स्थानं "अवसा"† हविषा युक्ताः सन्तः "विदुः" यागार्थं जानन्ति लभन्ते तदा आहृणीतीति। [विद ज्ञाने (अदा० प०) "सिजभ्यस्त (३, ४, १०९)"—इति झेर्जुसादेशः॥

"भक्षमाणः"-"भिक्षमाणः"—इति पाठौ॥ २॥

अथ तृतीया।

१२ ३१२ २२३१
तेअस्यसन्तुकेतवोमृत्यवो
२ ३१२३१२ २२
दाभ्यासोजनुषीउभेअनु।

---

* 'विअख्यत्—विविधं अधिलोकयति'—इति वि०।

† 'अवसा—अन्नेन बलेन वा'—इति वि०।

१ १ १ १ २ १ २ २ ३ १
येभिर्मण्वाचदेव्याचपुनत

२ २ २ १ १
आदिद्राजानंमननाअगृभ्णत ॥ ३* ॥ १७

"अस्य" एतादृशस्य सोमस्य "केतवः" प्रज्ञापकाः सर्वैर्ज्ञातव्या रश्मयः। कीदृशाः? "अमृत्यवः" मरण-धर्म-रहिताः अतएव "अदाभ्यासः" ["दभेरिति वक्तव्यम् (७, ३, ६८ वा०)"—इति ण्यत्] परैरहिंस्यास्त्वेतादृशा अस्य रश्मयः "उभे" "जनुषी" जन्मना स्थावर-जङ्गमात्मके हे "अनु" लक्षीकृत्य "सन्तु" रचन्तु [ओषधीनामग्रे सोमो रेतो निषिञ्चति यज्ञः मनुष्याणाञ्च धाराः स्रवति खलु] सोऽयं "येभिः" यैः केतुभिः "नृम्णा" नृम्णानि बलानि "देव्या" देवार्हाणि चान्नानि "पुनते" प्रेरयति। "आदित्" अभिषवानन्तरमेव "राजानं" सोमं "मननाः" मननीयाः स्तुतयः "अगृभ्णत" परिगृह्णन्ति प्राप्नुवन्तीत्यर्थः "द्रुघ्वः"—इति छान्दसो भकारः ॥ ३ ॥१७

१ ५२ ४५२ ४५२ २
॥ मारुतम् ॥ चा२ ३ ४यिः। अस्मैसप्रथेनवोदुवो।

४ ५ २ १२ २ २ २ १
ओष्ठायिरायि। सत्यामाशिरम्पूरम्भयि। वियोमानी२।

---

* ऋ० वे० ७, १, २३, ३।

† 'आत्'-'इत्'—इति पदपूरणौ—इति वि०।

१२ २ २ १ २ ३
चत्वार्य्यन्याभुवना। निनिर्णायिजा२३यि। चारुणा२३

५ १२१ २२ ५ २ ४ १
४यिवा। क्रेयहतैः। आवाऽर्द्धा५ताई५६ ॥(१) सा२३

५ २ २ ४ ५ २ ४ ५ १ २ २ २
४ः। भक्षमाणोऽमृतस्यचौ। चारुणाः। उभेद्यावाका

२ २ २ २ २
व्येना। विश्रयाथा२यि। तेजिष्ठाऽपोमꣳहना। परि

२ ३ ५ २ १ २२ १ २
व्याता२३। यादोदा२३४यिवा। स्रुअवसा। सादो३

४ १ ५ २ ४ ५ २ २
वापृयिदू६५६ः ॥(२) ते२३४। अस्यसन्तु केतवोऽमौ।

४ ५ १ २ २ २ २ २ १ १२
होर्त्यावाः। अदाभ्यासोजनुषो। उभेआनू२। येभि

२ २ २ १ २ ३ ५
र्नृम्णाचदेव्या। चपुनादा२३यि। आदिद्रा २ ३ ४जा।

११ १२ १ २ ४
नम्मनाः। आगाऽर्म्णा५ताई५६(३) ॥ १२* ॥ [१] १७

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य द्वादशस्याध्यायस्य

मः खण्डः ॥ ५ ॥

---

* ऋ० गा६ प्र० ९ ऋ० १२ सा०।

अथ षष्ठे खण्डे—

अभिवायुमिति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

३ २ ३ २ ३क २र ३ २
अभिवायुंवीत्यर्षागृणानो
२ ३ १र १र ३ १ २
ऽ३ऽभिमित्रावरुणापूयमानः ।
३ १र २र ३ १ २ ३ २
अभीनरन्धीजवनꣳरथेष्ठा
३ १ ३ १ २ ३ १ १
मभीन्द्रंवृषणंवज्रबाहुम् ॥ १* ॥

हे सोम ! "गृणानः" स्तूयमानस्त्वं "मित्रावरुणा" मित्रावरुणौ च पानाय "अभि" गच्छ । किञ्च "नरं" सर्वस्य नेतारं, "धीजवनं" बुद्ध्या समं वेगं कुर्वाणं,† "रथेष्ठां" रथे तिष्ठन्तम् [अनेनाश्विनावभिधीयते ; एकवचनन्तु प्रत्येक-विवक्षया समुदाय-विवक्षया वा ; एतादृशावश्विनौ चाभिगच्छ]। तथा "वृषणं" कामानां वर्षकं "वज्रबाहुं" वज्र-युक्त-हस्तम् "इन्द्रं" च त्वं पानाय "अभि" गच्छ ॥ १ ॥

---

* ऋ० वे० ७, ४, २०, ४।

† 'धीजवनं—धीर्बुद्धिः तया जवनं वेगवन्तम् अथवा मनोजवैरश्वैः गन्तारम्' —इति वि०।

अथ द्वितीया।

२१ २र २१ २ २ २३२ २ १२ ३१२
अभिवस्वास्वसनान्यर्षाभिधेनूःसुदुघाःपूयमानः।
३ २ ३ १र २र ३ १२३ १ २ ३१२
अभिचन्द्राभर्त्तवेनोहिरण्याभ्यश्वाञ्अथिनोदेवसोम ॥ २* ॥

हे "सोम!" अस्माकं "सुवसनानि" सुपरिधानानि "अभि" गमय [यद्वा, सुवसनानि शोभन-वस्त्र-सहितानि "वस्वा" वस्त्राण्याच्छादकानि धनानि "अभि" गमय। किञ्च "पूयमानः" पवित्रेण त्वं "सुदुघाः" सुष्ठु पयसो दोग्ध्रीः "धेनूः" नवप्रसूतिका गाः "अभि" प्रापय। अपिच "चन्द्राणि" आह्लादकानि† "हिरण्यानि" "भर्त्तवे" भरणाय पोषणाय "नः" अस्माकम्‡ "अभि" गमय। तथा हे "देव" स्तोतव्य! हे "सोम!" "रथिनः" रथवतः अश्वान् अस्माकम् "अभि" प्रापय ॥ २ ॥

अथ तृतीया।

३ १ २ ३ १र २र ३ २उ ३ १ २ ३१२
अभीनोअर्षदिव्यावसून्यभिविश्वापार्थिवापूयमानः।
३ २उ ३१ २ ३१२३क २र ३१२ ३१२
अभियेनद्रविणमश्नवामाभ्यार्षेयज्ञमदाभ्यवस्रः ॥ ३¶ ॥१८

हे सोम! पवित्रेण "पूयमानः" त्वं "दिव्या" दिव्यानि

---

* ऋ० वे० ७, ४, १०, ५।

† 'चन्द्राणि—कान्तानि'—इति वि०।

‡ 'नः—अस्मभ्यम्'—इति वि०।

¶ ऋ० वे० ७-४, २१; १।

दिवि भवानि "वसूनि" धनानि "नः" अस्माकम् "अभ्यर्ष" अभिगमय तथा "पार्थिवा" पार्थिवानि पृथिव्यां भवानि "विश्वा" विश्वानि सर्वाणि धनान्यभिगमय। तथा "येन" त्वदीयेन सामर्थ्येन "द्रविणं" धनं "वयम्" "अश्ववाम" अभि व्याप्नुयाम तत् सामर्थ्यम् "अभि" गमय। किञ्च "आर्षेयम्" ऋषीणामृषिपुत्राणां योग्यं धनं "जमदग्निवत्" जमदग्नेर्यथा त्वं प्रापय एवं "नः" अस्माकमपि अभ्यर्ष [यद्वा, आर्षेयम्, ऋषीणां योग्यं मन्त्रं जमदग्नेः स्वभूतं मन्त्रं यथा स्वादुतमम् अकार्षीः एनमस्माकं तादृशं मन्त्रं स्वादुतमं कुर्विति मन्त्रद्रष्टा स्तोता कुत्सो नाम ऋषिः प्रार्थयते] ॥ ३ ॥ १८

॥ पार्थम् ॥ ओ३ह्वो३ह्वोयि। अभिवायूम्। वी३ १ २ २ १२ १
निप। पायृणानाः। अभिमित्रा। वरुणा। पूयमानाः। १ २ ३ ४ ५ २ १ २१२ १२३ ५
अभीनराम्। धी३जव। नरथेष्ठाम्। अभिइन्द्राम्। २२ १ ३ १ २ ३४५ २१
वृषणम्। वा ३ ४ ३। आ३वा५ङ्ग ६५६म्॥(१) २१ २ ४ २ ४
अभिवस्वा। सुवस। नानियर्षा। अभिधेनूः। स्वदु २१ २ ३ ४ ५ २ १२ २१
घाः। पूयमानाः। अजिचन्द्रा। भर्त्तवम्। नोधिर २ १ ० २१२ २ ३४
ण्या। अभियन्वान्। रथिनः। दा३४३यि। वा३सो ५ २ १ २१ २ ४

२ २ १२ २ १ २ ३ ४ ५
पुमा६पुं॥(२) अभीनोआ। पाऽदिवि। यावद्धनो।
२ १ २ १ २ १ ३ ४ ५ २ १२
अभिविश्वा। पाऽर्थिवा। पूयमानाः। अभियेना।
२ १ २ ३ ४ ५ २ २ २ १२
द्रविणम्। अश्नवामा। औऽहोऽहोयि। अभियर्षं।
२ १ २ २ ४
या ३ जमत्। आ ३ ४ ३। ग्रा ३ यिवा ५ न्ना ६ ५ ६ः
(३)॥ १४*॥ [१] १८

अथ† यज्जायथाइति ऽचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ १२ ३ १ २ ३ १ २
यज्जायथाअपूर्व्यमघवन्वृत्रहत्याय।
१ २ ३ १ २ ३ १ २ ३ १२ २२
तत्पृथिवीमप्रथयस्तदस्तभ्नाउतोदिवम्॥ १‡॥

हे "अपूर्व्य"¶ त्वत्तो व्यतिरिक्तेन पूर्वेण वर्जित! हे "मघवन्" मंहनीय-धनवन्! "इन्द्र!" "वृत्रहत्याय" वृत्रहननाय§ "यद्" यदा त्वं "जायथाः" उत्पन्नः प्रादुर्भूतोऽसि "तत्" तदानीमेव

---

* ऊ० गा० ८प्र० २अ० १४सा०।

† 'उक्तोऽभिप्रवः। उक्तः इष्टुः। उक्तोऽभिजित्। इदानीं स्वरसामानः'—इति वि०।

‡ ऋ० वे० ६, ६, ११, ५।

¶ 'अपूर्वगुण!'—इति वि०।

§ 'वृत्रहन्—इन्द्रोऽभिधीयते, तस्मै वृत्रहत्याय वृत्रिवर्धाय इति वाक्यशेषः'—इति वि०।

"पृथिवीं" प्रथमानां भूमिम् "अप्रथयः" प्रथितां दृष्टामकरोः। "उत" अपि च "तत्" तदानीमेव "दिवं" द्युलोकम् अन्तरिक्षेण "अस्तभ्नाः" निरुद्धामकार्षीः [एतादृशं वीर्यं त्वदन्यस्य न सम्भवतीत्यर्थं द्योतयति अपूर्व्येति पदम्] ॥

"उतोदिवम्"-"उतद्याम्"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ २ १ १८ २ २
तत्तेयज्ञोअजायततदर्कउतहस्कृतिः।
१ २ २ १ २ ३ २ ३ १७ ३ १ २
तद्विश्वमभिभूरसियज्जातंयच्चजन्त्वम् ॥ २* ॥

हे इन्द्र! "यद्" यदा त्वम् अजायथाः तदानीं "ते" त्वदर्थं "यज्ञः" अग्निष्टोमादिः "अजायत" सोम-पानार्थमभूत्। "उत" अपिच "तद्" तदानीं "हस्कृतिः" [हस हसने (भ्वा०प०) हासकारी प्रीत्यर्थं क्रियमाणो हर्ष-सूचको द्वितीय-मन्त्रोऽपि अजायत। किञ्च तदा "यद्" "जातं" भूतजातं "यच्च" "जन्त्वम्" [क्त्वार्थे त्व-प्रत्ययः] जनितव्यं विश्वमस्ति "तत्" "विश्व" सर्व्वम् "अभिभूः असि" स्व-महिम्ना अभिभूतवानसि ॥ २ ॥

अथ तृतीया।

१ १ २ १ १ २ २ ३ १ २ २ ३ २
आमासुपक्वमैरयाशयन्यं एरोचयोदिवि।
३ १ २ २ ३ २ ३ २ ३ १ २ ३ २
घर्मन्नसामन्तपतासुवृक्तिभिर्जुष्टङ्विर्णसेवृषत् ॥ ३ †॥१९

---

* ऋ० वे० ६, ६, १२, ६। † ऋ० वे० ६, ६, १२, २।

हे इन्द्र! "आमासु" अपक्वासु गोषु "पक्वं" पयः "ऐरयः" प्रेरय [तथा च मन्त्रः—"आमासुचिद्दधिषे पक्वमन्तः" इति। किञ्च, "दिवि" द्युलोके "सूर्य्यम्" "आरोहयश्च" [पूर्वं पणयो-नामासुरा अङ्गिरसां गा अपहृत्यान्धकाराहते कस्मिंश्चित् पर्वते स्थापितवन्तः, ततोऽङ्गिरसः इन्द्रं स्तुत्वा गाः पुनरस्मभ्य-माहरेति तैरुक्तम् इन्द्रो गवां स्थानं तमसाहतं दृष्ट्वा तत्र गो-प्रदर्शनाय द्युलोके सर्वप्रकाशकं सूर्य्यमारोहितवान्] स्थापित वानसि ["चादि-लोपे विभाषा (८, १, ६२)"—इति पूर्वस्य ऐरयध्वस्य न निघातः। अथ परोक्षतोऽर्च्चः—] हे स्तोतारः! "सुष्टुतिभिः" शोभनाभिः स्तुतिभिः "न तपत" इन्द्रं तीक्ष्णीकुरुत [इन्द्रं स्तुतिभिः यथा तपन्ति तद्वत्]। ततः "गिर्वणसे" गोभिर्वननीयायेन्द्राय "जुष्टं" प्रीतिकरं पर्याप्तं वा "बृहत्" महत् बृहदाख्यं वा "साम" गायत ॥३॥१९

अथ मत्स्यपायीति ऋचात्मकं ऋतीयं सूक्तम्,

तत्र प्रथमा।

१८ २८ ३ २ ३ १ २ ३ १८ २८

मत्स्यपायितेमदःपात्रस्येवहरिवोमत्सरोमदः।

१ २ १ २ ३ १ २ ३ १ २ १ २ १ २

वृषातेवृष्णइन्दुर्वाजीसहस्रसातमः॥ १*॥

हे "हरिवः" हरिभ्यां तद्वन्निन्द्र! "मदः" महान् पूज्यो-ऽयं सोमः "पात्रस्येव" पात्रेणेव सोमपात्रेण यथा धार्यते सोमः,

* ऋ० वे० २, ४, १८, १।

तत्सदृशेन त्वया [द्वितीयार्थे षष्ठी (३, १, ८५)। यद्वा, 'पात्रस्य' 'ते' तव स्वभूतः 'मदः' महान् सोमइति वा योजना] "अपायि" पीतः [आशंसाया विवक्षितार्थत्वात् भूतेऽर्थे प्रयोगः] यतः पिब अतो "मत्सि" माद्यसि मादयस्व वा। "मत्सरः" मद-साधनः, "मदः" तर्पयिता; "वृषा" वर्षिता, "द्रुन्दुः" क्लेदयिता आह्लाद-कारीत्यर्थः, "वाजी" अन्नवान् अन्नकार्य्य-हविः-सद्भावात् अन्नवानित्युच्यते, "सहस्रसातमः" अपरिमित-दातृतमः सहस्र-पुरुष-सम्भजन-पर्यन्त-प्रशस्यतिशयो वा एवं महानुभावः सोमः सम्पादितस्त्वं पिबेत्यर्थः ॥ १ ॥

अथ द्वितीया।

१ २ ३ २उ ३ २ ३ १ २
आनस्तेगन्तुमत्सरोवृषामदोवरेण्यः।

३ १ १ ३ १ १ ३ १ २ ३ २
सहावाँइन्द्रसानसिःपृतनाषाडमर्त्यः ॥ २* ॥

हे इन्द्र! "ते" त्वां "मत्सरः" मर्षण-साधनः सोमः "आगन्तु" आगच्छन्तु। कीदृशोऽयम्? "वृषा" वर्षकः "मदः" तर्पयिता, "वरेण्यः" वरणीयः, "सहावान्" सहायवान् अस्मद्दत्तेन सोमेन सहायवान् सन् "सानसिः" अस्माभिः सम्भजनीयः, "पृतनाषाट्" शत्रुसेनायाः अभिभविता अमर्त्यश्च भवेति ॥ २ ॥

---

* ऋ० वे० ९, ४, १८, १।

अथ तृतीया ।

१उ २ १ २ २ २ १ २ २ १ २
त्वꣳहि शूरः सनिताचोदयोमनुषोरथम् ।

२ २ २ १ २ २ उ २ २ २ २ १ २
सहावान्दस्युमव्रतमोषःपात्रन्नशोचिषा ॥ १* ॥ २०

हे इन्द्र ! "त्वं" "हि" खलु "शूरः" शौर्यैर्पेतः "सनिता" दातासि । अतः "मनुषः" मनुष्यस्य मे "रथं" रंहणं स्यन्दनं मनोरथं वा स्वर्ग-गमन-साधनं यज्ञार्थं रथं वा "चोदयः" प्रेरय । किञ्च त्वं "सहावान्" भूत्वा "दस्युम्" उपक्षयितारम् "अव्रतम्" अकर्म्माणम् अननुष्ठायिनम् "ओषः" † दह । किमिव ? "शोचिषा" दीप्त्या ज्वालया अग्निः "पात्रन्न" स्वाधारं पात्र-विशेषमिव यागाधिकारी सन् यो न यजते, तं देहीत्यर्थः ॥ ३ ॥ २०

५ २ ४ ५ ४ र ५ २ १ २ १
॥ कालेयम् ॥ मत्सियाउपायितमन्द्राः । पात्रास्येवा ।

२ ३ २ १ २ २ १ २ १ २ २ २
हरिवोमा२३ । त्वरोमदाइः । वा२३४ । पातेवृत्रे ।

२ २ १ २ ३ २ २ ५ ४
आइयिन्दूः । वाजायिसहौ । वा३४३ओ३४वा । सखा

४ २ २ ४ ५ ४ ५ २ १ २ १ २
ऽतमाः ॥(१) आनस्तेइयन्तुमत्सराः । वृषामदो । वरे

---

* ऋ० वे० २, ४, १८, १ ।

† 'ओषः पात्रं न—दीप्तेः पात्रं न'—इति वि० ।

२ १ २ १ ५ २ २
णियार३ः। सचा३। वाए२३४। इन्द्रसा। नाइसा

१ ३ २ २ ५ ४
यिः। पूतनाषा। वा३४३ओ३४वा। अमाऽऽत्तियाः॥(२)

५ २ ४ ५ ५ १ २ १ १ २ १ २ ३ २ १
तुवएहोइशूरःसनिता। चोदायोमा। नुषोरथा२३म्।

२ १ ५ २ २ १
सचा३। वा२३४न्। दस्युम। आ३ताम्। ओषाः।

३ २ २ २ ५ ४ ४
पाचौ। वा३४३ओ३४वा। नशोऽचिषा। चोऽई॥

डा(३)॥ १६*॥ [१] २०

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य द्वादशस्याध्यायस्य षष्ठ खण्डः॥ ६॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ १२॥

॥ इति षष्ठस्य द्वितीयोऽर्द्धप्रपाठकः॥ *

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण विरचिते माधवीये ग्रामदेशार्थ-प्रकाशे उत्तरायन्ये द्वादशोऽध्यायः॥ १२॥

---

* क० गा० २१प्र० १च० १६सा०।

† 'षष्ठस्य प्रपाठकस्य द्वितीयोऽध्यायः समाप्तः'—इति वि०।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ ११ ॥

॥ अथ त्रयोदशोऽध्याय आरभ्यते ॥

तत्र,

प्रथमे खण्डे—

पवस्वदृष्टिमिति पञ्चर्चं प्रथमं सूक्तम्,

तत्र प्रथमा ।

१२ ३२७ १ २ ३ २ ३ १२ २२
पवस्वदृष्टिमासुनोपामूर्मिन्दिवस्परि ।
३ १ २ ३ १२ २२
अयक्ष्माबृहतीरिषः ॥ १* ॥

हे सोम ! त्वं "दिवः" द्युलोकात् "दृष्टिं" वर्षं "नः" अस्माकं "सु" सुष्ठु "आ पवस्व" समन्तात् क्षर† । एतदेव दर्शयति—"अपाम्" उदकानाम् "ऊर्मिं" तरङ्गं दिवः "परि" आपवस्व । अपिच "अयक्ष्माः" यक्ष्म-रहितानि अनामयानि "बृहतीः" महान्ति "इषः" अन्नानि आपवस्व ॥ १ ॥

---

* ऋ० वे० ७, १; ६, १ ।

† विवरण-मते तु 'आसु'—इत्येकं पदम् अतएव 'आसु सोमधाराषु'—इति व्याख्यातम् ।

अथ द्वितीया।

१२ ७०१ २३२ ३ १ २१।२ २२
तयापवस्वधारयाययागावइहागमन्।

१२ २१२ ३ २
जन्यासउपनोगृहम् ॥ २* ॥

हे सोम! त्वं "तया" तादृश्या "धारया" "पवस्व" क्षर। कीदृश्येत्यत्राह—"यया" यादृश्या त्वदीयया धारया "जन्यासः" जन्याः शत्रु-जनपद-भवाः† "गावः" "इह" अस्मिंल्लोके "नः" अस्माकं सम्बन्धि "गृहम्" "उप आ गमन्" उपागच्छन्ति ॥ २ ॥

अथ तृतीया।

३१२ ३१२ ३१२ ३१२
घृतम्पवस्वधारयायज्ञेषुदेववीतमः।

३१ २ ३ १२ १२
अस्मभ्यंवृष्टिमापव ॥ ३‡ ॥

हे सोम! "यज्ञेषु" "देववीतमः" अतिशयेन देवकामः त्वम् "अस्मभ्यं" स्तोतृभ्यः "घृतम्" उदकं "धारया" "पवस्व" क्षर; "वृष्टिं" वर्षञ्च "आ पव" ॥ ३ ॥

---

* ऋ० वे० ७, १, ६, २।
† 'जन्याः—जनसम्बिताः'—इति वि०।
‡ ऋ० वे० ७, १, ६, ३।

अथ चतुर्थी।

१ १ १ २ १ १ २ १ १ २ १ २
सनजर्ज्जेन्याऽऽव्यय*म्पवित्रधावधारया।

२ १ २ २ २ १ २
देवासःशृणवन्हिकम्॥ ४†॥

हे सोम! "सुतः" अभिषुतस्त्वं "नः" अस्माकम् "ऊर्जे" अन्नाय "अव्ययम्" अविनश्वरं‡ "पवित्र" धारया सम्मृते "वि धाव" प्रापुहि "देवासः" देवा अपि¶ "हि कं शृणवन्" गमन-वेलाया-मुत्पन्नं त्वदीयं शब्दं शृणवन्तु॥ ४॥

अथ पञ्चमी।

१ १ २ १ २ १ १ २
पवमानोअसिष्यदद्रक्षाण्स्यपजङ्घनत्।

२ २ २ २ १ २
प्रह्लवद्रोचयन्नुचः॥ ५§॥१

"रक्षांसि" राक्षसाः "अप जङ्घनत्" "रुचः" आत्मीया दीप्तीः "प्रह्लवत्" पुराणवत् "रोचयन्" दीपयन् "पवमानः" सोमः "असिष्यदत्" स्यन्दते॥ ५॥१

---

* "अव्ययं"—इति ऋ०-पाठः।

† ऋ० वे० ७, १, ६, ४।

‡ 'अथवा वि अन्तरिक्षात् अव्ययं पवित्रं धाव'—इति वि०।

¶ 'देवासः शृणवन् हि कम्—एतच्छृणन् हे देवाः! कं प्रजापतिरूपं सोमम् अथवा कं पानीयं सोमं—इति वि०।

§ ऋ० वे० ७, १, ६, ५।

अथ प्रत्यस्मा इति चतुर्ऋचं द्वितीयं सूक्तम्,

तत्र प्रथमा ।

१ २ ३ १ २ ३ १ २ . ३ १ २
प्रत्यस्मैपिपीषतेविश्वानिविदुषेभर ।

२ २ ३ १ ३ १ २ ३ १ २
अरङ्गमायजग्मयेपथ्यादघुनेनरः ॥ १* ॥

हे अध्वर्यो ! "नरः" नेता यज्ञानां त्वम् "अस्मै" इन्द्राय "प्रति भर" अभिभर सोमं प्रयच्छेत्यर्थः । कीदृशायेन्द्राय ?"पिपीषते" पातुमिच्छते "विश्वानि" सर्वाणि वेद्यानि "विदुषे" जानते "अरङ्गमाय" पर्य्याप्त-गमनाय "जग्मये" यज्ञेषु गमन-शीलाय "अपथ्यादघुने" [दधिर्गतिकर्म्मा निघ०२,१४,६२)] अपथ्यात्-मनाय सर्वेषामयंगामिने ॥

"नरः"-"नरे"—इति पाठो ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १ २ ३ १ २
एमेनमवृत्रतनसोमेभिःसोमपातमम् ।

१ २ ३ १ २. १ २ ३ १ २ ३ १ २
अमत्रेभिर्मदेजोषिणमिन्द्रंसुतेभिरिन्दुभिः ॥ २† ॥

हे अध्वर्यवः ! "सोमेभिः" सोमैः करणभूतैः "सोमपातमं" अतिशयेन सोमस्य पातारम् "एनम्" इन्द्रम् "आ" अभिमुखं

---

* ऋ० प्रा० ४, २, २, १ (१भा० ७१८ व०) = ऋ० वे० ४, ७, १४, १ ।
† ऋ० वे० ४, ७, १४, २ ।

"प्रत्येत" प्रतिगच्छत ["ईम्"—इति निपातोऽनर्थकः]। कीदृशमिन्द्रम् ? "अमत्रेभिः" अमत्रैः सोमपात्रैः ग्रह-चमसादिभिः "ऋजीषिणम्" ऋजीषं शत्रूणामुपार्जकं बलं, तद्वन्तं, [यद्वा, ऋजीषिणमित्युत्तरत्र सम्बन्धनीयं, 'सुतेभिः' अभिषुतैः 'इन्दुभिः' सोमैः, 'ऋजीषिणं' गतसारः सोमः ऋजीषः तद्वन्तम्। अथवा अमत्रैः अपरिमितैरभिषुतैः सोमैः ऋजीषिणम्। ऋजेर्गत्यर्थाद्दोणादि-साधन ऋजीष-शब्दः, ततो मत्वर्थीयइति सङ्गतमित्यर्थः। एवंविधमिन्द्रं प्रति गच्छतेत्यन्वयः। अन्य आह—अमत्रेभिः ग्रहचमसादिभिः गतैः सोमैः ऋजीषिणं बलवन्तमिन्द्रं प्रति गच्छतेति] ॥ २ ॥

अथ तृतीया ।

१२ ३२ ३४ २ ३ १ २ ३ १२
यदीसुतेभिरिन्दुभिःसोमेभिःप्रतिभूषथ ।
२३ १२३ १ २ १२३ ३ १र २र
वेदाविश्वस्यमेधिरोधृषत्तन्तमिद्दधते ॥ ३* ॥

हे अध्वर्यवः ! "सुतेभिः" अभिषुतैः "इन्दुभिः" उन्दनशीलैर्दीप्तैर्वा "सोमेभिः" सोमैः "यदि प्रतिभूषथ" इन्द्रं प्रति यदि यूयं गच्छथ [भू प्राप्तौ (भ्वा० उ०)—इत्यस्यैतद्रूपं] तदानीं "मेधिरः" मेधावी† [मेधो यज्ञः (निघ०३,१७,४) तद्वान् वा] स इन्द्रः "विश्वस्य" विश्वं सर्वं भवदीयं कामं "वेद" वेत्ति जानाति ज्ञात्वा च "धृषत्" शत्रूणां धर्षकः सन् "तमित्" तं तं काममेव "एषते" प्रापयति ॥ ३ ॥

---

* ऋ० वे० ४, ३७,१४, ३ ।
† 'मेधिरः—मेधसः मेधादेः, धृषत् धारणार्थम्'—इति वि० ।

अथ चतुर्थी।

३ १ २३,२७ ३ १ २१ १२ ३ २
अस्माअस्माइदन्धसोध्वर्योप्रभरासुतम्।

३ १२ ३१ २ ३१२१ १२ ३१२
कुवित्समस्यजेन्यस्यशर्धतोभिशस्तेरवस्वरत्* ॥ ४†॥२

"अस्माअस्माइत्" अस्माएवेन्द्राग नान्यस्मै, हे अध्वर्यो! त्वम् "अन्धसः" सोम लक्षणस्यान्नस्य "सुतम्" अभिषुतं रसं "प्र भर" प्रहर प्रयच्छेति यावत्। सचेन्द्रः "समस्य" सर्वस्य जेतव्यस्य "शर्धतः" उत्सहमानस्य शत्रोः "अभिशस्तेः अभिशंसनात् तत्-कृतात् हिंसनात् "कुवित्"‡ बहुशः "अवस्वरत्" अस्मान् पालय-त्वित्यर्थः॥

"अवस्वरत्"-"अवस्वरद्"—इति पाठो॥ ४॥ २

३ ४५२ ४५२ ३२ १
॥ नानदम्॥ प्रत्यस्मैपिपो। षताइयि। वा२३४यि।

२५ २ ४५ ४ ३२४५ १ ५
श्वानिविदुषे। भारा। अरङ्गमायज। ग्मयो२३४द्वायि।

१२१२. १ ५ ४ ५ ३२१२५
आपश्चादा। घृनो२३४वा। नापूरोईहायि॥(१) एमन

४५२ २२ १ २५२ २ ४५
म्प्रत्ये। तनाइ। सो२३४। मेभिःसोमपा। तासाम्।

---

* "अवस्वरत्"—इति ऋ०-पाठः।

† ऋ० वे० ४, ७, १४, ४।

‡ 'कुवित्'—कु-शब्देन बहुत्वमभिधीयते, तस्मा वित्'—इति वि०।

३४३२४५ २ ३ ५ ४ २ ३ ४ ५२
अमत्रेभिष्टूजी। विणो२३४हायि। अमत्रेभिष्टूजी।

३ ५ १ २ १२ १ ४
विणो२३४हायि। आयिन्द्रंस्तुताये। भिरो२३४वा।

४ ५ ३४२ ३२ ४५ ३२ १
दू५भो६हायि॥(२) यदीत्तुतेभिरि। दुभाश्यिः। सो

२ ५ २ ४५ ३२४२३ ४५२ ३
२३४। मेभिःप्रतिभू। षाथा। वेदाविश्वस्यमोधिरो२

५ ४ २२ ३ ४५२३ ५ १ १ १
३४हायि। वेदाविश्वस्यमोधिरो२३४हायि। धार्षत्ताए

२ १ ५ ४ ५
ताम्। इदो२३४वा। षा५तो६हायि(३)॥ १ *॥ [१]

५ ३ २ ४ २ ५
॥ गौरीवितम्॥ प्रति। अस्माश्यि। पिपीषताये।

१ २ १ २ ४
विश्वानिविदुषेभरा२३। आरङ्गमा३१२३। यजा५ग्नमया

१ २ १ ४ ५ ४ ५
यि। आपस्वादा३१२३। ध्वनोवा। नापूरो६हायि॥(१)

५२२ ३ १ ४ २ ५ १२ २ २ ५
एमे। नम्प्रा ३। तियेतना। सोमेभिःसोमपातमा २

१ २ १ ४ १
४म्। आमत्रेभा३१२३यिः। ऋजा५यिषिणम्। आयि.

२ ४ २ ४ ५
द्रंस्तुता३१२३यि। भिरोवा। दू ५ भो ६ हायि॥(२)

---

* उ० गा० १०प्र० १अ० १खं०।

५ ६ ३ २ ४ ५ १ २ ३ ६
यदी। सुताꣳयि। भिरिन्दुभायिः। सोमेभिःप्रतिभू

१ ६ २ ४
षथा२३। वायिदाविश्वा ३ १ २ ३। सुमा५यिधिराः।

१ २ ४ ५ ४ ५
धार्षत्तन्ता ३ १ २ ३ म्। इदोवा। षा ५ तो ६ हायि

(३) ॥ १२* ॥ [२] २

इति सामवेदार्थप्रकाशे उत्तरायत्यस्य त्रयोदशस्याध्यायस्य
प्रथमः खण्डः† ॥ १ ॥

अथ द्वितीय-खण्डः—

बभ्रवेन्विति षड्चं प्रथमं सूक्तम्,

तत्र प्रथमा।

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
बभ्रवेनुसुतवसेरुणायदिविस्पृशे।

१ २ ३ १ २
सोमायगाथमर्चत ॥ १ ॥

---

* ऋ० गा० १म० १अ० १२सा०।

† 'उक्ताः खरसामानः'—इति वि०।

‡ 'इदानीं विषुवानभिधीयते'—इति वि०।

¶ ऋ० वे० ९, ७, २९, ४।

हे स्तोतारः! "बभ्रवे" बभ्रु-वर्णाय "स्वतवसे" स्व-बलाय* "अरुणाय" कदाचिदरुणवर्णाय "दिविस्पृशे" दिवं स्पृशते सोमाय "गाथं" स्तुतिरूपां वाचम्† "अर्चत" उच्चारयतेत्यर्थः ॥ १ ॥

अथ द्वितीया।

१२ २११ २१२ २२
हस्तच्युतेभिरद्रिभिःसुतꣳसोममपुनीतन।

२३१२ ३१२
मधावाधावतामधु ॥ २ ‡ ॥

हे ऋत्विजः! "हस्तच्युतेभिः" हस्त-प्रच्युतैः "अद्रिभिः" अभिषव-ग्रावभिः "सुतम्" अभिषुतं "सोमं" "पुनीतन" पवित्रे पावयत। अपिच "मधौ" मदकरे सोमे¶ "मधु" गव्यं पयः "आधावत" प्रक्षिपत ॥ २ ॥

अथ तृतीया।

२३१२ २२ ३२३१२
नमसेदुपसीदतदध्वरेदभिश्रीणीतन।

२३१२
इन्दुमिन्द्रेदधातन ॥ ३ § ॥

---

* 'स्व इति पादपूरणे'—इति वि०।

† 'गाथं—मन्त्रब्राह्मणात् यज्ञसामसञ्चयम्'—इति वि०।

‡ ऋ० वे० ६, ७, १९, ५।

¶ 'मधौ—मधुरसे तोयकलशे'—इति वि०।

§ ऋ० वे० ६, ७, २३, १।

हे ऋत्विजः। "नमसेत्" नमस्कारेणैव* "उप सीदत" सोमसमीपमागच्छत "दध्नेत्" दध्नैव† "अभि श्रीणीतन" सोममभि श्रीणीत च। "इन्द्रे" "इन्दुं" सोमं "दधानत"‡ धत्त च ॥ ३ ॥

अथ चतुर्थी।

३ १र २र ३१२ ३१ १र.
अमित्रहाविचर्षणिःपवस्वसोमगव्यवे।

३१२ ३२
देवेभ्योअनुकामकृत् ॥ ४¶ ॥

"अमित्रहा" "विचर्षणिः" विद्रष्टा "देवेभ्यः" "अनुकामकृत्" अभीष्टकर्त्ता§ त्वं "गवे" अस्माकं पशवे "गं" सुखं "पवस्व" क्षर ॥ ४ ॥

अथ पञ्चमी।

१ २ ३१२३१२ ३१२
इन्द्रायसोमपातवेमदायपरिषिच्यसे।

३ १र २र३१
मनश्चिन्मनसस्पतिः ॥ ५॥ ॥

"इन्द्राय" "सोमपातवे" "मदाय" "परिषिच्यसे" परितः पात्रेषु सिच्यसे ॥ ५ ॥

---

* 'इच्छब्दः पादपूरणः'—इति वि०।

† 'इत् शब्दः एवेत्यर्थे'—इति वि०।

‡ "श्रीणीतन", "दधानत"—इत्यत्र "तप्तनप्तनथनाश्च (७, १,४५)"—इति तनप्।

¶ ऋ० वे० ६, ७, ३७, २।

§ 'अनुकामकृत्—ये देवानां कामाः, तेषां कर्त्ता धर्मैः'—इति वि०।

॥ ऋ० वे० ६, ७, ३७, ३।

अथ षष्ठी।

१२ ११ २ ११ २
पवमानसुवीर्यꣳरयिꣳसोमरिरीहिणः*।

२११ २ ११
इन्दविन्द्रेणनोयुजा ॥ ६† ॥ ३

हे "इन्दो" क्षियमाण "पवमान" सोम! त्वं "सुवीर्यं" शोभन-वीर्योपेतं "रयिं" धनं "नः" अस्माकं सम्बन्धिनम् "इन्द्रेण" "युजा" सहायेन "नः" अस्मभ्यं "रीरिहि" देहि ॥ ६ ॥ ३

अथोद्वेदभीति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१७ ३ २ ११ २ ११२ १२
उद्वेदभिश्रुतामघंवृषभन्नर्य्यापसम्।

१ २
अस्तारमेषिसूर्य्य ॥ १‡ ॥

हे "सूर्य्य" [द्वादशसु भानुषु इन्द्रोऽपि सूर्यात्मना पठितः। तस्मात्] सूर्यात्मक! सुवीर्य्य! हे इन्द्र! "श्रुतमघं" सर्वदा देवत्वेन विख्यात-धनम्, अतएव "वृषभं" याचमानानां धनस्य वर्षितारं "नर्यापसं" नर-हितं नर्यं नर-हित-कर्म्माणम् "अस्तारम्" दान-

---

* "रीरिहिणः"—इति ऋ०-पाठः।

† ऋ० वे० ९, ७, १७, ४।

‡ ऋग्वेदीय-पाठ-प्रतीकमिदम्।

¶ द्र० चा० २, १, ४, १ (१भा० ३०७ पृ०) = ऋ० वे० ६, ६, २१, १।

ओजस्कम् औदार्यवन्तमेतादृशं स्तोतारम् "अभि" लक्ष्य "उदेषि" [ईदवधारणे] त्वमेव तस्य यज्ञे सूर्यामना उद्गातासि। "घ"—इति प्रसिद्धौ ॥ १ ॥

अथ द्वितीया।

२ ३ १ १ ३ १ २ २ १ १ २ क १ २
नवयोनवतिम्पुरोबिभेदबाह्वोजसा।

१ २ २ १ २
अहिञ्चवृत्रहावधीत्॥ २॥

"यः" इन्द्रः† "नवतिं" नवति-सङ्ख्याकाः ततः नव सङ्ख्याकाः एकोनशत-सङ्ख्याकाः शम्बरस्य "पुरः" पुरीः "बाह्वोजसा" बाहु-बलेनैव "बिभेद" दिवोदासाय भिनत्ति स्म [तथाच मन्त्रान्तरे—"दिवोदासाय नवतिञ्च नवेन्द्रः पुरोध्वैरक्षम्बरस्य" —इति]। स च "वृत्रहा" वृत्रासुरस्य हन्ता। स इन्द्रः "अहिं च" केनाप्यहन्तव्यं मेघमपामावरकं वृत्रासुरं वा अवधीत्। स इन्द्रोऽस्माकं धनं ददात्वित्युत्तरेण सम्बन्धः ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ २ २ २ ३ १ २
सनइन्द्रःशिवःसखास्यावङ्होमद्यवमत्।

१ १ २
उरुधारेवदोहते॥ ३॥ ४

---

* ऋ० वे० ६, ६, २१ २।

† अत्र इन्द्र इति सुर्योऽभिधीयते तथाच तारण्डम्—"दिवाकीर्त्यसामा नवति स्तोमोसुर्यः"—इत्यादि।

‡ ऋ० वे० ६, ६, २१, २।

"सः" पूर्वोक्त-गुण-विशिष्टः "शिवः" कल्याणतमः "सखा" यष्टृयष्टव्य-स्तोढस्तोतव्य-लक्षणेन सम्बन्धेन · "नः" अस्माकं मित्रभूतः एतादृश इन्द्रः "अश्ववत्" अश्वयुक्तं "गोमत्" पश्वादि-सहितं "यवमत्" ["अयवादिभ्यः"—इति प्रतिषेधात् मतुपो वत्वाभावः। यव इति धान्य-विशेषः] धान्ययुक्तं* धनं "नः" अस्मभ्यं "दोहते" दोग्धुं ददातु। तत्र दृष्टान्तः—"उरुधारेव" दोहन-काले प्रभूत-पयोधारा यद्वा बहूनां पोषयित्री गौः यथा वत्सस्य पयो दोग्धि तथा प्रभूत-धनम् अस्माकं दोग्धुं ददातु [दुहेर्लेटड़ागमः (३, ४, ९४) ॥ ३ ॥ ४

॥ स्वारसौपर्णम् ॥ उद्वेदभिश्रुतामाऽघाम्। वृषभ
नर्या। ऊम्। पाऽ३४साम्। आस्ताऽउवा। रामा
यि। षिञ्ऽ३४वा। रा५योऽईषायि ॥(१) नवयोनवति
म्पूऽराः। बिभेदबाऽबलो। ऊम्। जाऽ३४सा। आहा
ऽउवा। चवृ। ऽनघोऽ३४वा। वा५धो६षायि ॥(२)
सनइन्द्रःशिवःसाऽखा। अश्वावद्गोमद्या। ऊम्। वाऽ३

* 'यवमत्—यवप्रधानमुपलक्षणार्थम्, धान्य संयुक्तम्'—इति वि०।

४मात्। अरा३उवा। धारे। वदो२३४वा। दापूतो
ई्दायि(३)॥ १६*॥ [१] ४

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य त्रयोदशस्याध्यायस्य
द्वितीयः खण्डः॥ २॥

अथ तृतीय-खण्डे—

विभ्राड़िति तृचात्मकं प्रथमं सूक्तम्,†

तत्र प्रथमा।

विभ्राड्बृहत्पिबतुसोम्यम्
मध्वायुर्दधद्यज्ञपतावविंहुतम्।
वातजूतोयोअभिरक्षतित्मना
प्रजाःपिपर्त्तिबहुधाविराजति॥ १‡॥

"विभ्राट्" विभ्राजमानः विशेषेण दीप्यमानः सूर्य्यः "बृहत्" परिवृढं "सोम्यं" सोममयं "मधु", "पिबतु"। किं कुर्वन्? "यज्ञ-

---

* ऋ० मा० १४प्र० १अ० १६सा०।

† 'मन्त्रादिवाक्यीर्ष्यम् पृथक्'—इति वि०।

‡ ऋ०मा० प्र० ३३७ ऋ० वे० ८, ८, २८, १।

पतौ" यजमाने "अविक्लृतम्" अकुटिलम् "आयुः" "दधत्" कुर्वन् "यः" सूर्यः "वातजूतः" वातेन महावायुना प्रेर्यमाणः सन् "मना" आत्मना स्वयमेव "अभि रक्षति" सर्वं जगदभिपश्यन् पालयन्ति [राशि-चक्रस्य वायु-प्रेर्यत्वात् सूर्यस्यापि तत्प्रेर्यत्वम्]। स सूर्यः "प्रजाः" "पिपर्त्ति" हव्यादि-प्रदानेन पालयति "बहुधा वि राजति" विशेषेण दीप्यते च ॥

"पिपर्त्तिबहुधा"-"पुपोषपुरुधा"—इति पाठो ॥ १ ॥

अथ द्वितीया।

३ २ १ १२ २२ १ १ २ १
विभ्राड्बृहत्सुभृतंवाजसातमं
१ २ ३ २ १ १ २ ३ १२ २२
धर्मन्दिवोधरुणेसत्यमर्पितम्।
१ १ २ ३ १ १ ३ १ २ २
अमित्रहावृत्रहादस्युहन्तम,
१ २ ३ १ २ ३ १ २ ३ २
ज्योतिर्ज्यये असुरहासपत्नहा ॥ २* ॥

"विभ्राट्" विभ्राजमानं, "बृहत्" प्रौढं, "सुभृतं" सुपुष्टं, "वाजसातमं" वाजस्यान्नस्य बलस्य वा दातृतमं, "धर्मन्" धर्मणि वायुना धारयितव्ये "दिवः" द्युलोकस्य "धरुणे" धारके सूर्य-मण्डले "अर्पितं" निक्षिप्तं, "सत्यम्" अनश्वरम् "अमित्रहा" अमित्राणामप्रियाणां हन्तृ, "वृत्रहा" आवृण्वतां हन्तृ,† "दस्यु-

* ऋ० वे० ८, ८, १८, २।

† 'वृत्रहा—ब्रह्मा, नेवस्य चन्तृ'—इति वि०।

हन्तमं" दस्यूनामुपक्षपयितॄणां हन्तृतमम्, "असुरहा" असुराणां क्षेप्तॄणां घातकं "सपत्नहा" सपत्नानां शत्रूणामपि घातकम्, ईदृग्भूतं "ज्योतिः" सौरं तेजः "जज्ञे" प्रादुर्भवति ॥ २ ॥

अथ तृतीया।

३१७ ३ १ १३ १ ३ ३१
इदꣳश्रेष्ठञ्ज्योतिषाञ्ज्योतिरुत्तमं
२३ १२३ ११ ३२
विश्वजिद्धनजिदुच्यतेबृहत् ।
३ २ ३ ३७ ३१२ ३२
विश्वभ्राड्भ्राजोमहिद्दर्य्योदृग्
३१२ ३२३२ ३ १२
उरुप्रथेसहऽओजोऽच्युतम् ॥ ३ *॥ ५

"इदं" सौरं तेजः "श्रेष्ठं" प्रशस्ततमं "ज्योतिषाम्" अन्येषां ग्रहनक्षत्रादीनामपि "ज्योतिः" प्रकाशकम् अतएव "उत्तमम्" उत्कृष्टं "विश्वजित्" विश्वस्य सर्वस्य जेतृ "धनजित्" धनस्य जेतृ "बृहत्" प्रभूतमुच्यते एवंगुणविशिष्टमिति सर्वैरभिधीयते अपिच "विश्वभ्राट्" विश्वस्य प्रकाशयिता "भ्राजः" भ्राजमानः "महि" महान् "सूर्यः" "दृशे" दर्शनाय "उरु" विस्तीर्णं "सहः" तमसोऽभिभवितृ "अच्युतं" च्युति-रहितम् अविनाशम् "ओजः" तेजोरूपं बलं "पप्रथे" विस्तारयति ॥ ३ ॥ ५

* ऋ० १० ८, ८, २८, १।

अथ इन्द्रक्रतुमिति प्रगाथात्मकं द्वितीयं सूक्तम्

तत्र प्रथमा।

२ ३१२३१ २ ३२ ३२ ३ १२
इन्द्रक्रतुन आभरपितापुत्रेभ्योयथा।
१२ ३ १२ ३१२
शिक्षाणोअस्मिन्पुरुहूतयामनि
३ १२ २२
जीवाज्योतिरशीमहि॥ १ *॥

हे "इन्द्र!" "नः" अस्मभ्यं "क्रतुं" कर्म्म प्रज्ञानं वा "आ भर" आहर। अपिच "यथा" "पिता" "पुत्रेभ्यः" प्रयच्छति तथा "नः" अस्मभ्यं "शिक्ष" धनं देहि। हे "पुरुहूत" बहुभिराहूत! "यामनि" यज्ञे "जीवाः" वयं "ज्योतिः" सूर्य्यम् "अशीमहि" प्रतिदिनं प्राप्नुयामः॥ १॥

अथ द्वितीया।

२ ३ १ २ ३११ ३ २ १ २३१ २
मानोअज्ञातावृजनादुराध्योऽरक्षसोमाशिवासोवक्रमुः।
१२ ३२ ३२३ १२ २१ २
त्वयावयम्प्रवतःश्वतीरपोतिपारूरुतनामसि॥ २†॥ ६

हे इन्द्र! "अज्ञाताः" अज्ञात-गमनाः "वृजनाः" हिंसकाः "दुराध्यः" दुष्टाभिसन्धयः "नः" अस्मान् "मा अव क्रमुः" माव

---

* ऋ० वा० ३, १, २, ७ (१मा० ५३४ पृ०) = ऋ० वे० ५, ३, २१, ६।

† ऋ० वे० ५, ३, २१ ७।

‡ 'वृजनाः—वज्र-सम्बन्धाः—इति वि०।

चक्रमुः। हे "शूर!" "त्वया" "वयं" स्तोतारः "प्रवतः" प्रवणकाः सन्तः "प्रवतोः" बह्वीः "अपः" "अति तरामसि" अतितरामः ॥ २ ॥ ६

॥ महावैष्टभम् ॥ इन्द्रक्रतोहायि। नआभरोवा। पायितापुत्रे। भियोया१था२३। होवाइहायि। ग्नि त्राणोअस्मिन्पुरुष्टुत। तयामा१नी२३। होवाइहायि। जीवाज्यो१ता२३यिः। होवा ३ हायि। अग्नो। ना २ हा२३४औहोवा ॥(१) जीवाज्योतोहायि। अग्नीमहो वा। जायिवाज्योतिः। अग्नायिमा१हा२३यि। होवा ३हायि। मानोअज्ञातावृजनाः। दुराधा १ या २ ३ः। होवाइहायि। माग्नायिवा१सा२३ः। होवा ३ हायि। अव। क्रा२मू२३४औहोवा ॥(२) माग्निवासोहायि। अवक्रमोवा। माग्निवासः। अवाक्रा१मू२३ः। होवा

२ १ २ १ १ १ १ २ १ २ १
३हायि। त्वयावयम्प्रवतःश्र। श्वतायिरा१पा२३ः। हो

२ २ १ २ १ २ २ १२
वा३हायि। अतायिपू१रा२३। होवा३हायि। तरा।

३ ५२ २ ३ ५
मा२सा२३४औहोवा। दी२३४श्राः(३) ॥ १७ * ॥ [१]

४ ३ ४ ५ २ ३२ ३२४२ ५
॥ श्यतम् ॥ इन्द्रक्रतुन्नश्रा। भरा ३ ४ औहोवा।

१ २ २ २ १ ७ ५ ५ १ २ २२
दायितापुत्रे। भियोयथा२३४। ओ३हा। शिश्राणो

१ २ १ ३ ५ १२ २
अस्मिन्। पूरू२३४। तया२। मा२३४नौ। जीवा

२ २ २ १ ३ ५२ २
ज्योतायिरा३श्रा। ऊम्मायि। मा२३हा२३४औहोवा ॥(१)

४२ ३२ २ ४ ५ २ ३ २ ३२ ४२ ५ १ २ २२
जीवाज्योतिरश्री। महा३४औहोवा। जायिवाज्योतिः।

१ ७ ५ ५ १२२ १ २ २२ १
अशयिमहा२३४यि। ओ३हा। मानोअज्ञाताः। वा

२ १ ३ ४ १२ २ २
र्ज्जा२३नाः। दुरा२। धा२३४याः। माग्निवासोआ३

२ १ ३ ५२ २ ३२ ४२
वा। ऊम्मायि। क्रा२मू२३४औहोवा ॥(२) माग्निवा

३२ ४ ५ २ २ ३२ ४२ ५ १ २२ १ ७
सोअवक्रिमू३४औहोवा। माग्निवासः। अवाक्रमू२३

---

* ऋ० मा० ८५० १ मं० १७मा०।

५ ५ १ २ २१ २ १ २ १
४:। ओ६हा। त्वयावयम्प्र। वाता२३ग्रा। स्वतार

३ ५ १ २ २ २ १
यिः। आर२३४पाः। अतिग्लूराताइरा। ऊम्मायि।

३ ५ २ २ ३ ५
मार२सा२३४औचोवा। वार२३४ह्व(३)॥ १९ *॥ [२]

१ ५ ५ २ ४ ५
॥ नौधसम्॥ आर२३४यि। द्रक्ततुन्नआ। भारा।

२ १ २ २ १ २ १ २ २
पितापुत्रे। भौ३योयाइथा। ग्रा२३यित्ता। ओअस्मिन्।

१ २ १ २,३ ५ १ २ १ २
पुरु। हू। तायामार२३४नो। जार२३यिवाः। ज्योतिर

१ ५ ३ ५ १ २ २ ५ २
ग्रो२३४वामार२३४च्ची॥(१) जार२३४यि। वाज्योतिरग्री।

४ ५ २ १ २ १ २ २
माहायि। जीवाज्योतायिः। आ३ग्रायिमाइहायि।

१ २ १ २ २ १ २ १ २ २,३
मार२३नो। आज्ञाताः। वृज। नाः। दूराधार२३४

५ १ २ १ २ २१ ५ ३ ५
याः। मार२३ग्रायि। वासोअवो२३४वा। क्रार२३४मू॥(२)

५ ५ २ ४ २ ५ ४ ५ २ २ १ २
मार२३४। ग्निवासोअव। कामूः। मग्निवासो। आइ

१ २ १ २ १ २ १ २ १ २ १ २
वाक्राइमः। त्वार२३या। वायम्प्र। वतः। ग्रा। स्वाता

* ऋ० मा० ८प्र० १अ० १९मा०।

३ ५ १ २ १ २१ ५ ३
थिरा२३४ग्राः। आ२३तायि। पूरतरो२३४वा। मा२३
५
४सी(३) ॥ १ * ॥ [३]

५ ५ ३ २ १२ ४२ ५ १
॥ पौरुमीढम् ॥ इन्द्रक्र। तुन्ना३४औहोवा। आ
२ १ २ १ २ १२ २ १२
भरे। पितापुत्रे। भियोया२३था। शिक्षाणोआ। स्मि
२ १२ २ २ २ १२
न्पुरुहू२३ह्व। तयामनायि। जीवाज्यो२३तीः। अग्नी
५२ ४२ ५२ २ २ १२ ४२
मा२३४५क्षाई५६यि ॥(१) जीवाज्यो। तिरा३४औहो
५ २ २ १२ २ १ २ १२ १
वा। ग्नायिमहि। जीवाज्योतिः। अग्नीमा२३क्षायि।
२ १२ २ २ १२ २
मानोअज्ञा। तावृजा२३नाः। दुराधिया। माग्निवा२
२ १ ५२ ४ ५२ ३२ २
३साः। अवक्रा२३४५मू६५६: ॥(२) माग्निवा। सोआ
३२ ४२ ५ १ २ १२ १२ १ २
३४औहोवा। वाक्रमुः। माग्निवासः। अवक्रा२३मूः।
१२ २ १२
त्यावयाम्। प्रवता२३ग्राः। स्वतीरपाः। अतिपू२३
२ २ २ १ १ १ १ १ १
रा। तरामा२ ३ ४ ५सा ६ ५ ६ यि। दक्षाश्या२३ ४ ५
(३) ॥ १८ † ॥ [४]

* क० मा० ८प्र० २अ० १सा०। † क० मा० ८प्र० २अ० १८सा०।

॥ मानवाद्यम् ॥ इन्द्रक्रतूम्। नआभा२३४रा। न
आमा२३४रा। पायितापुत्रे। भियोया१थार२। शि।
क्षा। णोअ। स्मायिन्पुरुहूइ३। तया२मा२३४नो। जी
वाज्योता२३यिः। आरशा२३४औहोवा। मा२३४हो ॥(१)
जावाज्योतायिः। अशीमा२३४हायि। अशायिमा२३४
हायि। जायिवाज्यातिः। अशायिमा१हा२यिः। मा।
नः। अज्ञा। तावृजनाः। दुरा२धा२३४याः। मा
शिवासा२३ः। आरवा२३४औहोवा। क्रा२३४मूः ॥(२)
माशिवासाः। अवक्रा२३४मूः। अवाक्रा२३४मूः। मा
शिवासः। अवाक्रा१मू२ः। त्व। या। वयम्। प्रावतः
प्रा३। स्वता२यिरा२३४पाः। अतिप्रूरा२३। ता२रा
२३४औहोवा। मा२३४सो(३) ॥ १ * ॥ ५०

---

* ज० ब्रा० १८प्र० २ब्र० १मा०।

॥ भारद्वाजम्॥ इन्द्रक्रतूम्। नभाभा१रा२। पा
यितापुत्रेभ्योयथा। शिक्षाणो१आ२। स्मायिन्पुरुहूत।
तयामा१नी२। जीवाज्यो१ता२३यिः। आ२शा२३४औ
ह्वोवा। मा२३४ह्वी॥(१) जीवाज्योतायिः। अशायि
मा१ह्वा२यि। जायिवाज्योतिरशीमहि। मानोआ१ज्ञा
२। तावृजनाः। दुराधा१या२ः। माशायिवा१सा२३ः।
आ२वा२३४औह्वोवा। क्रा२३४मूः॥(२) माग्निवासा।
अवाक्रा१मू२। माग्निवासोअवक्रमुः। त्वयावा१या२म्।
प्रावतःशु। श्वतायिरा१वा२ः। अतायिशू१रा२३। ता
२रा२३४औह्वोवा। मा२३४सी(३)॥५*॥[६] ६

---

* ऋ० मा० १८प्र० २अ० ५मा०।

अथाद्याद्येति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

३ १ ३ २ ३२ ३१ २३१२
अद्याद्यास्रःश्वइन्द्रचास्वपरेचनः।

१२ ३१२ ३२३ २११२
विश्वाचनोजरितृन्त्सत्पतेअहादिवानक्तञ्चरक्षिषः ॥१*॥

"अद्याद्य" यदद्य शब्द-वाच्यमहरस्ति, तत्र सर्वत्र, हे "इन्द्र!" "श्वः श्वः" श्वः-शब्द-वाच्यं च यत्, तत्र सर्वत्र,† त्वं "चास्व" अस्मान् रक्ष। तथा "परे च" "परस्मिन्" तृतीयेऽहनि च चास्व। हे "सत्पते" सतां पालकेन्द्र! "विश्वा च" सर्वाण्यपि "अहा" अहानि सर्वेष्वप्यहःसु "नः" अस्मान् "जरितॄन्" स्तोतॄन्" "रक्षिषः" रक्षसि। तथा "दिवा नक्तं च" रक्षिषः रक्षसि ॥ १ ॥

अथ द्वितीया।

३ १२ १२१२११२१ १ १ १क२२ ३२
प्रभङ्गीशूरोमघवातुवीमघःसम्मिश्लोवीर्यायकम्।

३१२३१२२ ३१२ १२ ३१२
उभातेबाह्वृषणाशतक्रतोनियावज्रमिन्द्रमिञ्चतुः ॥ २‡ ॥ ७

अयं "मघवा" धनवान्, इन्द्रः, "प्रभङ्गी" प्रभञ्जन-शीलः, शूरः" विक्रान्तः, "तुवीमघः" प्रभूत-धनः, "सम्मिश्लः" सम्यङ्

---

* ऋ० वे० ६, ४, ३८, १।

† 'अहन्यहनि'—इति वि०।

‡ ऋ० वे० ६, ४, ३८, २।

मिश्रयिता। किमर्थम्? "वीर्याय"* वीर्य-करणाय "उभा" उभौ "बाहू" "वृषणौ" कामानां वर्षकौ "या" यौ बाहू "वज्रम्" आयुधं "नि मिमिक्षतुः" परिगृह्णीतः॥ २॥ ७

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य त्रयोदशस्याध्यायस्य तृतीयः खण्डः॥ ३॥

अथ चतुर्थ-खण्डे—

जनीयन्त इत्येकर्चं† प्रथमं सूक्तम्‡

सैषोच्यते।

१ २३ १२ २११ १ १ २

जनीयन्तोन्वग्रवःपुत्रीयन्तःसुदानवः।

१२

सरस्वन्तꣳहवामहे॥ १॥ ८

"जनीयन्तः" [जायन्तआस्वपत्यानीति] जनयः जायाः ता इच्छन्तः§ "पुत्रीयन्तः" पुत्रान् कामयमानाः, "सुदानवः" शोभन-दानाः, "अग्रवः" उपगन्तारो वयं "नु" अद्य‖ "सरस्वन्तं" तं देवं मध्यम-स्थानं "हवामहे" आह्वयामहे॥ १॥ ८

---

* 'वीर्याय—चतुर्थ्यर्थे तृतीया-स्थाने द्रष्टव्या, वीर्येण युक्ताः'—इति वि०।

† विवरणमते लेखनसूत्रं प्रमाणात्मकं न लेखकं तथाच उत्तमदृत्यधिमा ऋक् खल्वस्यैव सूक्तस्य द्वितीया नतु सूक्तान्तरम्; मूलपाठदर्शनस्वारसकूलमिति ध्येयम्।

‡ 'इदानीं विश्वजित्'—इति वि०।

¶ ऋ० वे० ५, ६, १०, ४।

§ 'जनीयन्तः—जननं कुर्वन्तः'—इति वि०।

‖ 'नु—इति पादपूरणः'—इति वि०।

उतनइत्येकर्चं द्वितीयं सूक्तम्,

सैषोच्यते ।

२ १२ ३ २ ३१ २ ३ १ २ ३ १२
उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा ।

१२ ३ १ २
सरस्वतीस्तोम्याभूत् ॥ १* ॥ ९

"उत" अपि च "नः" अस्माकं "प्रियासु" प्रियाणां मध्ये "प्रिया" प्रियतमा "सप्तस्वसा" गायत्र्यादीनि सप्त छन्दांसि स्व-सारो यस्यास्तादृशी नदीरूपया स्तुत्या गङ्गाद्याः सप्त नद्यः स्वसारः "सुजुष्टा" सुष्ठु पुरातनैर्ऋषिभिः सेविता, एवम्भूता "सरस्वती" देवी "स्तोम्या"† भूतस्तोतव्या "भूत्" भवतु ॥ १ ॥ ९

अथ तत्सवितुर्वरेण्यमिति तृतीयसूक्तरूपा,‡

सैषा ।

१ २ ३१२ २२ ३ १ २ ३१ २
तत्सवितुर्वरेण्यभर्गोदेवस्यधीमहि ।¶

२ ३ १ २ ३ १ २
धियोयोनःप्रचोदयात् ॥ १॥ १०

---

* ऋ० वे० ४, ८, ३१, ४ ।

† 'स्तोम्या—स्तोमानां क्रतूनाम् अथवा तृतीयसवनप्रभृतीनाम्'—इति वि० ।

‡ अथाप्यस्ति मतान्तरम्, तथाहि—विवरणमेते संहितादि-समस्त-मूल ग्रन्थ-लिपि-दर्शनार्थमेतत् तृचं सूक्तम् एतच्चाग्नेर्मे स्तोमानंस्वरूपमिति अग्नयायूंषीति च हे ऋचावस्त्रैव द्वितीय-तृतीये न तु सूक्तान्तरे इति विवेकः ।

¶ ऋ० वे० १, ४, १०, ५ ।

"यः" सविता देवः "नः" अस्माकं "धियः" कर्माणि, धर्मादि-विषया वा बुद्धीः "प्रचोदयात्" प्रेरयेत्, "तत्" तस्य "देवस्य" द्योतमानस्य "सवितुः" सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य "वरेण्यं" सत्स्वरूपतया ज्ञेयतया च भजनीयं "भर्गः" अविद्या-तत्कार्ययोर्भजनात् भर्गः स्वयंज्योतिस्तेजः परब्रह्मात्मकं "धीमहि" वयं ध्यायामः। यद् भर्गो धियः प्रचोदयति तद् ध्यायाम इति समन्वयः। [यद्वा, यः सविता सूर्यः 'धियः' कर्माणि 'प्रचोदयात्' प्रेरयति, तस्य 'सवितुः' सर्वस्य प्रसवितुः 'देवस्य' द्योतमानस्य सूर्यस्य 'तत्' सर्वैर्दर्शनीयतया प्रसिद्धं 'वरेण्यं' सर्वैः सम्भजनीयं 'भर्गः' पापानां तापकं तेजो-मण्डलं 'धीमहि' ध्येयतया मनसा धारयेम। यद्वा, भर्ग-शब्देनान्नमभिधीयते 'यः' सविता देवः 'धियः' प्रचोदयति, तस्य 'देवस्य' प्रसादात् 'तद् भर्गः' अन्नादि लक्षणं फलं 'धीमहि'] धारयामः तस्याधारभूता भवेमेत्यर्थः। भर्ग-शब्दस्यात्र-परत्वेयमार्यवर्णिक-वेद-च्छन्दसि—"सवितुर्वरेण्यं भर्गो देवस्य कवयोऽन्नमाहुः, कर्माणि धियस्तनुते प्रब्रवीमीति प्रचोदयात् सविता यामि-रेतीति*। भर्गः—भ्रस्ज पाके (तु०उ०) असुन् "भ्रस्जोरोप-धयोरमन्यतरस्याम्(६,४,४७)"—इति रोपधयोर्लोपो रमागमश्च, न्यङ्क्वादि-पाठात् कुत्वम् (७,३,५३)। धीमहि—ध्यायते र्लटि "बहुलञ्छन्दसि (८,४,७६)"—इति सम्प्रसारणं, व्यत्ययेनात्मने-पदम्; यद्वा धीङ् आधारे (दि०आ०) लिटि "बहुलञ्छन्दसि

* 'यः सवितादीया बुद्धयः प्रकर्षेण चोदयति ध्यान-धारणा-समाधिभिः तस्य सवितु र्देवस्य दानादिभिर्गुणैर्वर्तमानस्य तत्परं प्रविशाम इति सङ्क्षेपः'—इति वि०।

(२,४,७३)"—इति विकरणस्य लुक्। प्रचोदयात्—चोदयतेर्लेटि आडागमः, यङ्लुगयोगादनिघातः, आगमस्यानुदात्तत्वे णित्स्वरः॥ १॥ १०

अथ

३ २ ३ १ २
सोमानाꣳस्वरणम्०॥ १*॥ ११

—इति,

२ २ १ २
अग्नआयूꣳषिपवसे०॥ १†॥ १२

—इति, चतुर्थ-पञ्चम-सूक्तालैकयोर्हयो र्ऋचोः पतीके; ते चान्यत्रान्नाते (छ० आ०=२, १, ५, ५; १भा०३२८पृ०), (उ० आ०७, ११, १२, १)॥ १॥ ११——॥ १॥ १२

अथ तान:ग्रक्तामिति लवाम्नकं षष्ठं सूक्तं,

तत्र,

१ १ २ १ २
तान:ग्रक्ताम्पार्थिवस्य०॥ १‡॥

—इति प्रथमाया ऋचः प्रतीकमिदं सा चान्यत्र (उ० ४,२, ४, ३) आम्नाता॥ १॥

---

* छ० आ० २, १, ५, ५ (१भा० ३२८पृ०) = ऋ० वे० १, १, ३५, १।
† उ० आ० ७, १, ११, १ = ऋ० वे० ७, २, १०, ४।
‡ उ० आ० ४, २, ४, २ = ऋ० वे० ४, ४, ६, २।

अथ द्वितीया।

३ २ ३ २ १ १ २ ३ १ २ २
ऋतमृतेनसपन्तेधिरन्दक्षमाशाते।

३ १ १ ३ १ १
अद्रुहादेवौवर्द्धते॥ २*॥

"ऋतेन" उदकेन निमित्त-भूतेन "ऋतं" यज्ञं "सपन्ता" सम्पन्नौ "धिरम्" एषणवन्तं "दक्षं" प्रवृद्धं यजमानं हविर्वा "आशाते" व्याप्नुतः "अद्रुहा" अद्रोग्धारौ "देवौ" द्योतमानौ मित्रावरुणौ "वर्द्धते" प्रवृद्धौ भवत॥ २॥

अथ तृतीया।

३ १ १ ३ ३ २ ३ १ ३ ० १ १
वृष्टिद्यावारीत्यापेषस्पतीदानुमत्याः।

३ १ १ १ २
बृहन्तक्षत्रमाशाते॥ ३†॥ १३

"वृष्टिद्यावा" वृष्ट्यर्था द्यौः स्तुतिर्यंयोस्तौ वृष्टिद्यावा अथवा वृष्टि-वर्षिका द्यौरन्तरिक्षं याभ्यां तौ तादृशौ, "रीत्याप" [रीगति-रेषणयोः (क्रया०प०)] रीतिः प्राप्तिः सैव आप्तिरभिमत-प्राप्तिर्ययोस्तौ तादृशौ, "पेषः" अन्नस्य "पती" स्वामिनौ [वृष्टि-प्रदत्वात् स्वामित्वम्], "दानुमत्याः" दानमत्याः दातुमुचितायाः इत्यर्थः एतद्विशेषणम् एवम्महानुभावौ मित्रावरुणौ "बृहन्तं

* ऋ० वे० ४, ४, ६, ४।
† ऋ० वे० ४, ४, ६, ५।

महान्तं "गर्तं"* रथम् "आशाते" व्याप्नुतः अधितिष्ठतो यागार्थम् ॥ ३ ॥ १३

अथ युञ्जन्तीति द्व्यात्मकं सप्तमं सूक्तम्,

तत्र प्रथमा।

१ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ २ १ २

युञ्जन्तिब्रध्नमरुषञ्चरन्तमपरितस्थुषः।

१ १ ३ २ ३ २

रोचन्तेरोचनादिवि ॥ १ † ॥

इन्द्रा हि परमैश्वर्य-युक्तः परमैश्वर्यं चाग्निवाय्वादित्य-नक्षत्र-रूपेणावस्थानात् उपपद्यते "ब्रध्नम्" आदित्यरूपेणावस्थितम्, "अरुषम्" हिंसारहिताग्निरूपेणावस्थितं, "चरन्तं" वायुरूपेण सर्वतः प्रसरन्तमिन्द्रं "परि तस्थुषः" परितोऽवस्थिता लोकत्रय-वर्त्तिनः प्राणिनो "युञ्जन्ति" स्वकीये कर्मणि देवतात्वेन सम्बन्धं कुर्वन्ति। तस्यैवेन्द्रस्य मूर्त्तिविशेषाणि "रोचना" नक्षत्राणि "दिवि" द्युलोके "रोचन्ते" प्रकाशन्ते [अस्य मन्त्रस्योक्तार्थपरं ब्राह्मणान्तरे व्याख्यातम्—"युञ्जन्ति ब्रध्नमित्याह—असौ वा आदित्यो ब्रध्नः आदित्यमेवास्मै युनक्ति। अरुषमित्याह—अग्निर्वा अरुषः अग्निमेवास्मै युनक्ति। चरन्तमित्याह—वायुर्वै चरन् वायुमेवास्मै युनक्ति। परितस्थुष इत्याह—इमे वै लोकाः परितस्थुषः इमानेवास्मै लोकान् युनक्ति। रोचन्ते रोचना दिवीत्याह—नक्षत्राण्येवास्मै रोचयतीति ॥ १ ॥

---

* 'गर्तं गरणीयम्'—इति वि०।

† ऋ० वे० १, १. ११, १ = य० वे० ३३, ५।

अथ द्वितीया।

२ १ २ ३ १ २ १२ ११ २ ११
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे।

१ २ ३ १ २ १ २
शोणा धृष्णू नृवाहसा ॥ २ * ॥

"अस्य" ब्रह्मादि-शब्द-प्रतिपाद्यस्यादित्यादि-मूर्त्तिभिस्तत्र तत्रावस्थितस्येन्द्रस्य "रथे" "हरी" एतन्नामानौ द्वावश्वौ सारथयो "युञ्जन्ति" [इन्द्र-सम्बन्धिनोरश्वयोर्हरिनामत्वं "हरी इन्द्रस्य"-"रोहितोऽग्नेः" (निघ० १, १५, १-२)—इति पठितत्वात्। कीदृशौ हरी? "काम्या" कामयितव्यौ "विपक्षसा" विविधे पक्षसौ रथस्य पार्श्वौ ययोस्तौ विपक्षसौ रथस्य हयोः पार्श्वयोर्योजितावित्यर्थः,† "शोणा" रक्तवर्णौ, "धृष्णू" प्रगल्भौ, "नृवाहसा" नृणां पुरुषाणामिन्द्र-तत्सारथि-प्रमुखाणां वोढारौ॥ २॥

अथ तृतीया।

३ २१ १ २१ २ ३ १ २ १ २ ३ १ २
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।

२ ३ १ २
समुषद्भिरजायथाः ॥ ३ ‡ ॥ १४

---

* ऋ० वे० १, १, ११, १ = य० वे० २१, ६।

† 'यत् पक्षसौ न, विशेषे च विपक्षौ रथस्य'—इति वि०।

‡ ऋ० वे० १, १, ११, २ = य० वे० २९, १०।

हे "मर्याः" मनुष्याः ! इदमाश्चर्यं पश्यतेत्यध्याहारः । किमाश्चर्यम् ? इति तत्रोच्यते—आदित्यरूपोऽयमिन्द्रः "उषसः" दाहकैः रश्मिभिः प्रतिदिनमुषःकाले वा सम्भूय "अजायथाः" उदपद्यत [अथवा सूर्यस्येवास्तमये मरणमुपचर्य व्यत्ययेन बहुवचनं कृत्वा सम्बोधनं क्रियते—हे मर्य ! प्रदिदिनं त्वमजायथा इति योज्यम्]। किङ्कुर्वन् ? "अकेतवे" रात्रावभिभूतत्वेन प्रज्ञान-रहिताय प्राणिने "केतुं कृण्वन्" प्रातः प्रज्ञानं कुर्वन्* "अपेशसे" रात्रावन्धकाराहृतत्वेनाभिव्यक्तत्वात् रूप-रहिताय पदार्थाय प्रातरन्धकार-निवारणेन "पेशः" [रूपनामैतत् (निघ० ३, ७, १०)] रूपमभि व्यज्यमानं कुर्वन् [अकेतवे, अपेशसे—इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्ये] ॥ ३ ॥ १२

इति सामवेदार्थप्रकाशे उत्तरार्चस्य त्रयोदश्यामध्यायस्य

चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमे खण्डे—

अयं सोमइति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

१ १२ १२ २ १ २ ३
अयꣳसोमइन्द्रतुभ्यꣳसुन्वे
१ २ २ १ २ ४
तुभ्यम्पवतेत्वमस्यपाहि ।

---

* 'केतुर्ध्वजः तं कृण्वन्, अकेतवे ; यः कश्चित् सर्वः अकेतुरध्वजः तस्मिन् केतुवन्तं कुर्वति अतिवस्तुवस्त्वन्तरात्'—इति वि० ।

२ ३१ १ ३१२ १२३२उ
त्वꣳहयञ्चक्रुषेत्ंववृध
३ ११ ३१ २ ३१ २
इन्दुम्मदायꣳयुज्यायसोमम् ॥ १ * ॥

हे "इन्द्र!" यः सोमः इन्द्राय "तुभ्यं" "सुन्वे" सूयते [सुनोतेः कर्मार्थे लटि "लोपस्त आत्मने पदेषु (७,१,४१)"—इति लोपः] "तुभ्यं" त्वदर्थमेव "पवते" पूयते। त्वञ्च "अस्य" अमुं "पाहि" पिब "त्वं ह" "यम्" "इन्दुं" "सोमं" "चक्रुषे" करोषि "त्वं" च यं "ववृषे" वृतवानसि। किमर्थम्? "मदाय" मदार्थं "युज्याय" सहायाय [सोम इन्द्राय बलकरत्वात् सहाय इति प्रसिद्धम्। यमेवं करोषि त्वं तं पाहीति समन्वयः॥ १ ॥

अथ द्वितीया।

२३ २३१२३११
सईꣳरथोनभुरिषाड्योजि
३१३१ २३२३१२
महःपुहꣳणिसातयेवनूनि।
१ ३ ११ ३४२र ३१
आदींविश्वानृज्याणिज्ञाता
२ ३ १२३१ २
खर्षातावनऊर्वानवन्त ॥ २ † ॥

"स ईम्"‡सोऽयं "भूरिषाट्" भूतस्य भारस्य सोढा "रथो न" रथइव "अयोजि" युज्यते, कीदृशः सः? "महः" महान्।

---

* ऋ० वे० ७, ३, २४, १। † ऋ० वे० ७, ३, २४ २।
‡ 'ईम् पादपूरणे'—इति वि०।

किमर्थमयोजि ? "पुरुणि" बहूनि "वसूनि" धनानि "सातये" अस्मभ्यं दातुम् "आदीं" योगानन्तरं "विश्वा" विश्वानि कर्माणि "नहुष्याणि" नहुषो मनुष्याः तेषां सम्बन्धीनि "जाता" जातानि अस्मद्विरोधीनि "जर्ह्वा उन्मुखानि "वने" वननीये "स्वर्षाता" स्वर्षाते [—सङ्ग्रामनामैतत् स्वर्गलाभ-युक्ते सङ्ग्रामे* "नवन्त" गच्छन्तु [नवतिर्गति-कर्मा (२, १४, २९)। यद्वा, सोऽयं सङ्ग्रामे युद्धार्थिनः सङ्गच्छन्ति ॥ २ ॥

अथ तृतीया ।

३२उ ३१र २र ३१
पुरुक्षीग्रर्ह्वीनमारुतमवस्वा
२ ३२उ ३ २
नभिग्रस्तादिव्यायथाविट्।
२ ३ २३१ २३१२
आपोनमत्तसुमतिर्भवानः
३१२ ३२उ ३२
सहस्रापाः पृतनाषाड्नयक्षः ॥ ३† ॥ १५

हे सोम ! "पुरुक्षी" बलवांस्त्वं "ग्रर्ह्वी न मारुतं" मरुतां बलमिव "पवस्व"। तत्र दृष्टान्तमेव स्पष्टयति—"यथा" "दिव्याः" "विट्"‡ प्रजाः "अनभिग्रस्ताः" अभिग्रस्ता निन्दिताः अनि-

* 'स्वर्षाता—स्वर्लोकस्य दाता'—इति वि०।
† ऋ० वे० ७, ३, २४, ३।
‡ 'विट—दृष्टिर्वा'—इति वि०।

न्दिताः* पवन्ते [“मरुतो वै देवानां विशः”—इति हि ब्राह्मणम्] किञ्च “आपो न” उदकानीव “मद्यः” क्षिप्रं पवमानस्त्वं “सुमतिः भव” “नः” अस्माकं। किञ्च, “सहस्रापाः” [अप्स इति रूपनाम (निघ०३, ७, ६)] बहुरूपस्त्वं† “पृतनाषाट् न” पृतनानामभिभवितेन्द्र इव “यज्ञः” यष्टव्यो भवसीति ॥ ३ ॥ १५

॥ दृहवद्वासिष्ठम् ॥ औहोवाहाऽहोयि। दृहा। अ
यण्सोमाः। इन्द्रतु। भ्यण्सुन्वायि। तुभ्यम्पवा। ता
ह्यितुवम्। अस्यपाही। तुवण्हयाम्। चक्रुषे। त्वं
ववृषायि। इन्दुम्मदा। याऽयुजि। याऽ४३। याऽ
सोपमाऽ५६म्॥(१) सईण्रथो। नभुरि। षाऽयोजी।
मद्यःपुरू। णीऽसात। यायिवद्धनी। आदोबिश्वा।
नडुषि। याणिनाता। तुवर्षाता। वनऊ। ध्वाऽ४३।
नाऽवापुन्ताऽ५६॥(२) प्रुष्मीग्नर्ती। नमारू। तम्यव

* 'अनभिग्रहा—अभिग्रावृरहिता'—इति वि०।

† 'बहवाप्सा बहूदकाइत्यर्थः'—इति वि०।

५ २१ २ १ २२३४५ २२१२
स्वा। अनभिशा। स्ताऽदिवि। यायथावोट्। आपो

२ १ २३४५ १२१२३२१
नमा। चूऽसुम। तिर्भवानाः। औद्वोवाद्वाऽहोयि।

३१ १२ २१२ २ १४
दूहा। सच्चस्वाप्नाः। पृतना। षाऽ४३ट्। नाऽयापू

ष्णाऽ६५६ः(३) ॥ ५ * ॥ [१] १३

अथ त्वमग्नइति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ २१२ २ ३१२ ३२
त्वमग्नयज्ञानाऽहोताविश्वेषाऽहितः।

३२३१ २३१२
देवेभिर्मानुषेजने ॥ १† ॥

हे "अग्ने!" "त्वं" "विश्वेषां" सर्वेषां सप्तसंख्याकरूपेण भिन्नानां "यज्ञानां" "होता" होम-निष्पादकोऽसि। यद्वा, यज्ञानां सम्बन्धी देवानामाह्वाता भवसि। कुतः? इत्यत आह—यस्मात् त्वं "मानुषे" मनोः सम्बन्धिनि मनुष्ये "जने" यजमाने "देवेभिः" देवैः "हितः" होत्त्वेन निहितोऽसि तस्मादित्यर्थः॥ १॥

---

* ऋ० मा० १५म० २च० ५सा०।

† ऋ० चा० १, १, १, २ (१मा० ९९ पृ०) = ऋ० वे० ४, ५, २१, १।

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ १ २ २ २
सनोमन्द्राभिरध्वरेजिह्वाभिर्यजामहः।

१ २ १ २ ३ १ २
आदेवान्वक्षियक्षिच ॥ २ * ॥

हे अग्ने! "सः" त्वं "नः" अस्माकं "अध्वरे" यज्ञे "मन्द्राभिः" मदकरीभिः" स्तुतिभिर्वा "जिह्वाभिः" काल्यादिभिः† "महः" महतः देवान् यज हविर्भिस्तर्पय च। कथं तत्? इति चेत्, उच्यते—"देवान्" यष्टव्यानिन्द्रादीन् "आ वक्षि" आवह ततो "यक्षि च" यज च हवींषि तेभ्यो देहीत्यर्थः ॥२॥

अथ तृतीया।

१ २ १ २ ३ १ २ ३ १ २ ३ १ २
वेत्थाहिवेधोअध्वनःपथश्चदेवाञ्जसा।

१ २ ३ १ २
अग्नेयज्ञेषुसुक्रतो ॥ ३ ॥ १६

हे "वेधः" विधातः! "सुक्रतो" शोभन-कर्मन्! "देव" दानादि-गुण-युक्त अग्ने! त्वं "यज्ञेषु" दर्शपौर्णमासादि-यागेषु "अध्वनः" महामार्गान् "पथश्च" क्षुद्रमार्गांश्च "अञ्जसा"

---

* ऋ० वे० ४, ५, २१, २।

† काली, करालो, मनोजवा, सुलोहिता, सुधूमवर्णा, स्फुलिङ्गिनी, विश्वरुपा, लेलिहा इति काल्यादयः।

‡ ऋ० वे० ४, ५, २१, ३।

आर्जवेण "वेत्थ" जानासि "हि" यस्मादेवं तस्मात् यज्ञ-मार्गात् भ्रष्टं यजमानं पुनस्तं मार्गं प्रापयेत्यर्थः ॥ ३ ॥ १४

अथ* होतादेवइति तृचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३१२ २२ ३ १ २ ३ १ १
होतादेवोऽमर्त्यःपुरस्तादेतिमायया।

३ १ २ ३ १ २
विदथानिप्रचोदयन्॥ १ †॥

"होता" होम-निष्पादकः "अमर्त्यः" मरण-रहितः "देवः" द्योतमानः "विदथानि" वेदितव्यानि कर्माणि "प्रचोदयन्" सोऽग्निः "मायया" कर्म-विषयाभिज्ञानेन युक्तः सन् "पुरस्तात्" कर्म-प्रारम्भ-काले एव "एति" अस्मानागच्छति ॥ १ ॥

अथ द्वितीया।

३ १२ २२ ३ २ ३ १ २
वाजीवाजेषुधीयतेऽध्वरेषुप्रणीयते।

१ २ ३ २ ३ १ २
विप्रोयज्ञस्यसाधनः॥ २ ‡॥

"वाजी" बलवान् अग्निः "वाजेषु" युद्धेषु "धीयते" देवैः शत्रु-हननार्थं निधीयते। किञ्च "अध्वरेषु" अग्नि-होत्रादिषु

* 'उक्तो विश्वदेवः। इदानीं मदात्मते मवान्याख्यानि'—इति वि०।

† ऋ० वे० ३, १, २९, १।

‡ ऋ० वे० ३, १, २९, २।

"प्रणीयते" अध्वर्युादिभिः प्रकर्षेणाङ्गप्रनीयादि-स्थानेषु प्रक्षिप्यते अतएव "विप्रः" मेधावी सन्नग्निः "यज्ञस्य" अग्निहोत्रादेः "साधनः" साधको भवति ॥ २ ॥

अथ तृतीया।

३ १ २३ १२ २२ ३ १३ १ १
धियाचक्रेवरेण्योभूतानाङ्गर्भमादधे।

११ ३२३१२
दक्षस्यपितरञ्जना॥ ३ *॥ १७

योऽग्निः "धिया" आधान-पवमानेष्टि-रूपेण कर्मणा "चक्रे" आहवनीयरूपतया कृतोऽभूत् अतएव "वरेण्यः" सर्वैर्यजमानैः कर्माङ्गत्वेन वरणीयः यश्चाग्निः "भूतानां" स्थावर-जङ्गमात्मकानां भूतजातानामन्तः "गर्भं" स्वात्मानमेव गर्भरूपतया "आ दधे" सर्वत्र दधार "पितरं" सर्वस्य जगतः पालकं तमिममग्निं "दक्षस्य" दक्ष-प्रजापतेः† "तनूः" तनया वेदिरूपा भूमिर्देवयोर्णमासाग्निहोत्रादिकर्म-सिध्यर्थं धारयति [भूमेर्दक्षदुहितृत्वे मन्त्रवर्णः—"अदितिर्ह्यजनिष्टदक्षस्य दुहिता तव"—इति ॥ ३ ॥ १५

इति सामवेदार्थप्रकाशे-उत्तरार्चस्य त्रयोदशस्याध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

---

* ऋ० वे० ३, १, २८, २।

† 'दक्षस्य—यजमानस्य'—इति वि०।

अथ षष्ठे खण्डे—

आसुतेसिञ्चतमिति त्र्यृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

२ ११ ३ २२ १२ ३ १२
आसुतेसिञ्चतश्रियꣳरोदस्योरभिश्रियम्।

३१२ ३२
रसादधीतवृषभम्॥ १ *॥

"सुते" दुग्धे गो-पयसि "श्रियं" श्रयणमाज्यं पयः, "आसिञ्चत" आसिञ्चन्। कीदृशमाज्य? "रोदस्योः" [कर्मणि षष्ठी] द्यावापृथिव्यो "अभिश्रियम्" अभिश्रयन्तम् अग्नि-संयोगात् तावत् पर्यन्तं प्रवृत्तमित्यर्थः[अथवा "तत्कावश्विनौ द्यावापृथिव्यावित्येके (निरु० दै० ६, १)"—इति यास्केनोक्तत्वात् अश्विनोरभिश्रियमित्यर्थः]। सेचनानन्तरं "रसा"† रसे आज्ये पयसि "वृषभं" वर्षकमग्निं "दधीत" धारयेत् [अजाया आग्नेयीत्वात् क्षीरस्याप्यग्नि-संयोजनमुचितम् "आग्नेयी वा एषा यदजा"—इति हि ब्राह्मणम्॥ १॥

अथ द्वितीया।

१२ १२३ २ २३१ ३ २३१ ३
तेजानतस्वमोक्याऽऽꣳसंवत्सासोनमाद्भिः।

३१२ ३, १ २
मिथोनमन्तजामिभिः॥ २ ‡॥

---

* ऋ० वे० ६, ५, १६, २।

† 'रसा—रसेन'—इति वि०।

‡ ऋ० वे० ६, ५, १, ४।

"ते"* ता गावः "जानत" ज्ञानवत्यः [अथवा सामान्याकारेण ते इति पुरिर्देश्यः। किम् ? "स्वम्" स्वकीयम् "ओकसम्" निवासं महावीरं तत्र दोग्धुमगमन्नित्यर्थः। तदेवाह— "वत्सासो न" यथा वत्साः "मातृभिः" जननीभिः सहतया सङ्गच्छन्ते जामिभिर्बन्धुभिः सहिता गावः "मिथः" परस्परं "नसन्त" सङ्गच्छन्ते महावीरम् ॥ २ ॥

अथ तृतीया।

२११२३१२ ३२३१२३२
उपस्रक्षेषुवपतःकृण्वतेधरुणन्दिवि।

१ २ ३२उ ३१२
इन्द्रेअग्नानमस्वः॥ ३ †॥ १८

महावीरस्य "स्रक्षेषु" "वपतः" ज्वालया भक्षयतोऽग्नेः "नमः" अन्नं "धरुणम्" "इन्द्रे" "अग्ना"—इति वक्ष्यमाणत्वात् इन्द्राग्न्योर्हारकमन्नं "दिवि" अन्तरिक्षे‡ "उप कृण्वते" उप कुर्वते ऋत्विजः यदाग्निर्महावीरं दहति तदा तस्योपर्युभयविधं वीरम् आसेचयन्तीति शेषः॥ ३ ॥ १८

---

* 'इन्द्राग्नी'—इति वि०।

† ऋ० वे० ६, ६, १६, ५।

‡ 'दिवि—द्युलोके इन्द्रे चाग्नौ नमस्कारं कुर्वते स्वर्गलोकस्यार्थायेत्यर्थः' —इति वि०।

अथ तदिदासइति द्वयात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ २२ ३ ११ ३ २ १११ २२ १२३ १२
तदिदासभुवनेषुज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णः।

२१ २३ १२ २२ १ २२३२७ ३ १३१ २
सद्योजज्ञानोनिरिणातिशत्रूननूयंविश्वेमदन्त्यूमाः॥ १*॥

"तत्" जगत्कारणत्वेन सर्ववेदान्त-प्रसिद्धम्† "इत्"[शब्दोऽवधारणे] "भुवनेषु" [भू सत्तायां (भ्वा० प०)] सत्सु पृथिव्यादिषु लोकेषु मध्ये तत् जगत्कारणं ब्रह्मैव "ज्येष्ठं" प्रशस्ततमम् "आस" बभुव, तस्य परमार्थ-सत्वात् तद्व्यतिरिक्तानां व्यावहारिक-सत्वात् [यद्वा, ज्येष्ठं वृद्धतमं जगत्कारणत्वेन सर्वेषामादिभूतं बभूव। अस्ते र्लेटि "छन्दस्युभयथा (३, ४, ११७)" —इति सार्वधातुकत्वाद् "अस्तेर्भूः (२, ४, ५२)"—इति भूभावाभावः। यद्वा, वृद्धं तदेव ब्रह्म स्वप्रकाशतया सन्दीदीपे। अस गति दीप्त्यादानेषु (भ्वा० उ०), अस्माल्लिटि रूपम्] "यतः" उपादानभूतात् यस्माद् ब्रह्मणः "उग्रः" उद्गूर्णः त्वेषनृम्णः प्रदीप्त-बलः सूर्यात्मकइन्द्रः "जज्ञे" जातो बभूव [श्रूयते हि—"चक्षोः सूर्यो अजायत"—इति, "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्"—इति च। "जनिकर्तुः प्रकृतिः (१, ४, ३०)"—इति प्रकृतेरपादान-सञ्ज्ञायां यत् इति पञ्चमी।

* ऋ० वे० ८, ७, १, १।

† 'तत्-इति पादपूरणः'—इति वि०।

जज्ञे इति "गमहनेत्यादिनोपधा-लोपः (६, ४, ९८), "हिर्वचने ऽचि (१, १, ५८)"—इति तस्य स्थानिवद्भावात् हिर्वचनादि, "यङ्लुक्तान्नित्यम् (८, १, ६६)"इति—निघात-प्रतिषेधः]। स च "जज्ञानः" जायमानः "सद्यः" शीघ्रं "शत्रून्" शातयितॄन् सन्देहादीन् राक्षसान् "नि रिणाति" निहिनस्ति [यद्वा, उपासकानां पापरूपान् शत्रून् निहन्ति। यथा च "सद्यो ह्येष जातः पाप्मानमपहत"—इति। जज्ञान इति जनेर्लेटः कानचि रूपमेतत्। रिणाति—रौगति रेषणयोः क्रैयादिकः (प०), "प्रादीनां ह्रस्वः (७, ३, ८०)"—इति ह्रस्वतम्] "विशे" सर्वे जनाः [अवन्ति रक्षन्तीति] "जमाः" प्राणिनः [अवतेरौणादिको मन् प्रत्ययः "ज्वरत्वरेत्यादिना (६,४, २०) वकारोपधयोः स्थाने ऊठ्] सर्वे प्राणिनः "यं" सूर्यात्मकमुद्यन्तमिन्द्रम् "अनु" लक्ष्य "मदर्थमुदगात् मदर्थमुदगात्"—इति "मदन्ति" हृष्यन्ति [मदी हर्षे (दि० प०) व्यत्ययेन शप् (३, १, ८५) ; तथाच ब्राह्मणम्—"भूतानि वै विश्वजमास्तएनमनुमदन्ति उदगादुदगादिति"—इति। तैत्तिरीयकञ्च—"तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति"—इति। यद्वा, यं स्तुत्यादिभिर्मोद्यन्तमनुपश्चात् सर्वे प्राणिनः अभीष्ट-प्राप्त्या हृष्यन्ति "अनुर्लक्षणे (१, ४, ८५)" —इति अनोः कर्मप्रवचनीयत्वात् "कर्मप्रवचनीययुक्ते द्वितीया (२, ३, ८)" स इन्द्रो जज्ञे इत्यन्वयः ॥ १ ॥

अथ द्वितीया।

३ १८ २८१ २ २ ३ १ १ १ १ २ १ १ २
वावृधानःशवसाभूर्योजाःशत्रुर्दासायभियसन्दधाति।

१२ ३२२२१ १ ३१ २१ १२
अव्यनच्चव्यनच्चसक्षिसन्तनवन्तप्रभृतामदेषु॥ २ *॥

"शवसा" बलेन "वावृधानः" वर्द्धमानः, अतएव "भूर्योजाः" "शत्रुः" शातयिता† इन्द्रः "दासाय" उपक्षय-कारिणे शत्रवे‡ "भियसं" भीतिं "दधाति" विदधाति करोति "अव्यनत् च व्यनत् च" [विविधमनिति क्षिपतीति व्यनत्, स-प्राणकं जङ्गमं, तद्विलक्षणमव्यनत् स्थावरम्] तदुभयमपि "सक्षि" संजातम् इन्द्रेण सम्यक् शोधितं भवति [क्षातेः"आदृगमहनः(३,२,१७१)"—इति व्यत्ययेन कर्मणि किन् प्रत्ययः। यद्वा, अन्तर्णीत-ण्यर्थात् कर्त्तर्येव किन्, वृद्ध्यादिना सम्यक् क्षापयिता शोधयिता भवति; "न लोकाव्यय (२,३,६९)"—इति कर्मणि षष्ठ्याः प्रतिषेधः]। शिष्टः पादः प्रत्यक्षकृतः—हे इन्द्र! "ते" तव "मदेषु" हर्षेषु हविषा स्तुत्या च जन्येषु सत्सु "प्रभृता" प्रभृतानि प्रकर्षेण धृतानि पोषितानि वा सर्वाणि भूतजातानि "सन्वन्त" सङ्गच्छन्ते स्तोतुं हवींषि च दातुं समुद्यतीभवन्तीत्यर्थः [नवतिर्गति-कर्मा (निघ० २,१४,२९)। प्रभृता—प्रपूर्वात् बिभर्त्तेः कर्मणि निष्ठा, "शे-

---

* * ऋ०वे० ८, ७, १, १।

† 'शातुः—प्रथमैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् शत्रोः'—इति वि०।

‡ 'दासाय—चतुर्थ्येकवचनं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम। दासस्य दसन-स्वभावस्य'—इति वि०।

छन्दसि बहुलम् (६, १, ७०)"—इति शे-लोपः, "गतिरनन्तरः (६, २, ४९)"—इति गतेः प्रकृतिस्वरत्वम् ॥ २ ॥

अथ तृतीया।

२उ ३ १ २ ३ २ ३ रउ ३ १उ १ १ २
त्वेक्रतुमपिवृञ्जन्तिविश्वे द्विर्यदेतेत्रिर्भवन्त्यूमाः।

३ १र २र ३ १ २ ३
स्वादोःस्वादीयःस्वादुनाहजा

२ १ २उ १ १ २ १ २
समदःसुमधुमधुनाभियोधीः ॥ ३ * ॥ १९

हे इन्द्र! "त्वे" त्वयि "सुपां सुलुक् (७, १, ३९)"—इति सप्तम्येकवचनस्य शे आदेशः] "विश्वे" सर्वे यजमानाः "क्रतुम्" अनुष्ठेयं कर्म "वृञ्जन्ति" समापयन्ति "अपि" [—ग्रब्दो ब्राह्मणोक्तः सर्वभूतानां सर्वमनसां समुच्चयार्थः सर्वाणि पृथिव्यादीनि भूतानि सर्वेषां प्राणिनां मनांसि सर्वे यज्ञक्रतवश्च व्याप्ते त्वय्येव यजमानैः परिसमाप्यन्त इत्यर्थः। तथा च ब्राह्मणम्—"त्वयीमानि सर्वाणि भूतानि मनांसि सर्वे क्रतवोऽपि हृञ्जनीत्येतदाह"—इति] "यत्" यस्मात् "एते" "जमाः" तर्पकाः† [अवतेस्तर्पणार्थादौणादिको मन् प्रत्ययः, "ज्वरत्वरेत्यादिना (६,४,२०)वकारोपधयोरूठ्] ईदृशा यजमानाः पूर्वमेकाकिनः सन्तः पश्चात् "द्विः" द्विवारं स्त्रीरूपेण च पुंरूपेण च जाताः सन्तः पुनरपत्येन सार्धं "त्रिः" त्रिवारं जन्मभाजो भवन्ति। एक एवात्मा स्त्रीपुं-

* ऋ० वे० ८, ७, १, २।

† 'जमाः देवाः'—इति वि०।

रूपेण जायते "अङ्गेषा एष यत् पत्नीति" श्रुतेः। पुत्रोऽप्यात्मैव—"आत्मा वै पुत्रनामासि"—इति श्रुतेः। यत एवमेभिर्हेतुभिः भवन्ति, ततो वा गम्यते त्वय्येवानुष्ठितं सर्वं कर्म परिसमापयन्तीति; तथा च ब्राह्मणम्—"द्वौ द्वौ सन्तौ मिथुनौ प्रजायेते प्रजापत्यै"—इति] हे इन्द्र! त्वञ्च "खादोः" प्रियाद् गृहधनादेरपि "खादीयः" खादुतरं प्रियतरमपत्यं "खादुना" खादुभूतेन मातापित्रात्मकेन* "संसृज" संयोजय [यद्वा, "खादुना" मिथुन-भावेनोत्पन्नं तदपत्यमपि संयोजय]। एतदेवाह—"अदः" अपत्यं "मधु" मधुरं "मधुना" मद-हेतुना मिथुनान्तरेण पौत्रेण वा "सु" सुष्ठु "अभि योधीः" अभियोधय अभितः क्रीड़यां† [धातूनामनेकार्थत्वात् युद्धादि रत्र क्रीड़ार्थे वर्त्तते। "मिथुनं वै स्वादु प्रजा स्वादु"—इत्यादि ब्राह्मणमत्रानुसन्धेयम्॥ ३॥ १९

३ ४ २ ४ ५ २ १ २ ४ ५ १
॥ श्यैतम्॥ तदिदासभुव। नेषू३४ओहोवा। ज्या
२ २ २ १ ७ ५ ५
यिष्ठंयतोजन्यउग्रः। त्वेषानृम्णा२३४ः। ओईवा। स
२ १ २ १ २
द्योजज्ञानः। नायिरा२३यिणा। तिशा२। जू२३४
५ १ २ २ १ २ ५
ना। नुयंविश्वायिमा३दा। ऊम्मायि। त्य२[illegible]

* 'खादोः सोमस्य, खादीयः खादनकर्त्तरः, खादुना सोमेन'—इति वि०।

† 'सुमधु—शोभनं मधु सोमाख्यं, मधुना—द्रोणकलशेन, अभियोधीः—आभिमुख्येन योधयति'—इति वि०।

र ४र र ३ ४५ ३र १ ३र ४र ५ १
ह्वोवा ॥(१) वावृधानःशव। साभू३४औह्वोवा। रा
र २र र र १ १ ५
ओजाःशचुर्हासायभिय। सन्दाधा१ता२३४यि। औ६
५ १ २ १ २ १ ३
ह्वा। अग्यनच्चय। नाच्चा२३सा। च्चिसा२म्। ता२३
५ १ २ २ १ ३
४यिना। वन्तप्रभार्त्ता३मा। ऊम्मायि। दा२यिषू२३
४र२र ३र ४३ ४५ २२ ३र४५ ५
४औह्वोवा ॥(२) त्वे क्रतुमपिवृ। जता ३ ४ औह्वोवा।
१ २र र र १ २ ५ ५
वायिश्वेदिन्द्र्यं देतेत्रिभं। वन्ताऊ१मा२३४:। औ६च्चा।
२र१र र २ र १ र २ १ ३
स्वादोःस्वादीयःस्वादु। नासा२३र्ज्जा। समा२। दा२
५ १ २ २ १ ३ ४र
२४:ह्व। मधुमधूनाऽभा। ऊम्मायि। यो२धा२३४औ
र १ ५
ह्वोवा। वा२३४ह्व(३) ॥ १२ * ॥[१] १९

अथ त्रिकद्रुकेष्विति द्व्यात्मकं द्वतीयं सूक्तम्,

तत्र प्रथमा।

[ऐ०३] १ २ ३१र २र ३ २
त्रिकद्रुकेषु॰ हिषोयवाशिरन्तुविष्टुय्म
३ १ २र ३१ ४ ३१९ ३ १
सूम्यत्सोममपिबद्विष्णुनासुतंयथावशम्।

* ऋ० सं० १३५० २५० ११मा०।

१२ ३२ ३.२३ ११ ३१ ३१२
सईम्महादमवित्रकर्म्मकर्त्तवेमहामूग्ए
१२ ३२ ३२ ३१२ १२ ३१२ १२
सैनग्सश्चद्देवोदेवग्सत्यइन्दुःसत्यमिन्द्रम् ॥ १* ॥

"महिषः" महान् पूज्यः "तुविशुष्मः" बहु-बलः "तृप्यत्" [तृप प्रीणने तुदादिः (प०)] तृप्यन् इन्द्रः "त्रिकद्रुकेषु" त्र्यं.तिगौरायुरित्येतन्नामकेषु आभिप्लविकेष्वहःसु "सुतम्" अभिषुतं "यवाशिरं" यवमयसक्तुभिर्मिश्रितम् [आङ्पूर्वस्य शीणातेः क्विपि "अपसृधेथाम् (६,१,३६)"—इत्यादिना "शिरइत्यादेशः" तं "सोमं" "विष्णुना" सह "अपिबत्" "यथावशम्" अवशत् पूर्वं यथा तं सोमं तथा अपिबत् [वश कान्तौ (अदा०प०)"बहुलञ्छन्दसि (२,४,७३)"—इति शपो लुगभावः] पीतः "सः" सोमः "महां" महान्तम् "जत्रुं" तेजसा विस्तीर्णम् "ईम्" एनम् इन्द्रं "ममाद" अमादयत्। किमर्थम्? "महि" महत् वृत्र-हननादि-लक्षणं कर्म कर्त्तवे कर्त्तुं "सत्यः" "इन्दुः" स्रवन् "देवः" द्योतमानः "सः" सोमः "सत्यं" यथार्थभूतं "देवं" सोमं कामयमानम् "ईम्" एनम् "इन्द्रम्" "सश्चत्" [सश्चतिर्गतिकर्मा] व्याप्नोतु॥

"तृप्यन्"—"तृप्यत्"—इति पाठो, "सत्यइन्द्रस्त्यमिन्द्रम्"—"सत्यमिन्द्रंसत्यइन्द्रः"—इति अग्निवृचे प्रत्यक्षमृगवसाने व्यत्ययेन पाठो॥ १॥

---

* ऋ० सा० ५, २, २, १ (१मा० ९०९ ऋ०) = ऋ० वे० २, ६, २८, १।

अथ द्वितीया ।

२ २ ३ १र १र ३१र २र
साकञ्जातःक्रतुनासाकमोजसाववक्षिथ
१ २ ३ १ २क १र ३ १उ ३ १ २
साकंवृद्धोवीर्यैःसासह्वान्त्सधोविचर्षणिः ।
१ ३ १ १ ३ १उ ३ १ ३ ११ ३ १ २
दातारांधस्तुवतेकाम्यंवसुप्रचेतनसैनꣳ
३ १ ३ २ ३ १र २र ३ १र २र
सश्चद्देवोदेवꣳसत्यइन्दुःसत्यमिन्द्रम् ॥ * २ ॥

हे इन्द्र! त्वं "क्रतुना" कर्मणा प्रज्ञया वा "साकं" सह "जातः"† "साकम्" "ओजसा" बलेन "ववक्षिथ" विश्वं वोढुमिच्छसि [वहेः सन्नन्तस्य लिटि मन्त्रत्वादाम् न भवति]। किञ्च हे "प्रचेतन" प्रकृष्ट-ज्ञानेन्द्र! त्वं "वीर्यैः" शत्रु-हननादि-लक्षणैः पराक्रमैः "साकं" "वृद्धः" प्रवृद्धः "सधः" हिंसकान् सङ्ग्रामान् वा "सासहिः" ["न लोकाव्ययेति (२,३,६९) षष्ठी-प्रतिषेधः] तेषामभिभविताः‡ "विचर्षणिः" पुण्यकृतोऽपुण्यकृतश्च विशेषेण द्रष्टा "स्तुवते" स्तोत्रं कुर्वाणाय यजमानाय "राधः" साकं "काम्यं" प्रार्थनीयं "वसु" धनं "दाता" सन् ववक्षिथेति समन्वयः। सैनमिति परोक्ष-निर्देशः सिद्धार्थः ॥

"प्रचेतन" इति छन्दोगानां विशेष-पाठः ॥ २ ॥

---

* ऋ० वे० १,६,२८,१ ।

† 'साकं जातः सदा जातः सखी वा जातः'—इति वि० ।

‡ 'सोसहिः—साधनमोजः'—इति वि० ।

अथ तृतीया।

२२ १२ २१ २ ३ १२ २१
अधत्विषीमाँ अभ्योजसाक्रविं*युधा
२ ३१२ २२ ३२ ३१२
भवदारोदसीअपृणदस्यमज्मनाप्रवावृधे।
१२ ३ १ ३२३११ ३१२ ३
अधत्तान्यञ्जठरेप्रेमरिचतप्रचेतय
१२ ३२३२ ३१२ २२. ३१२ २२
सैनंसश्चद्देवोदेवंसत्यइन्दुःसत्यमिन्द्रम्॥ ३१॥२०

"अधं" अथ सोमपानादनन्तरं "त्विषीमान्" इन्द्रः "ओजसा" बलेन "क्रविं" क्रवि-नामासुरं† "युधा" युद्धेन "अभ्यभवत्" अभिभूतवान्। किञ्च स इन्द्रः "रोदसी" द्यावापृथिव्यौ "आ अपृणत्" स्व-तेजसा समन्तात् पूरयामास। तथा "अस्य" पीतस्य सोमस्य "मज्मना" बलेन "प्र वावृधे" प्रकर्षेण वर्धते [यद्वा, 'अस्य' क्रवेः असुरस्य 'मज्मना' सारेण 'रोदसी' अपूरयत् स इन्द्रः सोमं त्रिधा विभज्य "अन्यं" भागं स्वकीये "जठरे" "अधत्त"। "ईम्" एनम् अपरं भागं देवेभ्यः "प्रारिचत" रिचयत् [एतेनार्धमिन्द्राय अर्धमन्येभ्योऽपि देवेभ्य इत्युक्तं भवति।

* "क्रविं"—इति क० पु० पाठः।
† ऋ० वे० १, ३३, २।
‡ 'क्रविं—क्रूपस्थानीयम्'—इति वि०।

तथाच तैत्तिरीयकम्—"यत् सर्वेषामर्वमिन्द्रं प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः"—इति]। हे इन्द्र! त्वं "प्रचेतय" एवम्भूतं सोमं देवांश्च सम्यक् ज्ञापय प्रापयेत्यर्थः। अन्यत् पूर्ववत्॥

"प्रचेतय"—इति विशेष-पाठः॥ ३॥ २०

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य त्रयोदशस्याध्यायस्य षष्ठः खण्डः॥ ६॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ १३॥

॥ इति षष्ठः प्रपाठकः* ॥ ६॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदभाष्ये उत्तरार्चे त्रयोदशोऽध्यायः समाप्तः

---

* षष्ठः प्रपाठकः परिसमाप्तः समाप्तश्चैतद्वनसप्तनवत्यामायतनम्—

15813
ROYAL ASIATIC SOCIETY OF BENGAL LIBRARY
Author Veda - Sama-Veda.
Title Sama-Veda. Samhita &c (Vol 4.)
Call No.

Date of Issue	Issued to	Date of Return

Library of the
ROYAL ASIATIC SOCIETY OF BENGAL
Call No. 294.5921/V.4/1.R.S. Vol-3
Accession No. 15813